काव्यमाला. ७.

महाकविश्रीबिह्लणविरचिता

# कर्णसुन्दरी ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधिता ।

सा च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीता ।

१८८८

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यं रूप्यकार्धम् ।

# बिह्लणः।

अस्ति कश्मीरेष्वनेकगुणगुम्फितं प्रवरपुरं[1] नाम नगरम्. वर्तते च ततः क्रोशत्रयान्तरे तक्षकनागाधिष्ठितविमलसलिलभरितकुण्डमण्डितस्य जयवनाख्यस्थलस्य समीपे द्राक्षा-कुङ्कुमक्षेत्रसमुल्लसितोभयभागः परमरमणीयः खोनमुख(ष)नामको[2] ग्रामः. निवसन्ति स्म तत्र गोपादित्यमहीभुजा[3] मध्यदेशात्सादरमानीय समावासिताः श्रौतस्मार्तधर्मानुष्ठाननि-ष्ठितचेतसो ब्रह्मचिन्तनैकतानवृत्तयः कौशिकगोत्रोत्पन्नाः केचन भूसुरसत्तमाः. तेषु निखि-लवेदवेदाङ्गवेत्ता मुक्तिकलशो नाम पण्डितरत्नमासीत्. तस्य वदान्यो विक्रान्तो विद्वांश्च राजकलशाभिधस्तनयो बभूव. तस्मान्महाभाष्यव्याख्याता ज्येष्ठकलशाख्यः सूनुरुदपद्यत, यो नागादेवीं नाम पतिव्रताग्रगण्यां भार्यामूढवान्. तयोर्विद्वन्मूर्धन्यो नानानरपति-परिषत्सु लब्धसंमानः सत्कविरिष्टरामाख्यः, काञ्चनगौराङ्गो वेदवेदाङ्गसाहित्यादिनिखि-लविद्याकुलगृहं जगल्ललामभूतो महाकविर्बिह्लणः, कवितानिवासस्थलमानन्दाख्यश्चेति पुत्रत्रयमुदपेदे. तेषु बिह्लणो बाल्यमतिवाह्य यौवने नानादेशविलोकनकौतुकादनन्तदेव-सूनुकलशदेवराज्यसमये[4] कश्मीरान्परित्यज्य मथुरा-वृन्दावन-कान्यकुब्ज(कनौज)-काशी-प्रयाग-अयोध्या-डाहल-धारानगर-गुर्जरदेश-सोमनाथपत्तन-सेतुबन्धादिस्थलेषु बम्भ्रम्यमा-णस्तत्तद्देशीयविविधभूपालसभाजितः क्रमेण दक्षिणादिङ्मण्डनायमानां चालुक्यवंश्यनरे-न्द्रराजधानीं कल्याणाभिधां नगरीमाससाद.[5] लब्धवांश्च तत्रैव चालुक्यवंशभूषणेन क-र्णाटदेशाधीशेन कुन्तलेन्दुना त्रैलोक्यमल्लापरनामधेयेनाहवमल्लेन तत्सूनुना विक्रमाङ्कदे-वेन वा सादरमर्पितां विद्याधिपतिरितिपदवीपुरस्कृतां भूयसीं संपत्तिम्. प्रणिनाय च तत्रैव विक्रमाङ्कदेवचरिताभिधं महाकाव्यमिति विक्रमाङ्कदेवचरितादेवावगम्यते.

---

१. राजधानीनगरम्, अधुना यस्य श्रीनगरनाम्ना व्यवहारः. २. अधुना यस्य 'खु-नूमोह'नाम्ना प्रसिद्धिः. ३. ख्रिस्ताब्दप्रारम्भात्किंचिदूनचतुःशतवर्षपूर्वं गोपादित्यमही-पतिः कश्मीरेषु राज्यं कुर्वन्नासीत्. ४. 'कश्मीरेभ्यो विनिर्यान्तं राज्ये कलशभूपतेः। विद्यापतिं यं कर्णाटश्चक्रे पर्माडिभूपतिः॥९३६॥ प्रसर्पतः करिटिभिः कर्णाटकटकान्तरे। राज्ञोऽग्रे ददृशे तुङ्गं यस्यैवातपवारणम्॥ ९३७॥ त्यागिनं हर्षदेवं स श्रुत्वा सुकविबा-न्धवम्। बिह्लणो वञ्चनां मेने विभूतिं तावतीमपि ॥ ९३८॥ इति कह्लणराजतरङ्गि-ण्याः सप्तमे तरङ्गे समुपलभ्यते. ख्रिस्ताब्दीयैकादशशतकस्योत्तरार्धे कलशदेवराज्यसमयः. तदैव बिह्लणः कश्मीरान्परित्यक्तवान्. ५. विक्रमाङ्कदेवचरिते प्रतिसर्गसमाप्तौ 'त्रिभुव-नमल्लदेवविद्यापति' इति बिह्लणविशेषणं वर्तते. एतेन आहवमल्लापरनाम्ना त्रैलोक्यमल्लेनैव बिह्लणाय विद्यापतिरिति पदवी वितीर्णा स्यादित्यनुमीयते.

बिह्लणचरिताभिधे खण्डकाव्ये तु "गुर्जरदेशे अनहिलपत्तनाभिधे नगरे वैरिसिंहाभिधो नरपतिः, सुताराभिधा अवन्तिभूपालदुहिता तन्महिषी चासीत् । तयोरेका शशिकलानाम्नी कन्या समुत्पन्ना । सा च क्रमेण यौवनारूढातिरूपलावण्यवती पित्रोः सुतरामानन्ददायिनी बभूव । तत्पिता तु नित्यं तदध्यापनचिन्ताकुलस्तस्थौ । अस्मिन्नवसरे काश्मीरको बिह्लणकविस्तत्र समायातः । नीतश्च राजपुरोहितेनातिकौतुकान्महीपतिसमीपम् । वैरिसिंहमहीपतिरपि निरुपमं तद्विद्याचमत्कारमतिमधुरां च तदीयकवितामाकर्ण्य बहुसंपत्तिसमर्पणपूर्वकं साभ्यर्थनं च नियोजितवान्स्वदुहितुः शशिकलायाः पाठने । सापि पितुराज्ञानुकूलं बाल्योचितां शुकशारिकादिक्रीडामपहाय निजगुरुं बिह्लणं शुश्रूषमाणा विद्याभ्यासं कुर्वती स्वल्पैरेव दिवसैः संस्कृतप्राकृतादि सर्वमधीतवती । एकदा चातिसुरभिगन्धसंचाररुचिरे पुष्पमालादिपरिष्कृते प्रासादे राजसुतां कामशास्त्रं पाठयन्कविरासीत् । तदा च रूपयौवनविद्याविनयादिगुणगणसंपन्ने तस्मिन्कविवरे बद्धभावा शशिलेखा नानाविधैर्हावैस्तस्य चित्तमात्मायत्तं चकार । दैवनोदितः काममोहितश्च कविरपि प्राग्जन्मजायायास्तस्या गूढं गान्धर्वविधिना पाणिं जग्राह । रञ्जयामास च मन्मथतन्त्रप्रतिपादिताभिर्बहुविधाभिः केलिभिर्विविधाभिश्च बन्धक्रियाभिर्नरेन्द्रपुत्रीम् । एवं सुखमनुभवतोस्तयोरतिक्रान्ते कियत्यप्यनेहसि रक्षापुरुषा राजसुतायास्तप्ततपनीयकान्तीन्यङ्गानि म्लायमानशिरीषकुसुमोपमानि संभोगचिह्नाङ्कितानि चालोक्य, विज्ञाय च कथमपि सर्वं गूढं चरितं राज्ञे निवेदयांचक्रुः । राजापि वज्रनिपातोपमं तद्वृत्तमाकर्ण्य रोषेण प्रज्वलन्नादिदेश बिह्लणस्य शूलारोपणम् । तदैव घातुकपुरुषैः शूलाधिरोपणस्थलं नीतो बिह्लणः, उक्तश्च—'भो वध्य, संनिहितस्तवाधुना मृत्युः । स्मर निजामाराध्यदेवताम्' इति । बिह्लणोऽपि राजसुतासक्तमना मृत्युभयमप्यगणयन् 'अद्यापि तां कनकचम्पकदामगौरीं' इत्यादि शशिलेखास्मरणरूपां पञ्चाशिकां समुदीरितवान् । अत्रान्तरे प्राणप्रियाया निजसुतायास्तस्मिन्गाढमनुरागं निजमहिषीमुखादाकर्ण्य किंचिच्छिथिलितकोपो बिह्लणगुणगणवशीकृतस्वान्तैः पौरैः परिजनैर्मन्त्रिभिर्बोधितश्च ब्राह्मणवधभीरुर्नरेन्द्रः परमेश्वरेच्छामेव तादृशीं मन्यमानो निवारयामास कविं शूलारोपणात् । समर्पितवांश्च तदैव तस्मै शशिलेखाम्, बहुग्रामगजतुरगसुवर्णरत्नादिसमृद्धिं च । एवं मृत्युमुखान्मुक्तो बिह्लणकविर्नृपतिप्रसादमासाद्य शशिलेखया समं चिरं सुखमनुबभूव" इति कथा वर्तते. परमियं कथा नातिविश्वासार्हा, यतो बिह्लणः ख्रिस्ताब्दीयैकादशशतकोत्तरार्धे कश्मीरान्परित्यज्य समागतस्तदा अनहिलपत्तने चालुक्यवंशोद्भवो भीमदेवसूनुः कर्णराजो महीपतिरासीत्, न तु वैरिसिंहः. चापोत्कट(चावडा)वंशोद्भवो वैरिसिंहस्तु ९२० मिते

---

१. बिह्लणचरितप्रणेतुर्नाम नोपलभ्यते. २. 'वीरसिंहः' इत्यपि नाम पुस्तके वर्तते. ३. पुस्तकान्तरे 'सुनारी' इति पाठोऽस्ति. ४. कर्णराजस्य राज्यसमयस्तु १०७२ मितात्ख्रिस्ताब्दादारभ्य १०९४ मितख्रिस्ताब्दपर्यन्तमासीत्.

ख्रिस्ताब्द एव समाप्तोऽभूदिति ऑनरेबल्. ए. के. फॉर्बस्प्रणीत'रासमाला'ख्यगुजरातदेशेतिहासग्रन्थे प्रसिद्धमेव.एकादशशतकोत्तरभागे गुर्जरदेशे बिह्लणः समागत इति त्वसंदिग्धम्. गुर्जरदेशे च बिह्लणेन कश्चन क्लेशोऽनुभूत इति 'कक्षाबन्धं विदधति न ये सर्वदैवाविशुद्धास्तद्भाषन्ते किमपि भजते यज्जुगुप्सास्पदत्वम् । तेषां मार्गे परिचयवशादर्जितं गुर्जराणां यः संतापं शिथिलमकरोत्सोमनाथं विलोक्य ॥' अस्माद्विक्रमाङ्कदेवचरितस्थ(१८। ९७)पद्यात्प्रतीयते. एवं कल्याणनगरेऽपि कुन्तलाधीशतो भूयांसमैश्वर्यमधिगत्यापि कांचन विपत्तिं बिह्लणोऽनुभूतवानिति 'सर्वस्वं गृहवर्ति कुन्तलपतिर्गृह्णातु तन्मे पुनर्भाण्डागारमखण्डमेव हृदये जागर्ति सारस्वतम् । रे क्षुद्रास्त्यजत प्रमोदमचिरादेष्यन्ति मन्मन्दिरं हेलान्दोलितकर्णतालकरटिस्कन्धाधिरूढाः श्रियः ॥', 'अयि किमनिशं राजद्वारे समुद्धुरकंधरे कुवलयदलस्निग्धे मुग्धे विमुञ्चसि लोचने । अमररमणीलीलावल्गद्विलोचनवागुराविषयपतितो न व्यावृत्तिं करिष्यति बिह्लणः ॥' अस्मात्कश्मीरदेशीयचौरीसुरतपञ्चाशिका(चौरपञ्चाशिका)पुस्तकप्रारम्भस्थश्लोकद्वयाज्ज्ञायते.

चौरपञ्चाशिका, विक्रमाङ्कदेवचरितम्, कर्णसुन्दरीनाटिका चेति ग्रन्थत्रयमद्यावधि बिह्लणप्रणीतं समुपलब्धमस्ति. तत्र चौरपञ्चाशिका तावत्सुप्रसिद्धैव. विक्रमाङ्कदेवचरितं च जैसलमेरनगरात् डॉक्टरबूलरेणासादितम्, प्रसिद्धिं च नीतम्. कर्णसुन्दरी तु नाद्यापि प्राकाश्यमाप्तवती. पूर्ववर्षे ग्वाह्लेरनगरनिवासिपण्डितगङ्गाधरजोशीसकाशादेकं कर्णसुन्दरीपुस्तकमस्मन्मित्रै राजगुरुपर्वणीकरोपाह्वनारायणभट्टैः प्राप्तमस्मभ्यं समर्पितं च. एतत्पुस्तकं प्रायः शुद्धं केनचित्संशोधकेन क्वचित्क्वचिदशुद्धतां नीतं शतत्रयवर्षप्राचीनमिवोपलक्ष्यमाणमस्ति. अस्मिन्पुस्तके पञ्चाशन्मितानि पत्राणि, प्रतिपृष्ठं षट्पङ्क्तयः, प्रतिपङ्क्ति च षड्विंशत्यक्षराणि सन्ति. पत्राणि च षडङ्गुलमितानि विस्तारे सार्धत्रयोदशाङ्गुलमितानि च दैर्घ्ये वर्तन्ते. पञ्चाशन्मितपत्रान्तिमपङ्क्तिसमाप्तौ 'समाप्ता चेयं कर्णसुंद–' इत्यस्ति. एतेनापरमप्येकं पत्रमासीत्, तस्मिन्पुस्तकलेखनकालोऽपि कदाचित्स्या'दिति भाति. अन्यदप्येकं पुस्तकमस्मन्मित्रपण्डितज्येष्ठाराममुकुन्दजीशर्मणां साहाय्येन मुम्बईनगरमण्डनसत्कविपण्डितवरगट्टूलालाजीशर्मणां पुस्तकसंग्रहादुपलब्धम्. किं त्वेतत्पुस्तकमत्यशुद्धं पत्रत्रयहीनं ग्वाह्लेरपुस्तकस्यैव प्रतिरूपकमिव प्रतीयमानमस्तीति नात्र तस्य कश्चिदुपयोगो जातः. केवलमेकस्माद् ग्वाह्लेरपुस्तकादेवैतन्मुद्रणमस्माभिर्विहितम्. कर्णसुन्दर्यां चास्यां पूर्वोक्तश्चालुक्यवंशोद्भवो भीमदेवात्मजः कर्णराज एव कथानायकः. अन्यद्वृत्तं तु प्रायः कविकल्पितमस्तीति भद्रम्.

---

१. डॉक्टरबूलरस्य कश्मीर'रिपोर्ट'पुस्तकं द्रष्टव्यम्. २. विक्रमाङ्कदेवचरितादिष्वनुपलभ्यमानाः केचन श्लोकाः शार्ङ्गधरपद्धति-सूक्तिमुक्तावल्यादिषु बिह्लणनाम्ना समुद्धृताः समुपलभ्यन्त इत्यस्ति कश्चिदन्योऽपि ग्रन्थो बिह्लणप्रणीत इति प्रतीयते.

# काव्यमाला।

## महाकविश्रीबिह्लणविरचिता

# कर्णसुन्दरी।

प्रथमोऽङ्कः।

अर्हन्नार्हसि मामुपेक्षितुमपि क्षामां त्वदर्थे तनुं
किं नालोकयसे भविष्यति कुतः स्त्रीघातिनस्ते सुखम्।
अङ्गैः काञ्चनकान्तिभिः कुरु परिष्वङ्गं सुपर्वाङ्गना-
लोकैरित्थमुदीरितः क्षितिधरस्थायी जिनः पातु वः॥ १॥

अपि च।

संतापं शमयन्तु वस्त्रिविधमप्युद्धूलनानन्तरं
तिस्रस्ताः करतालिकाः पुररिपोर्निर्विघ्नसंध्यार्चनाः।
देव्याः शैलभुवः क्षणं मदयता दृष्टिं यदाकर्णना-
त्कौमारेण शिखण्डिना निबिडितक्रीडारवं नृत्यते॥ २॥

अपि च।

वक्रेन्दोः सदृशी भविष्यति लिपिः कण्ठे नु कण्ठोचिता
लक्ष्मीः किं कुचमण्डले कुचभुवः संवादि मध्यं नु किम्।
इत्यादि क्रमशः कुतूहलरसप्रेमालसा दृष्टयः
श्रीकान्तस्य जयन्ति दुग्धजलधेरभ्युल्लसत्यां श्रियि॥ ३॥

(नान्द्यन्ते)

**सूत्रधारः**—कथं प्रभातसमयः।

अपरशिखरिचूडाचुम्बि बिम्बं हिमांशो-
रिह हि विरहिणीनां याति शापैरिवास्तम्।

अपि कुपितचकोरीनेत्रसब्रह्मचारी
भजति ककुभमैन्द्रीं कोऽपि सांध्यो विलासः ॥ ४ ॥
दधति गृहचकोराश्चन्द्रिकाम्भःशिलोञ्छं
क्वचन कनकशालाजालकाभ्यन्तरेषु ।
अपि रतिभवनानि व्यञ्जयन्ति प्रियाणां
निधुवनसुखनिद्रां मूकपारावतानि ॥ ५ ॥
विडम्बयति दाडिमीकुसुममत्र सौत्रामणी
दरिद्रति वियद्द्रुमे मुकुलकान्तयस्तारकाः ।
वपुस्तुहिनदीधितेरपि चकास्ति कस्तूरिका-
कुरङ्गनयनारुणं वरुणलाञ्छितायां दिशि ॥ ६ ॥

(नेपथ्याभिमुखम्।) आर्ये, अपि सुसंगतानि रङ्गमङ्गलानि। (विमृश्य।) पराङ्मुखीवार्या। किं नु कारणं स्यात्। (स्मृतिमभिनीय।)

आस्थानावसरे नरेन्द्रतरणेः सा दाक्षिणात्या नटी
नृत्यन्ती यददर्शि नूतनवयोविद्यानवद्या मया ।
तद्गोष्ठीरसनिर्भरेण किमपि स्वप्ने यदद्य स्थितं
मन्ये मन्युकषायितेन मनसा तेन स्थिता मे प्रिया ॥ ७ ॥

(सप्रत्ययम्।) इतस्तावत्।

(प्रविश्य)

**नटी**—इअह्मि। (क)

**सूत्रधारः**—अलमसंभाव्यसंभावनया।

परिणयविधिरासीदावयोः पांसुलीला-
परिचयदृढरूढस्नेहयोर्बाल्य एव ।
स्मरसि किमपि तत्राप्यानुकूल्यात्परं य-
त्सपदि पुनरसौ मे पञ्चबाणः प्रमाणम् ॥ ८ ॥

**नटी**—न मे कावि आसङ्का। आणवीयदु किं अणुचिट्ठीयदु त्ति। (ख)

---

(क) इयमस्मि।

(ख) न मे काप्याशङ्का। आज्ञापयतु किमनुष्ठीयतामिति।

**सूत्रधारः**—नन्वस्मिन्नणहिल्लपाटणकमुकुटमणौ श्रीशान्त्युत्सवदेवगृहे भगवतो नाभेयस्य महामात्यसंपत्करप्रवर्तिते यात्रामहोत्सवे समुत्सुकः सामन्तजनः प्रत्यग्रप्रयोगदर्शनाय ।

(नेपथ्ये गीयते ।)

णवमाहवीएँ दाविय सरसविलासाइँ परवसाइन्तो ।
मन्दीकअकुन्दलआचुम्बणतह्लो भमइ भमरो ॥ ९ ॥ (क)

**सूत्रधारः**—(सहर्षम् ।) कथमुपक्षिप्तैव नटैर्नाटिका कर्णसुन्दरी । अहो सुकृतानि सामाजिकजनस्य ।

हंहो भाग्यमहानिधिर्दयितया देवस्य दग्धुः पुरां
पात्रं पुत्र इव स्वयं विरचितः सारस्वतीनां गिराम् ।
साहित्योपनिषन्निषण्णहृदयः श्रीबिह्लणोऽस्यां कविः
किं चैतत्किल भीमदेवतनयः साक्षात्कथानायकः ॥ १० ॥

स च कविरेवमुक्तवान्—

औचित्यावहमेतदत्र तु रसः काष्ठामनेनार्हति
व्युत्पत्तेरिदमास्पदं पदमिदं काव्यस्य जीवातवे ।
एवं यः कवितुः श्रमः सहृदयस्तं पुस्तकेभ्यः पठ-
न्सूक्तीरुत्पुलकः प्रमार्ष्टि निबिडैरानन्दबाष्पोद्गमैः ॥ ११ ॥

अपि च ।

न विश्वासस्थानं प्रियमभिदधानोऽपि पिशुनो
विषं प्राणान्हर्तुं धुरि मधुरमेव प्रभवति ।
परं शक्तः कर्तुं किमु मम वराकः कतिपये
यदद्यापि ज्ञप्तौ सुकविवचसां केऽपि सुजनाः ॥ १२ ॥

(कर्णं दत्त्वा ।) किमात्थ । कोऽत्र कथासंबन्ध इति । श्रूयताम् ।

विद्याधरेन्द्रतनयां नयनाभिरामां
लावण्यविभ्रमगुणां परिणीय देवः ।

(क) नवमाधव्या दृष्ट्वा सरसविलासान्परवशायितः ।
मन्दीकृतकुन्दलताचुम्बनतृष्णो भ्रमति भ्रमरः ॥

चालुक्यपार्थिवकुलार्णवपूर्णचन्द्रः
साम्राज्यमत्र भुवनत्रयगीतमेति ॥ १३ ॥

(पुरोऽवलोक्य ।) कथमयमस्मद्भ्राता महामात्यप्रणिधिभूमिकामाश्रित एव । तदेहि । अनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

---

(ततः प्रविशति प्रणिधिः ।)

**प्रणिधिः**—अहो किमपि यौगन्धरायणप्रभृतिमहामात्यविजयिनोऽभ्यर्हिता मतिरमात्यसंपत्करस्य । तथा हि ।

वात्सल्यं न वहत्यपत्यविषये व्याक्षिप्यते न क्षणं
दाक्षिण्येन समीहिते नववधूवर्गेऽपि धीराशयः ।
निष्णातः कुटिले नयाध्वनि चरन्नाचारपूतः प्रभो-
र्दुःसाध्यानपि साधयत्यभिमतानर्थान्सुसाधानिव ॥ १४ ॥

अपि च ।

अस्याश्चर्यमयस्य मन्त्रगतयः स्वैरन्तरङ्गैरपि
ज्ञायन्ते न विधेरिवातिकुटिला वैदग्ध्यसीमाभुवः ।
श्रूयन्ते प्रतिभूभृतां वसतयस्त्वङ्गत्तुरंगावली-
विश्वोत्खेलखुराग्रखण्डितमणिक्षोणीतलाः केवलम् ॥ १५ ॥

किं च ।

शेषे प्रज्ञाविशेषः स्फुरति यदि किमु च्छद्मना पद्मनाभः
संरम्भात्तेन तेन स्वयमसुरवधव्यग्रभावं दधार ।
वाचामीशोऽपि सत्यं यदि विपुलमतिः श्रूयते वज्रिणः किं
दैत्यावस्कन्दबन्दिग्रहणपरिभवश्यामला शक्रलक्ष्मीः ॥ १६ ॥

संप्रति प्रेषिताश्च प्रतिदिशं सेनापतय इति । (कर्णं दत्त्वा । आकाशमवलोक्य ।)

अमरसरिदुपान्तभ्रान्तचक्राह्वचक्र-
भ्रममुरसिजभारैः काश्चन व्यञ्जयन्त्यः ।

किमु विततनितम्बाभोगसंवाहवेग-
स्खलनमुखरचञ्चत्काञ्चयः संचरन्ति ॥ १७ ॥

(अग्रतो विलोक्य । सविस्मयम् ।)

तुलाकोटिक्काणप्रणयिभिरवाप्तैरिव गते-
र्विलासे शिष्यत्वं भवनकलहंसैरनुगता ।
सुधामुग्धैरङ्गैः शशिन इव गर्भाद्विगलिता
कुरङ्गाक्षी केयं तिलकयति लीलावनभुवम् ॥ १८ ॥

(पुनरवलोक्य ।)

उच्चञ्चुपञ्जरचकोरकचर्व्यमाण-
पूर्णेन्दुसुन्दरताराननचन्द्रिकेयम् ।
देव्याः कथं परिजनप्रमदाजनेन
नीतैव मन्दिरममन्दकुतूहलायाः ॥ १९ ॥

(विचिन्त्य ।)

एताः काश्चन निश्चलालकलताश्चिन्तातिरेकश्रम-
स्विद्यद्भालतटा यदम्बरतले भ्राम्यन्ति वामभ्रुवः ।
श्रीचालुक्यकुलोद्वहे कलयति त्र्यक्षोपचर्यामिह
स्रस्ता काचन लिङ्गलङ्घनवशात्तद्वेद्मि विद्याधरी ॥ २० ॥

(सचमत्कारम् ।) सत्यस्वप्नः सांप्रतममात्यः । तेनैवंविधेन व्यतिकरेण मां प्रति भर्तुश्चक्रवर्तित्वमभिहितमासीत् । तत्परिजनमुखेन

जानीते निपुणा कथंचन मनाग्देवी न सीता यथा
वारंवारमसौ तथा नरपतेः संदर्शनीया मया ।
अन्योन्यं हृदये तयोः स्पृहयतोर्भावेऽतिभूमिं गते
पर्याप्तः कुसुमायुधः स भगवान्पारावताराय नः ॥ २१ ॥

तद्भवतु । सांप्रतमेव

लीलोद्याने भवनवलभौ रत्नवातायनेषु
क्रीडासौधे तदनु मदनोद्यानशालासु बालाम् ।

---

१. आदर्शपुस्तके 'संवाह-' इत्यस्य 'संबाध-' इति शोधनं कृतमस्ति.

इन्दोर्गर्भे चिरमिव धृतैरङ्ककैस्तामनङ्ग-
स्याज्ञावाप्तौ पुनरिव नवां सिद्धिमालेखयामि ॥ २२ ॥

(नेपथ्ये ।)

जयति विश्रामावसरो देवस्य । संप्रति

अन्योन्यं लज्जयेव प्रतिफलनमिषात्कुट्टिमान्तर्विशन्तः
पातालं भूमिपालाः किसलयितशिखाः पाणिबन्धैः प्रणम्य ।
गच्छन्ति च्छत्रखण्डस्तबकितककुभश्चित्रवादित्रजैत्र-
ध्वानाकृष्टप्रहृष्टप्रचुरपुरवधूवीक्ष्यमाणा गृहाणि ॥ २३ ॥

अपि च ।

पञ्चास्त्रस्य त्रिलोकीहठविजयमहारम्भसंभारदीक्षा-
माचक्षाणा इवोच्चैर्जघनझणझणन्मेखलाचक्रवालैः ।
ध्वस्ताम्भोजैः सुभिक्षं दिशि दिशि विशदैर्दर्शयन्त्यश्च वक्त्रै-
श्चन्द्राणां सान्द्रलीलातिलकितगतयो निर्गता वाररामाः ॥ २४ ॥

किं च ।

विश्रान्तो मुरजध्वनिर्जलधरध्वानानुकारी गताः
संगीताङ्गणतस्तरङ्गितमुखज्योत्स्नारसा लासिकाः ।
चण्डः केलिशिखण्डिनां न विरमत्यद्यापि नृत्योत्सव-
श्चञ्चच्चञ्चव एव किं च विचरन्त्यन्तश्चकोराङ्गनाः ॥ २५ ॥

**प्रणिधिः**—यत्पुनर्देवो विश्राममण्डपमलंकृतवांस्तन्नूनमेतद्दर्शनजन्मा मन्मथावेग एव विविक्तस्थानस्थितिमुपदिशति । तद्गत्वा यथोचितं विरचयामि । (इति निष्क्रान्तः ।)

**शुद्धविष्कम्भकः ।**

(ततः प्रविशति राजा विदूषकश्च ।)

**राजा**—(सौत्सुक्यम् ।)

धातुस्तन्मुखवर्तनाफलहकः श्यामावधूवल्लभ-
स्तल्लेखोद्यततूलिकाग्रगलितास्ताराः सुधाविप्रुषः ।

१. 'किशलयितशिखापाणि–' इत्यादर्शपाठः. २. 'छत्रषंड–' इत्यादर्शपाठः. ३. 'ज्झणज्झण–' इत्यादर्शपुस्तकपाठः.

तल्लावण्यरसस्य शेषममला सा शारदी कौमुदी
तद्भूनिर्मितिमानसूत्रमपि तच्चापं मनोजन्मनः ॥ २६ ॥

अपि च[1] ।

मज्जन्तीव दृशः कुरङ्गकदृशो लीलाविलासोर्मिषु
भ्रूलेखा सृजतीव विभ्रमशतैः कामाय दामावलिम् ।
लावण्यामृतनिर्झरः स्नपयतीवाङ्गानि किं चाधर-
स्तारां सिञ्चति पद्मरागकिरणोत्सेकैरिवैकावलीम् ॥ २७ ॥

अपि च ।

त्रिवलिवलितलीलालोलवेणीकलापं
किमपि रसविभूतेस्तिर्यगाकेकराक्षम् ।
कलितकुटिलकण्ठं दर्शनोत्कण्ठयास्या
लिखितमिव ममान्तस्तन्मुखं मन्मथेन ॥ २८ ॥

**विदूषकः**—भो, किं वि पुच्छामि । (क)

**राजा**—(तदवधीरणेन ।)

विधत्ते निःसेकं सहजरमणीयस्तरुणिमा
वपुर्वल्लीं चित्रैः कवचयति लीलाकिसलयैः ।
विलासव्यापारः किमपि कमलस्थो नयनयो-
रनङ्गं तन्व्यङ्ग्यास्त्रिभुवनजिगीषुं रचयति ॥ २९ ॥

**विदूषकः**—भो, का एसा लीलावणप्पवेसे पिअवअस्सेण दिट्ठा ।(ख)

**राजा**—

ध्यानान्ते विधिना प्रणम्य चरणौ चन्द्रार्धमौलेरहं
कैश्चिज्जप्यपदैः प्रदक्षिणयितुं यावत्समभ्युद्यतः ।

---

(क) भोः, किमपि पृच्छामि।

(ख) भोः, कैषा लीलावनप्रवेशे प्रियवयस्येन दृष्टा ।

---

१ 'अपि च' इत्यादर्शे नास्ति.

तावत्काचिदनङ्गजङ्गमपुरीवाग्रे मनोग्राहिणी
रम्भास्तम्भमनोहरोरुयुगला बालाभवच्चक्षुषोः ॥ ३० ॥
स्वप्नोऽसौ किमुतेन्द्रजालमपरं किं वा किमप्यद्भुतं
यत्सा कान्तितरङ्गिताङ्गलतिका दृष्टा कुरङ्गेक्षणा।
उल्लेखः स नवीन एव सुमतेः कस्यापि रूपे विधेः
संवादोऽपि न यस्य पङ्कजशशिज्योत्स्नामृणालादिभिः ॥३१॥

**विदूषकः**—भो, एदस्स उज्जाणप्पदेसस्स किं करीअदु जत्थ अणत्थो एरिसो समावडिदो। (क)

**राजा**—मूर्ख,

तदेकं देवस्य स्पृशतु मदनस्यास्पदपदं
लतास्तास्तत्रत्याः स्तबकयतु चैत्रः प्रतिदिनम्।
असौ दृष्टा यत्र क्षणममललावण्यसरसी
जगन्नेत्राचम्यं किमपि दधती कान्तिसलिलम् ॥ ३२ ॥

**विदूषकः**—भट्टिणो संदावदाअणं ति भणामि। (ख)

**राजा**—सखे,

चान्द्री वर्तिर्नयनयुगले जीवलोकस्य सैका
सा साम्राज्ये कुसुमधनुषः कीर्तिहेतुः पताका।
तत्प्राप्त्याशाविवशमनसा केनचित्तप्यते चे-
न्निःसंबन्धं कथयतु भवान्कस्तदीयोऽपराधः ॥ ३३ ॥

**विदूषकः**—(छोटिकां दत्त्वा।) जइ एव्वं अत्थि विवेओ ता कीस ण विरज्जीअदि। (ग)

**राजा**—अनभिज्ञोऽसि। कथ्यते। पश्य।

रागः कस्यचिदेति चेतसि पदं यः काकतालीयतः
कस्यांचिन्न विवेकवारिविसरैर्धौतोऽपि निर्यात्यसौ।

---

(क) भोः, एतस्योद्यानप्रदेशस्य किं क्रियते यत्रानर्थ ईदृशः समापतितः।

(ख) भर्तुः संतापदायकमिति भणामि।

(ग) यद्येवमस्ति विवेकस्तत्कुतो न विरज्यते।

माञ्जिष्ठादपि सोऽन्य एव किमपि स्थैर्यास्पदं मन्मथे-
नावर्त्यैव निजेन बाणशिखिना चित्तैक्यमापादितः ॥ ३४ ॥

**विदूषकः**—अध किं ति देवी दुम्मणायन्ति व्व मये लक्खिदा । (क)

**राजा**—शृणु निवेदयामि ।

अद्योद्याने मरकतमयीं वापिकामुत्तरेण
स्वप्ने दृष्टा प्रकृतिमधुरा माधवीमण्डपान्तः ।
काप्येणाक्षी रतिरिव मया विप्रयुक्ता स्मरेण
स्मारं स्मारं किमपि दधती दुःसहां मोहनिद्राम् ॥ ३५ ॥

**विदूषकः**—तदो । (ख)

**राजा**—

अम्ब त्र्यम्बकपक्ष्मलाक्षि भगवन्विश्वैकवीर स्मर
स्मर्तव्या जननान्तरेऽपि युवयोः कारुण्यलेशादहम् ।
अस्मिञ्जन्मनि तावदुन्मदसुरस्तम्बेरमाकृत्रिम-
क्रीडामन्दगतिः स सुन्दरवपुर्नो नेत्रमैत्रीं गतः ॥ ३६ ॥

एवं पुनः पुनरुदीर्य, विदीर्यमाणं
वज्राग्रभिन्नमिव सा हृदयं दधाना ।
मोहं गता कुचतटे नयनाम्बुलेशै-
रासूत्रितत्रिचतुरापरहारलेखा ॥ ३७ ॥

**विदूषकः**—हद्धी हद्धी पमादो । संकडे पडिदा महाणुभावा । तदो । (ग)

**राजा**—

अथ कथमपि संज्ञां प्राप्य दीर्घं श्वसन्ती
कुचपरिसरनृत्यत्तारहारावलीका ।

---

(क) अथ किमिति देवी दुर्मनायमानेव मया लक्षिता ।

(ख) ततः ।

(ग) हा धिक् हा धिक् प्रमादः । संकटे पतिता महानुभावा । ततः ।

विचकिलवनगुल्मे नूतनीभूतवल्ली-
वलयनिगलिता सा पाशबन्धे प्रवृत्ता ॥ ३८ ॥

**विदूषकः**—(हस्तमुद्यम्य ।) अब्बह्मण्णं अब्बह्मण्णम् । (क)

**राजा**—वैधेय, स्वप्नविधिरयम् ।

**विदूषकः**—तदो । (ख)

**राजा**—

विरम रमणि प्राणत्यागे धृता किमिति स्पृहा
ननु भगवतः कंदर्पस्य त्वमुच्छ्वसितान्तरम् ।
इति शशिमुखीमुक्त्वा यावद्विभर्मि पटाञ्चले
चटुलर[1]शना तूर्णं तावद्गता क्वचिदेव सा ॥ ३९ ॥

अनन्तरमिदं जातम् । अस्ति च स्वप्नदृष्टजनस्य संवादः । ते[2]न्न जाने किं भविष्यति ।

**विदूषकः**—कल्लाणपिसुणं एदं सव्वं भवदित्ति किं अण्णम् । अवि ण्णादं देवीए । (ग)

**राजा**—अथ किम् ।

**विदूषकः**—प[3]रुसक्खरं आलविअ ण किं पि अण्णं आअरिदम् । (घ)

**राजा**—

नो किंचित्परुषाक्षरं निगदितं नो दर्शितः संभ्रमः
कासावित्युपहासगर्भितरुषा प्रश्नोऽपि नाविष्कृतः ।
निःश्वासः परिवृत्त्य किं तु शनकैः श्यामीकृतप्रज्वल-
न्नानारत्नमयप्रदीपकिरणश्रेणिर्विमुक्तस्तया ॥ ४० ॥

---

(क) अब्रह्मण्यमब्रह्मण्यम् ।

(ख) ततः ।

(ग) कल्याणपिशुनमेतत्सर्वं भवतीति किमन्यत् । अपि ज्ञातं देव्या ।

(घ) परुषाक्षरमालप्य न किमप्यन्यदाचरितम् ।

---

१. 'रसना' इत्यादर्शपाठः. २. 'तं न' इत्यादर्शपाठः. ३. 'परुखसखरं' इत्यादर्शपाठः.

**विदूषकः**—एस जेव्व कराला गरलगण्ठी । अहवा तुज्झ किं जादम् । तुअं लुलुल्लरेहिं बोलेहिं पाअपडणेहिं पुणो पि अप्पवसं करेसि। अहं जेव्व एक्को णिब्भच्छिआमि । एदस्स दुट्ठबह्मणस्स एदं खु सव्वं विलसिदं त्ति । (क)

**राजा**—कथं न जातम् ।

न यस्मिन्दाक्षिण्यं परिणतमियत्त्वस्य विषये
　विकल्पाधिष्ठानं तदपि विहितं प्रेम सुदृशः ।
इतः शून्यं चेतः स्मरकितवसंचारचकितं
　न जानीमो धातुः किमधिकरणः सूत्रणविधिः ॥ ४१ ॥

(नेपथ्ये ।)

सुखाय कुसुमसमयसमारम्भो देवस्य । संप्रति हि

रक्ताशोकद्रुमाणां लसति किसलयश्रेणिरार्द्रापराध-
　प्रेयः शौण्डीर्यपीतद्राविडवरवधूचारुबिम्बाधरश्रीः ।
उन्मेषश्चम्पकानामजरठमरठीगण्डपालीविलासः
　कर्णाटीहास्यलेशान्विचकिलमुकुलस्फूर्तयो वार्तयन्ति ॥ ४२ ॥
कान्ते नूतनचूतमञ्जरिधनुर्दण्डेऽधुना संदध-
　त्कंदर्पः कलकण्ठपञ्चमरवब्रह्मास्त्रमव्याहतम् ।
दोर्युग्मं वलयीकरोति युगपत्कर्तुं त्रिलोकोपरि
　स्वामाज्ञां रतिवक्त्रपत्रशबलं मौर्वीकिणाङ्काङ्कितम् ॥ ४३ ॥

**विदूषकः**—(अन्यतः)

कावेरीणालिएरीतरलणनिउणा णम्मदाणम्मआरा
　कञ्चीए चुम्बणद्दा तुमुलिदमुरलालोलकल्लोलमाला ।

---

(क) एषैव कराला गरलग्रन्थिः । अथवा तव किं जातम् । त्वं मधुरैर्वचनैः पादपतनैः पुनरप्यात्मवशां करिष्यसि । अहमेवैको निर्भर्त्स्ये । एतस्य दुष्टब्राह्मणस्यैतत्खलु सर्वं विलसितमिति ।

---

१. 'विदूषकः' इत्यादर्शपुस्तके नास्ति.

एदे गोदावरीए लहरिपरिचिदा दिण्णसिप्पाकडप्पा
कंदप्पोद्दीवणेच्छागहिदविहरणा दाहिणा एन्ति वाआ ॥४४॥(क)

**राजा—**

क्वचिदविषये सा सारङ्गीतरङ्गितलोचना
हृदि कवचितः पञ्चेषुर्मे विकुञ्चितकार्मुकः।
अयमपि बत प्राप्तश्चूताङ्कुराकुलकोकिला-
कलरवजयोद्घोषः कालः किमत्र समीहितम् ॥ ४५ ॥

(सनिर्वेदोत्कण्ठम्।)

आवासः किलकिञ्चितस्य दयिता पार्श्वे विलासालसा
कर्णे कोकिलकामिनीकलरवः स्मेरो लतामण्डपः।
गोष्ठी सत्कविभिः समं कतिपयैर्मुग्धाः सुधांशोः कराः
केषांचित्सुखयन्ति चात्र हृदयं चैत्रे विचित्रोत्सवे ॥ ४६ ॥

संप्रति—

कुर्वन्ति कोकिलकलोपहतिं लतासु
रुन्धन्ति वासभवनेषु समीरमार्गान्।
किं तन्न यद्विरहिणीनिवहस्य सख्यः
सावज्ञमाकुलतया कलयन्त्यजस्रम् ॥ ४७ ॥

(विचिन्त्य।) तत्क्वायमात्मा विनोदयितव्यः।

**विदूषकः**—भो वअस्स, अहिणवमहुरसतरङ्गिदललिदलदालिङ्गिद-कुसुमहसिदतरुणतरुमण्डलं कुण्डलिदकोदण्डचण्डप्पहारपडुमअणसुहडप-

---

(क) कावेरीनालिकेरीतरलननिपुणा नर्मदानर्मकाराः
काञ्च्याश्चुम्बनाद्रीस्तुमुलितमुरलालोलकल्लोलमालाः।
एते गोदावर्या लहरिपरिचिता दत्तसिप्राकटप्राः
कंदर्पोद्दीपनेच्छागृहीतविहरणा दक्षिणा आगच्छन्ति वाताः ॥

ज्जलिज्जन्तसहआरङ्कुरसिलीमुहं रज्जन्तकण्ठकलअण्ठचारुपञ्चमस्सरमहुरिज्जन्तं मअणुज्जाणं पेक्खन्तो णिव्वुइं उव्वाहिस्सादि भवं । (क)

**राजा**—सहृदयो मे वयस्यः ।

यत्कोकिलाकलरवं कलयत्यनङ्ग-
श्चूताङ्कुरं धनुषि यद्विजयास्त्रहेतोः ।
यच्च स्मितं सुमनसां स समित्प्रपञ्चो
जीवातवे विरहपावकडम्बरस्य ॥ ४८ ॥

**विदूषकः**—भो, एत्थ कहिं पि भविस्सदि देव्ववसेण दंसणगोअरे सा तेल्लोक्कसुन्दरीति भणामि । (ख)

**राजा**—एवमस्तु । उपदिश पन्थानम् ।

**विदूषकः**—इदो सेवागदणरिन्दसहस्ससंकिण्णं विलाससंचिअतेल्लोक्कसुन्दरजणं अत्थाणङ्गणं परिहरिअ चउक्किआए खिडिक्किआदो रअणदुआरिआए णीसरीअ कहिं पि एदु भवं । (ग)

(इति परिक्रामतः ।)

**विदूषकः**—इदं तं कोइलपढिज्जन्तचारुपञ्चमाभिहाणमअणमन्तसंमोहनमढं संततट्ठाणं वसन्तसुहडस्स । ता पविसदु पिअवअस्सो । (घ)

(इति तथा कुरुतः ।)

---

(क) भो वयस्य, अभिनवमधुरसतरङ्गितललितलतालिङ्गितकुसुमहसिततरुणतरुमण्डलं कुण्डलितकोदण्डचण्डप्रहारपटुमदनसुभटतीक्ष्णीक्रियमाणसहकाराङ्कुरशिलीमुखं रज्यत्कण्ठकलकण्ठचारुपञ्चमस्वरमुखरीक्रियमाणं मदनोद्यानं पश्यन्निर्वृतिमुद्वक्ष्यति भवान् ।

(ख) भोः, अत्र कुत्रापि भविष्यति दैववशेन दर्शनगोचरे सा त्रैलोक्यसुन्दरीति भणामि ।

(ग) इतः सेवागतनरेन्द्रसहस्रसंकीर्णं विलाससंचितत्रैलोक्यसुन्दरजनमास्थानाङ्गणं परिहृत्य चतुष्किकायाः गवाक्षाद्रत्नद्वारिकाया निःसृत्य कुत्राप्येतु भवान् ।

(घ) इदं तत्कोकिलपठ्यमानचारुपञ्चमाभिधानमदनमन्त्रसंमोहनमठं(?) संततास्थानं वसन्तसुभटस्य । तत्प्रविशतु प्रियवयस्यः ।

**विदूषकः**—पिअवअस्स, पेक्ख।

लाडीतण्डवकेलिखिन्नचलणच्छाआलवं पल्लवं
कङ्केली पअडेदि पाडलितरू जादो पसूणञ्चिदो।
एदं कुङ्कुमसिक्ककीररमणीगण्डप्पहं चम्पकं
कम्पावेइ विओइणीओ बउलो फुल्लेहिँ सल्लेहिँ व ॥४९॥ (क)

(इति संस्कृतमाश्रित्य।)

कुर्वाणाः प्राणनाथे प्रणयकलिरुषं जर्जरां गुर्जरीणां
भिन्दानाः सान्द्रमानग्रहपटिमपदं मेदपाटाङ्गनानाम्।
उन्मीलन्मालवस्त्रीवदनपरिमलग्राहिणो हूणरामा-
कामारम्भश्रमाम्भःकणहरणरसोल्लासिनो वान्ति वाताः ॥५०॥

**राजा**—(सोपहासम्।) अहो वर्णनाक्रमः। (इति निःश्वस्य समन्तादवलोक्य च।)

लीलोद्याने चलकिसलयाः शाखिनः खेलल्लोला-
श्लिष्यद्भृङ्गावलिवलयिता भान्ति यावन्त एते।
कोपावेशाद्वलयितधनुर्बद्धगोधाङ्गुलित्र-
स्तावद्भ्योऽपि त्रिभुवनजयी धावतीवासमास्त्रः ॥ ५१ ॥

एहि। तस्यास्तरङ्गशालाया अभ्यन्तरे क्षणमुपविशावः।

(तथा कुरुतः।)

---

(क) प्रियवयस्य, पश्य।

लाटीताण्डवकेलिखिन्नचरणच्छायालवं पल्लवं
कङ्केलिः प्रकटयति पाटलितरुर्जातः प्रसूनाञ्चितः।
एतत्कुङ्कुमसिक्तकीररमणीगण्डप्रभं चम्पकं
कम्पयाति वियोगिनीर्बकुलः पुष्पैः शल्यैरिव ॥

---

१. आदर्शपुस्तकेऽस्मिन्मन्दाक्रान्तावृत्ते 'श्लिष्यद्भृङ्गावलीभिर्वलयितलतिका भान्ति यावन्त एते' इति द्वितीयः पादः स्रग्धरानिबद्धः शोधकेन स्थापितः. आदर्शपाठस्तु न ज्ञातुं शक्यते.

**विदूषकः**—(भित्तिमवलोक्य सचमत्कारम् ।) अए, का एसा पच्चाएसो उव्वसीपमुहाणं अच्छराणं सव्वङ्गलडहा आलिहिदा । (क)

**राजा**—(अवलोक्योत्थाय च ।)

एतत्तदेव सितदेवतरुप्रसून-
सौभाग्यमङ्कमनङ्गविलासवेश्म ।
जैत्रः स एव च विलोचनयोर्विलासः
सैवेन्दुसुन्दरमुखी लिखितेयमास्ते ॥ ९२ ॥

अपि च ।

सैवोन्मज्जत्कनककलशप्रेक्षणीयस्तनश्री-
र्मूर्तिर्लोकत्रयविजयिनी राजधानी स्मरस्य ।
एतच्चक्षुस्तदपि विदलत्केतकीपत्रमित्रं
छाया सेयं नियतमधरे विद्रुमोत्सेकमुद्रा ॥ ९३ ॥

**विदूषकः**—भो, एसा चित्ते केण विलिहिदा । (ख)

**राजा**—मम तावन्मकरकेतुना । इह तु न जाने ।

**विदूषकः**—भो, भणामि किं पि जइ मे वअणं करेसि । (ग)

**राजा**—किं न कथयसि ।

**विदूषकः**—ओसरीयदु इमादो तरङ्गसालादो तुरिदम् । कदापि देवी एत्थ आअच्छेदि । (घ)

**राजा**—कुपिता कथमागच्छति सौभाग्याभिमानखण्डनानुप्रवेशात् ।

---

(क) अये, कैषा प्रत्यादेश उर्वशीप्रमुखाणामप्सरसां सर्वाङ्गलटभा-लिखिता ।

(ख) भोः, एषा चित्रे केन विलिखिता ।

(ग) भोः, भणामि किमपि यदि मे वचनं करोषि ।

(घ) अपास्रियतामस्यास्तरङ्गशालायास्त्वरितम् । कदापि देव्यत्रागच्छाति ।

(ततः प्रविशति हारलतया सह देवी ।)

**देवी**—हारलदे, ता कआपराधं पेक्खिअ एह्णिं सअं अणुसरन्ती अज्जउत्तेण केरिसी भणिआमि । (क)

**हारलता**—भट्टिणि, महानुभाव त्ति किं अण्णम् । (ख)

**देवी**—जदि दिट्ठिआ परुसत्तणमुव्वहामि, अज्जउत्तो आअसीअदि । अणुचिदकारिणी भवामि । (ग)

**हारलता**—देवीए विणा अण्णो को एदं मन्तेदिं । विणा मअङ्कलेहं कुदो जोह्णाए बिसरो । (घ)

**देवी**—अवि जाणासि किं उद्दिसिअ अज्जउत्तेण सिविणए पलविदम् । (ङ)

**हारलता**—तुज्झवसेक्कजीविदस्स णत्थि अण्णा वाणी । एवंविधा जेव्व सिविणआ [अ] विप्पलम्भका होन्ति । ण किं पि आसङ्कणिज्जम् । (च)

(इति परिक्रामतः ।)

**देवी**—कण्णसुन्दरी अज्जउत्तस्स दंसणगोअरं गदा । (छ)

**हारलता**—रविकिरणाणं वि अगम्मे त्ति कधं एदम् । (पुरोऽवलोक्य ।) एसो तरङ्गसालाए भट्टा वट्टदि । ता उपसप्पीअदि । (ज)

---

(क) हारलते, तत्कृतापराधं प्रेक्ष्याधुना स्वयमनुसरन्त्यार्यपुत्रेण कीदृशी भण्ये ।

(ख) भट्टिनि, महानुभावेति किमन्यत् ।

(ग) यदि दिष्ट्या परुषत्वमुद्वहामि, आर्यपुत्र आयास्यते । अनुचितकारिणी भवामि ।

(घ) देव्या विनान्यः क एतन्मन्त्रयते । विना मृगाङ्कलेखां कुतो ज्योत्स्नाया विसरः ।

(ङ) अपि जानासि किमुद्दिश्यार्यपुत्रेण स्वप्ने प्रलपितम् ।

(च) त्वद्वशैकजीवितस्य नास्त्यन्या वाणी । एवंविधा एव स्वप्ना [च] विप्रलम्भका भवन्ति । न किमप्याशङ्कनीयम् ।

(छ) कर्णसुन्दर्यार्यपुत्रस्य दर्शनगोचरं गता ।

(ज) रविकिरणानामप्यगम्येति कथमेतत् । एष तरङ्गशालायां भर्ता वर्तते । तदुपसर्प्यते ।

**देवी**—किं पि सुणन्तीओ उपसप्पह्म। (क)

**राजा**—(बद्धाञ्जलिः।)

आयासः किमयं वृथैव धनुषो देव स्मर स्वीकृत-
स्त्वत्पत्त्रिव्ययपात्रमत्र कतमः कात्यायनीकामुकः।
एतां लोकविलक्षणेन विधिना केनापि येनासिषी(?)
यायां(?) चित्रगतामपि प्रियतमां संजीव्य संप्रापय॥ १४॥

**देवी**—कस्स कदे अज्जउत्तो एवं मन्तेदि। (ख)

**हारलता**—कस्स अण्णस्स। भोदिं जेव्व कुविदं जाणिअ चित्तपडिबिम्बेण अप्पाणं विणोदेदि भट्टा। ता उपसप्पीअदु। (ग)

(तथा विधत्तः।)

**देवी**—जेदु अज्जउत्तो। (घ)

**हारलता**—जेदु जेदु भट्टा। (ङ)

**देवी**—(सविनयम्।) मए एव्व तदा किं पि खलिदं ति अज्जउत्तेण ण अण्णधा भणिदव्वम्। (च)

**राजा**—

त्रिजगति भवती परं ममैका दिशति मुदं कुमुदस्य कौमुदीव।
प्रभुरसि कुरुषे रुषं कदाचिद्व्रजसि कदापि यथारुचि प्रसादम्॥१५॥

**विदूषकः**—महाणुभावा देवी जा एव्वं पतिच्छत्तणं धारेदि। (छ)

---

(क) किमपि शृण्वत्य उपसर्पावः।

(ख) कस्य कृते आर्यपुत्र एवं मन्त्रयते।

(ग) कस्यान्यस्य। भवतीमेव कुपितां ज्ञात्वा चित्रप्रतिबिम्बेनात्मानं विनोदयति भर्ता। तदुपसर्प्यताम्।

(घ) जयतु आर्यपुत्रः।

(ङ) जयतु जयतु भर्ता।

(च) मयैव तदा किमपि स्खलितमित्यार्यपुत्रेण नान्यथा भणितव्यम्।

(छ) महानुभावा देवी यैवं पत्यनुकूलत्वं धारयति।

**देवी**—(चित्रमवलोक्यापवार्य च।) हारलदे, पेक्ख । कण्णसुन्दारिं जेव्व आलिहिअ अप्पाणअं विणोदेदि । तुमं तु मम ण पत्तिज्जासि । अहं जेव्व अविमिस्सकारिणित्ति किं भणीअदि । (क)

**हारलता**—तथैव ।

**देवी**—(प्रकाशम् ।) अज्जउत्त, इदं णअणविणोदणं मए आगदुअ विनिवट्टिदं जेव्व । संपदं पेक्खिदव्वम् । (इति सावेगमुत्तिष्ठति ।) (ख)

**राजा**—अलमन्यथा संभावितेन । (इति वारयति ।)

(देव्याक्षिप्य हारलतया सह निष्क्रान्ता ।)

**राजा**—एहि तावत् । देवीप्रसादनाय प्रयतावहे ।

(इति निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

---

## द्वितीयोऽङ्कः ।

(ततः प्रविशति सुप्तोत्थितो विदूषकः ।)

**विदूषकः**—(अङ्गुलीभ्यामक्षिणी मृजन् ।) अज्ज पिअवअस्सेण दिग्घरोसं देविं पसादिअ मे किं पि समादिट्ठम् । तदादिट्ठत्थदूणो मञ्जिट्ठारुणेण अरुणसारहिमण्डलेण सान्दअन्तेण रआणिं जगाविओह्मि । ण सक्कणोमि सअणिज्जादो णिद्दाए बलामोडिमीलिज्जन्तादिट्ठी उट्ठिदुम् । पिअवअस्सचलणवडणसंतुट्ठदेवीपसादलद्धेहिं मोदएहिं पुट्ठभुइट्ठं चिट्ठदि मे उअरम् । णिहुअं अववरअअन्तरे सुवामि । (स्मृतिमभिनीय ।) अहवा कहं सुवीअदि । जं पिअवअस्सेण तीए विज्जाहरकण्णआए पउत्ति जाणिदुं किं सा वि वअस्ससाणुराआ ण वेत्ति आणत्तह्मि । ता जाव गदुअ काए वि अन्तेउरविलासिणीए सआसादो अण्णापदेसेण जाणिस्सम् । कहं उवलतरङ्गा तरङ्गवदित्तिणामहेआ इदो जेव्व आअच्छदि । भोदु । एदाए

---

(क) हारलते, पश्य । कर्णसुन्दरीमेवालिख्यात्मानं विनोदयति । त्वं तु मम न प्रत्ययसे । अहमेवाविमृश्यकारिणीति किं भण्यते ।

(ख) आर्यपुत्र, एतन्नयनविनोदनं मयागत्य विनिवर्तितमेव । सांप्रतं प्रेक्षितव्यम् ।

जेव्व मुहादो जाणिस्सम् । (पुनरवलोक्य ।) मं पेक्खिअ एदाए किं पि अपच्छादिदम् । (निरूप्य सशिरःकम्पम् ।) अत्थि एत्थ वडे जक्खो । भोदु । संभाविअ जाणामि[१] । (इति तथा करोति ।) (क)

(ततः प्रविशति तरङ्गवती ।)

**तरङ्गवती**—(अग्रतोऽवलोक्य ।) एस दुट्ठवडू पेक्खिस्सादि एदं सिसिरोवआरम् । ता अण्णदो गच्छामि । (इति तथा गच्छति ।) (ख)

**विदूषकः**—(सत्वरमुपसृत्य ।) भोदि, कीस अण्णदो गच्छीअदि । अहं तुह ससिलेहाए विअ मग्गं पलोएमि । तुमं राहुं व मं पलिहलसि । किं ण्णेदम् । (ग)

**तरङ्गवती**—अज्ज, कज्जन्तरपज्जाउलहिअअत्तेण ण लक्खिदोसि । पसीददु भवं । (घ)

---

(क) अद्य प्रियवयस्येन दीर्घरोषां देवीं प्रसाद्य मे किमपि समादिष्टम् । तदादिष्टार्थदूनो मञ्जिष्ठारुणेनारुणसारथिमण्डलेन सान्द्रायमाणेन रजनिं जागरितोऽस्मि । न शक्नोमि शयनीयान्निद्रया हठान्मीलद्दृष्टिरुत्थातुम् । प्रियवयस्यचरणपतनसंतुष्टदेवीप्रसादलब्धैर्मोदकैः पुष्टभूयिष्ठं तिष्ठति मे उदरम् । निभृतमपवरकान्तरे स्वपिमि । अथवा कथं सुप्यते । यत्प्रियवयस्येन तस्या विद्याधरकन्यकायाः प्रवृत्तिं ज्ञातुं किं सापि वयस्यसानुरागा न वेत्याज्ञप्तोऽस्मि । तद्यावद्गत्वा कस्या अप्यन्तःपुरविलासिन्याः सकाशादन्यापदेशेन ज्ञास्यामि । कथमुत्पलतरङ्गा तरङ्गवतीतिनामधेया इत एवागच्छति । भवतु । अस्या एव मुखाज्ज्ञास्यामि । मां प्रेक्ष्यैतया किमप्यपच्छादितम् । अस्त्यत्र वटे यक्षः । भवतु । संभाव्य जानामि ।

(ख) एष दुष्टबटुः प्रेक्षिष्यत एतच्छिशिरोपचारम् । तदन्यतो गच्छामि ।

(ग) भवति, कुतोऽन्यतो गम्यते । अहं तव शशिलेखाया इव मार्गं प्रलोकयामि । त्वं राहुमिव मां परिहरसि । किं न्वेतत् ।

(घ) आर्य, कार्यान्तरपर्याकुलहृदयत्वेन न लक्षितोऽसि । प्रसीदतु भवान् ।

---

१. एतावत्पर्यन्तमस्मिन्विदूषकवाक्येऽप्यत्यस्फुटं प्राकृतमस्ति.

**विदूषकः**—अह केण वावारेण तत्तभोदी कण्णसुन्दरी वट्टदि । (क)

**तरङ्गवती**—णिअवावारे व्व सा पिअसही । (ख)

**विदूषकः**—को उण णिअवावारो । (ग)

**तरङ्गवती**—देवीए सआसे सिक्खदि लक्खणाणामणुसीलिणानि, अमअणाओ बहुविहाओ लीलाओ वि । (घ)

**विदूषकः**—(विहस्य ।) अवरो को वि वावारो त्ति सुणीअदि । (ङ)

**तरङ्गवती**—(साशङ्कम् ।) क इत्ति णिवेदेदु भवं । (च)

**विदूषकः**—जत्थ एदाणं विणिओओ । (इत्यस्या अंशुकान्तरात्कदलीपत्राणि मृणालिकाश्च लीलया गृह्णाति ।) (छ)

**तरङ्गिका**—अज्ज, ण किं पि सङ्किदव्वम् । एदेहिं मम किं पि कज्जं अत्थि । (ज)

**विदूषकः**—अविस्सासिणि, अलं अवलावेण । णणु पिअवअस्सेण पउत्तिं जाणिदुं पेसिदोह्मि ।·ता उज्जुअं कहेसु । (झ)

**तरङ्गवती**—अज्ज, रक्खिदव्वं रहस्सम् । (ञ)

---

(क) अथ केन व्यापारेण तत्रभवती कर्णसुन्दरी वर्तते ।

(ख) निजव्यापारैव सा प्रियसखी ।

(ग) कः पुनर्निजव्यापारः ।

(घ) देव्याः सकाशे शिक्षते लक्षणानामनुशीलनानि, अमदना बहुविधा लीला अपि ।

(ङ) अपरः कोऽपि व्यापार इति श्रूयते ।

(च) क इति निवेदयतु भवान् ।

(छ) यत्रैतेषां विनियोगः ।

(ज) आर्य, न किमपि शङ्कितव्यम् । एतैर्मम किमपि कार्यमस्ति ।

(झ) अविश्वासिनि, अलमपलापेन । ननु प्रियवयस्येन प्रवृत्तिं ज्ञातुं प्रेषितोऽस्मि । तदृजुकं कथय ।

(ञ) आर्य, रक्षितव्यं रहस्यम् ।

(इति संस्कृतमाश्रित्य ।)

यत्तारारमणोऽपि निर्वृतिपदं नास्याश्चलच्चक्षुषो-
　यद्गात्रं शतपत्रपत्रशयनेऽप्युत्फालमुद्वेल्लति ।
शीतं यच्च कुचस्थलीमलयजं धूलीकदम्बायते
　किं वान्यत्तदनङ्गमङ्गलमयी भङ्गी कुरङ्गीदृशः ॥ १ ॥

(इत्युक्त्वापसरति ।)

**विदूषकः**—(सपरितोषम् ।) भोदि, सणिओअं असुण्णं करेसु । अहं पि पिअवअस्सं वड्ढावेमि । (क)

(इति निष्क्रान्तौ ।)

प्रवेशकः ।

---

(ततः प्रविशति सोत्कण्ठो राजा विदूषकश्च ।)

**राजा**—

धूमश्यामलितेव तापनवशाच्चामीकरस्य च्छवि-
　श्चन्द्रो मुक्त इव श्रिया किसलया निर्धौतरागा इव ।
निःसारेव धनुर्लता रतिपतेः सुप्तेव विश्वप्रभा
　तस्याः किं च पुरो विभान्ति कदलीस्तम्भाः सदम्भा इव ॥ २ ॥

अपि च ।

मुग्धाक्ष्याः कति नेन्दवः समुदिता वक्त्रे स्फुरत्कान्तयो
　विश्रान्तिः कियतां न लोचनयुगे नीलाम्बुजानां श्रियः ।
निष्पन्नः कियता न विद्रुमरुचां सारेण बिम्बाधरः
　पीताश्चारुभिरङ्गकैश्च कति न स्निग्धा मधूकत्विषः ॥ ३ ॥

(अनुसंधाय ।)

स्फुरल्लीलामालं किमपि रसयोगान्मृगदृशः
　क्षणं दीर्घापाङ्गप्रणयि यदभून्नेत्रयुगलम् ।
अहो हृज्जन्मान्तः स्फुरति बत मे शल्यमिव त-
　द्यदावेगे मोहः परमयमविश्रामविषयः ॥ ४ ॥

---

(क) भवति, स्वनियोगमशून्यं कुरु । अहमपि प्रियवयस्यं वर्धयामि ।

अहो, किमपि कमनीये वयसि वर्तते सुमध्यमा । तथा हि ।

आभोगः कृत एव किं तु न गतिस्त्यक्ता कुचाभ्यां द्वयी
भ्रूलास्यैरवकीर्णमेव मिलितं नो किं तु सम्यग्दृशोः ।
लीलाभिः परिरब्धमेव गमनं तन्व्या नितम्बोद्गम-
प्राग्भारेण न किं तु मन्थरपदन्यासस्तदा सूत्रितः ॥ ५ ॥

सखे, अपि सत्यं तरङ्गवत्या वचः ।

**विदूषकः**—एदे क्खु मअणमअतिह्णाविप्पलद्धा कामिणो उम्मत्ता मह पडिहान्ति । जं पच्चक्खे वि विप्पदिवत्तिं कुणन्ति । जदि सव्वधा ण पत्तिज्जसि ता अकरणिज्जं पि करोमि । बह्मणीए चलणेहिं सवामि । (क)

**राजा**—हृदय, दिष्ट्या वर्धसे ।

यस्यां रक्तं किल कलयसि क्रान्तिमत्यर्थमेवं
नूनं वृन्तादिव सरसिजं मज्जदन्तर्हिमाम्भः ।
कृत्वा सद्यः श्रवणयुगलं लोलताटङ्करिक्तं
सापि स्वैरं विशिखखुरली कल्पिता मन्मथेन ॥ ६ ॥

('स्फुरल्लीला-' इत्यादि पठति ।)

**विदूषकः**—(विहस्य ।) भो, किं पि पुच्छामि । (ख)

**राजा**—किं न पृच्छसि ।

**विदूषकः**—सिणिद्धमुद्धपहाउडणमणुल्लसणमणोहरं हरसुप्फुल्लकवोलमण्डलं संमुहपलोइदं अवगणिअ कण्णन्तिकगामिणिं वङ्कं जेव्व दिट्ठिं कुविदाणं विअ कामिणीणं कामिणो कीस पसंसन्ति । (ग)

---

(क) एते खलु मदनमृगतृष्णाविप्रलब्धाः कामिन उन्मत्ता मम प्रतिभान्ति । यत्प्रत्यक्षेऽपि विप्रतिपत्तिं कुर्वन्ति । यदि सर्वथा न प्रत्ययसे तदकरणीयमपि करोमि । ब्राह्मण्याश्चरणाभ्यां शपामि ।

(ख) भोः, किमपि पृच्छामि ।

(ग) स्निग्धमुग्ध··········मनोहरं हर्षोत्फुल्लकपोलमण्डलं संमुखप्रलोकितमवगणय्य कर्णान्तिकगामिनीं वक्रामेव दृष्टिं कुपितानामिव कामिनीनां कामिनः कुतः प्रशंसन्ति ।

**राजा**—अविदग्धोऽसि । पश्य ।

दीर्घापाङ्गतरङ्गितेन विगलन्नीरं विलोलेक्षणा
　　यत्पश्यन्त्यवतंसनालनलिनच्छायामुषा चक्षुषा ।
तुल्यं वाधिकमन्यदेव मदनस्यास्त्रं त्रिलोकीजयि-
　　व्यापारोऽस्य न यत्र तत्र किमपि प्रेम्णो हि तल्लक्षणम् ॥७॥

**विदूषकः**—भो, अण्णं भणामि । जाए कारणादो महन्तेण दुःखेण सअलं जेव्व जामिणिं देवी अब्भत्थिदा सा किं त्ति पुणो वि अणुसंधीअदि । जदि तीए कज्जं ता कि त्ति देवी पीडन्ती अणुणीअदि । अह देवीए कज्जं ता कि त्ति सा अणुसंधीअदि त्ति । (क)

**राजा**—अयि सखे, शृणु ।

जनिमुपगता विश्वप्रख्यातनाम्नि कुले पुनः
　　प्रणयविशदा देवी मोक्तुं मया न हि पार्यते ।
कथमवितथश्लाघ्यैरङ्गैरसावपि मुच्यतां
　　रचितकवचः पक्षे यस्याः स्थितः कुसुमायुधः ॥ ८ ॥

तत्कथमयं विरहदाहो मया गमयितव्यः ।

**विदूषकः**—सव्वधा पिअवअस्सो असुहिदो त्ति करुणं उप्पाइअ सत्थिवाअणपुव्वअं अणुणीअ सा समप्पीअदु त्ति देविं पुच्छेमि । (ख)

**राजा**—मूर्ख,

　　नैवं कथंचन कृतानुनयापि देवी
　　　　मन्येत मन्युकलुषा मयि केवलं स्यात् ।

---

(क) भोः, अन्यद्भणामि । यस्याः कारणान्महता दुःखेन सकलामेव यामिनीं देव्यभ्यर्थिता सा किमिति पुनरप्यनुसंधीयते । यदि तया कार्यं तत्किमिति देवी पीड्यमानानुनीयते । अथ देव्या कार्यं तत्किमिति सानुसंधीयत इति ।

(ख) सर्वथा प्रियवयस्योऽसुखित इति करुणामुत्पाद्य स्वस्तिवायनपूर्वकमनुनीय सा समर्प्यतामिति देवीं पृच्छामि ।

स्थातुं सुशक्यमनले पतितुं कृपाण-
धारासु वा न तु जनं दयितं विमोक्तुम् ॥ ९ ॥

तत्कायमात्मा विनोदयितव्यः ।

**विदूषकः**—भो, तत्थ जेव्व उज्जाणे गच्छीअदु । तत्थ तरङ्गसाल-ब्भन्तरे चित्तगदं पलोअन्तो सुहं पाविहिसि । (क)

**राजा**—सखे, युक्तमुक्तम् । तदुपदिश पन्थानम् ।

**विदूषकः**—इदो इदो । (इति परिक्रामति ।) एसा तरङ्गसाला अलंकरीअदु । (ख)

(उभौ तथा कुरुतः ।)

**विदूषकः**—(सर्वतोऽवलोक्य ।) भो, कहिं सा सामलङ्गी अणङ्गदेवदा आलिहिदा । अह वा अहं चम्मचक्खू ण पेक्खामि । (ग)

**राजा**—(निःश्वस्य ।) कथमुत्प्रोञ्छितं तदनङ्गशास्त्रम् । अहो निर्दया देवी ।

सिद्धक्षेत्रमिवाङ्गनाकुलगुरोर्लावण्यसारोच्चय-
श्रीसंकेत इव त्रिलोकनयनप्रीतेरिवैको निधिः ।
धातुश्चन्द्रसहस्रसंग्रह इव द्रष्टुं तदेणीदृशो
वक्त्रं चित्रनिविष्टमप्यसुलभं कोऽयं विरुद्धो विधिः ॥ १० ॥

(विचिन्त्य ।)

विद्वांस्ततो लिखितुमिन्दुमुखीं विदग्धः
कोऽन्यो विना कुसुमचापमनल्पशिल्पः ।
नूनं तदा तदनुबन्धिभिरिन्द्रजाल-
मुन्मीलितं किमपि मे पुरतो विकल्पैः ॥ ११ ॥

(इति शोकं नाटयति ।)

---

(क) भोः, तत्रैवोद्याने गम्यताम् । तत्र तरङ्गशालाभ्यन्तरे चित्रगतां प्रलोकयन्सुखं प्राप्स्यसि ।

(ख) इत इतः । एषा तरङ्गशालालंक्रियताम् ।

(ग) भोः, कुत्र सा श्यामलाङ्ग्यनङ्गदेवतालिखिता । अथ वाहं चर्मचक्षुर्न पश्यामि ।

**विदूषकः**—भो, किं एत्थ सुण्णदेउले। एहि। लीलावणब्भन्तरे परिब्भमामो। कदा वि कथं वि कुसुमाओ उच्चिणन्ती लदाओ सिञ्चन्ती वा सरसीजलम्मि ह्लाणविधिं करन्ती वा सा हुविस्सदि। (क)

**राजा**—कुत एवंविधा भाग्यसंपदः। तथापि पश्चात्तापव्यपनयनाय तदपि विधीयताम्।

(इति तथा कुरुतः।)

**विदूषकः**—(अग्रतो विलोक्य।) पेक्ख केलिकमलिणीसणुम्मि।

विच्छोडन्तो णिअमुहगदं चक्कवाआण चक्कं
देन्तो णिद्दारसमसमये सव्वदो पङ्कआणम्।

(अग्रतोऽवलोक्य।)

तारं तीरप्फुरिदकिरणो लोअणानन्दवल्ली-
कन्दो चन्दो रचअदि जले मज्जणुम्मज्जणाइं॥ १२॥ (ख)

**राजा**—(विलोक्य।)

परं मैत्रीपात्रं त्रिभुवनजिगीषोः स्मृतिभुवः
स एवायं यूनामविनयकथोन्मुद्रणगुरुः।

(विचिन्त्य।)

गतः किं वा दैवाद्धत बत कलङ्कोऽस्य नियतं
सुधामुग्धैर्धौतः कमलसरसीवीचिनिचयैः॥ १३॥

(सोत्प्रेक्षम्।)

तस्याः कुरङ्गकदृशो युगपन्मुखेन
दोषाकरश्च कमलानि च निर्जितानि।

---

(क) भोः, किमत्र शून्यदेवकुले। एहि। लीलावनाभ्यन्तरे परिभ्रमावः। कदापि कथमपि कुसुमान्युच्चिन्वती लताः सिञ्चन्ती वा सरसीजले स्नानविधिं कुर्वती वा सा भविष्यति।

(ख) पश्य केलिकमालिनी······।

वियोजयन्निजमुखगतं चक्रवाकाणां चक्रं
ददन्निद्रारसमसमये सर्वतः पङ्कजानाम्।
तारं तीरस्फुरितकिरणो लोचनानन्दवल्ली-
कन्दश्चन्द्रो रचयति जले मज्जनोन्मज्जनानि॥

एतानि शाश्वतिकमप्यपहाय वैरं
स्वैरं तदत्र रचयन्ति विधेयचिन्ताम् ॥ १४ ॥

**विदूषकः—**

रोहिणिवअणालिङ्गणणिब्भरसंकन्तपरिमलुग्गारम् ।
ण मुअन्ति कुमुअबन्धवबिम्बं परिलम्बिआ भमरा ॥ १५ ॥ (क)

**राजा—**(निपुणं निरूप्य । सहर्षम् ।)

सखे नायं खेलंस्तिलकयति चन्द्रः कुमुदिनी-
मदः कंदर्पाज्ञास्फुरणगुरुवक्त्रं मृगदृशः ।
कुलं रोलम्बानामिदमपि न लग्नं परिमला-
दयं वेणीदण्डः शिखिन इव बर्हस्तरलितः ॥ १६ ॥

अपि च ।

आभात्यमर्त्यतरुपत्रसगोत्रपाणिः
सेयं मृगाङ्कवदना मदनास्त्रमत्र ।
हेतोः कुतोऽपि कमला कमलान्तराला-
न्निर्गत्य संयमवती पयसि स्थितेव ॥ १७ ॥

**विदूषकः—**(सकौतुकम् ।)

ण वरकबरी गोरङ्गीए तरङ्गिदविब्भमा
भमरणिवहो आमोदाणं ससिम्मि ण संगदो ।
अवि कमलिनीसंकन्तेणं विलासहरेण सा
कणअकमलुक्किण्णा जादा मुहेण जलन्तरे ॥ १८ ॥ (ख)

---

(क) रोहिणीवदनालिङ्गननिर्भरसंक्रान्तपरिमलोद्गारम् ।
न मुञ्चन्ति कुमुदबान्धवबिम्बं परिलम्बिता भ्रमराः ॥

(ख) न वरकबरी गौराङ्ग्यास्तरङ्गितविभ्रमा
भ्रमरनिवह आमोदेन शशिनि न संगतः ।
अपि कमलिनीसंक्रान्तेन विलासधरेण सा
कनककमलोत्कीर्णा जाता मुखेन जलान्तरे ॥

**राजा—**

पुष्पेषोरभिषेकयोग्यमथ वा भर्गाग्निमग्नात्मनः
प्रत्युज्जीवनमेतदम्बुजसरः कम्बुप्रसन्नच्छवि ।
यत्त्वाम्रेडितशीतरश्मिकिरणस्यन्दोपमेनामुना
लावण्यामृतनिर्झरेण सुतनोर्यत्पात्रतां नीयते ॥ १९ ॥

अपि च ।

आश्चर्यं फलितं सरोरुहवने स्थित्वा चिरेण श्रियः
कान्तिः कान्तिसुधाद्रवेण सुतनोर्याता यदत्राधुना ।
सान्द्रप्रेमवशीकृतस्य नियतं कौमोदकीलक्ष्मणः
साप्यङ्कं गिरिजेव मन्मथरिपोः कामास्त्रमुत्स्रक्ष्यति ॥ २० ॥

**विदूषकः**—वणाणिलवेल्लिदविद्दुमकिसलअसरिच्छपप्फुरिदाहरोट्ठी अङ्गुलिविवत्तणमणोहरकरपल्लवा णासग्गलग्गअविसट्ठकन्दोट्टसलोणलोअणा जादा । (क)

**राजा—**

स्फुरति यदयं दन्तज्योत्स्नाविलासधरोऽधरः
करकिसलियौ मुद्रायोगाद्यदुच्चलिताङ्गुली ।
मुकुलनविधिर्यन्नीलाब्जद्विषोरपि चक्षुषो-
स्तदियमबला ध्यायत्यन्तः किमप्यधिदैवतम् ॥ २१ ॥

**विदूषकः**—(सकौतुकम् ।) भो, कीस एसा सुण्णं पुणो पुणो पाणिं णीरमज्झादो आअड्ढदि । (ख)

**राजा**—(दृष्ट्वा ।)

सुतनुरनवलोकयन्त्युपान्ते स्थितमपि काञ्चनकुम्भमम्बुपूर्णम् ।
क्वचिदपि गतमानसा करेण स्पृशति कुचप्रतिबिम्बमम्बुमध्ये ॥ २२ ॥

---

(क) वनानिलवेल्लितविद्रुमकिसलयसदृक्षप्रस्फुरिताधरोष्ठी अङ्गुलिविवर्तनमनोहरकरपल्लवा नासाग्रलग्नाविस्पष्टनीलोत्पलसलावण्यलोचना जाता ।

(ख) भोः, कस्मादेषा शून्यं पुनः पुनः पाणिं नीरमध्यादाकर्षति ।

(सस्पृहम् ।)

ताम्बूलावरणोज्झिते विकसितं रागेण बिम्बाधरे
मज्जत्कज्जलकालिकेन कलिता कापि च्छविश्चक्षुषा ।
श्रीरन्यैव निरङ्गरागसुभगेऽप्यङ्गे कुरङ्गीदृशो
विश्राम्यत्वधुना धनुर्विजयते कं नाम नैव स्मरः ॥ २३ ॥

**विदूषकः**—(विलोक्य ।) कहं एसा णिव्वत्तिदपव्वदीचरणसुस्सूसा इमादो कमलसरादो णिग्गदा रहसि सहीए सह लदागुम्मन्तरे पविट्ठा।(क)

**राजा**—

धूपांशुकेन शनकैः परिमृज्यमान-
वेणीगुणा प्रणयपूर्वमुपेत्य सख्या ।
मध्ये मधुद्रुमवनं वनदेवतेव
तन्वी विवक्षुरिव किंचिदिहोपविष्टा ॥ २४ ॥

(सहर्षम् ।) सखे, सुव्यक्तानि विरहचिह्नानि । तथा हि ।

दग्धासन्नलतावलीकिसलयः श्वासानिलानां चयो
बाष्पाम्भःस्रुतिरालवालकलनायोग्या तरूणामधः ।
तापो निर्मृदिताब्जिनीदलचयः कोऽप्यङ्गकानां गुरु-
र्दूर्वाकाण्डविडम्बिपाण्डिमघनं किं चाननं सुभ्रुवः ॥ २५ ॥

**विदूषकः**—सुलक्खिदं पिअवअस्सेण ।

[1]णीसासाहिणवप्पहारवलिदा कामस्स णूणं सरा
........................................... । (ख)

---

(क) कथमेषा निर्वर्तितपार्वतीचरणशुश्रूषास्मात्कमलसरसो निर्गता रहसि सख्या सह लतागुल्मान्तरे प्रविष्टा ।

(ख) सुलक्षितं प्रियवयस्येन ।

निःश्वासाभिनवप्रहारवलिता कामस्य नूनं सरा
........................................... ।

---

१. आदर्शपुस्तकेऽस्य श्लोकस्य पादमात्रमेवास्ति.

.........................................................

.........................................................॥ २६ ॥

**राजा**—सखे, अस्यैव लतागहनस्य पश्चात्स्थित्वा शृणुवस्तावदस्या विश्रम्भभाषितानि ।

(इति तथा कुरुतः ।)

(ततः प्रविशति यथानिर्दिष्टा नायिका सखी च ।)

**सखी**—किं एव्वं रोदीअदि । एसा भअवदी भवाणी पणदजणवच्छला णिच्चिअं तुह इच्छं पूरइस्सदि । (क)

**नायिका**—

को जाणादि कदा हुविस्सदि फलं चन्दद्धचूडामणि-
　प्पाणेसाचलणप्पसाद्तरुणो भत्तीअ सित्तस्स वि[1] ।
मुज्झन्ती मअणाणलेन बहलं साहं हदासा पुणो
　दाणिं जेव्व ताहिं चरामि परमं जं जं अवत्थन्तरम् ॥ २७ ॥

अवि अ ।

आसण्णो मअलञ्छणो ण वअणो दुद्धेण धोएव्व सा
　दिट्ठी सामलगोरमुद्धलडहं तं तस्स रूवं पडु ।
झाणे झत्ति जधा परिप्फुरादि मे कच्चाइणीणो तधा
　णो जाणे जादि जीवइस्सादि उमा कण्णा विपण्णेत्ति माम् ॥२८॥(ख)

---

(क) किमेवं रुद्यते । एषा भगवती भवानी प्रणतजनवत्सला निश्चितं तवेच्छां पूरयिष्यति ।

(ख) को जानाति कदा भविष्यति फलं चन्द्रार्धचूडामणि-
　प्राणेशाचरणप्रसादतरोर्भक्त्या सिक्तस्यापि ।
मुह्यन्ती मदनानलेन बहुलं साहं हताशा पुन-
　रिदानीमेव तत्र चरामि परमं यद्यदवस्थान्तरम् ॥

अपि च ।

आसन्नो मृगलाञ्छनो न वदनं दुग्धेन धौतेव सा
　दृष्टिः श्यामलगौरमुग्धलटभं तत्तस्य रूपं पटु ।

---

१. 'वा' इत्यादर्शपुस्तकपाठः.

**सखी**—णं तस्सिं पि संणद्धो मअरद्धओ त्ति किं त्ति उत्तमीअदि । (क)

**नायिका**—सहि, अलं आसासणसीलदाए । (ख)

**सखी**—णं जो सो तस्स महाभाअस्स कदे पच्छावइदुमाढत्तो सिलोओ ण किं विरइअदि । (ग)

**नायिका**—तुमं जेव्व सक्का सिलोअजुअलं करेसु । मह मम्महरससंकप्पविकप्पेहिं अन्तरिज्जदि पणिधाणदिट्ठी । (घ)

**सखी**—(नातिचिरात्स्थित्वा ।) सहि, अवधारेसु । (संस्कृतमाश्रित्य ।)(ङ)

नीरागा मृगलाञ्छने मुखमपि स्वं नेक्षते दर्पणे
　खिन्ना कोकिलकूजितादपि गिरं नोन्मुद्रयत्यात्मनः ।
चित्रं दुःसहदाहदायिनि धृतद्वेषापि पुष्पायुधे
　मुग्धाक्षी सुभग त्वयि प्रतिपदं प्रेमाधिकं पुष्यति ॥ २९ ॥

अपि च ।

प्रोतेति प्रतिबिम्बितेति घटितेत्यास्थानशालामणि-
　स्तम्भन्यस्तभरामपि प्रियसखीवर्गो न जानाति ताम् ।
अङ्गेनोत्पुलकेन किं तु सुचिरं गीतं कुरङ्गीव सा
　तन्वङ्गी तव शृण्वती नयनजैरम्भोभिरुन्नीयते ॥ ३० ॥

---

ध्याने झटिति यथा परिस्फुरति मे कात्यायन्यास्तथा
　नो जाने यदि जीवयिष्यत्युमा कन्या विपन्नेति माम् ॥

(क) ननु तस्मिन्नपि संनद्धो मकरध्वज इति किमित्युत्ताम्यते ।

(ख) सखि, अलमाश्वासनशीलतया ।

(ग) ननु यः स तस्य महाभागस्य कृते प्रस्तावयितुमारब्धः श्लोको न किं विरच्यते ।

(घ) त्वमेव शक्ता श्लोकयुगलं कुरुष्व । मम मन्मथरससंकल्पविकल्पैरन्तर्यते प्रणिधानदृष्टिः ।

(ङ) सखि, अवधारय ।

**नायिका**—सखि, साहु विरइदम्। सरसकइत्तणेण परभूमिमारोविदो विप्पलम्भो। (क)

**राजा**—प्रिये, अन्तरङ्गासि काव्योपनिषदाम्।

**नायिका**—सहि, मए वि विरइदो संदेसो। (ख)

**सखी**—कीरिसो। गण्डूसेहि सवणाइं रसदाणेण। (ग)

**नायिका**—

किं चन्दो तह चन्दणव्व सिसिरो किं वल्लईपञ्चमो
कण्णे वल्लहसंगमो मणासिजो किं वा सपक्खट्ठिदो।
दिट्ठी किं कमलेसु रज्जदि मणं किं णाम मे दक्खिणो
सो वा दक्खिणमारुदो जइ तुए मज्झत्थमालम्बिदम्॥ ३१॥(घ)

**विदूषकः**—भो, एह्णिं पत्तिज्जसि। (ङ)

(राजा मोदते।)

**सखी**—सहि, णिअदसाणिवेदणगब्भणिब्भरं दढं उपलद्धो भट्टा। (च)

**नायिका**—एवं सुणीअ किं पडिपज्जदि। (छ)

---

(क) सखि, साधु विरचितम्। सरसकवित्वेन परभूमिमारोपितो विप्रलम्भः।

(ख) सखि, मयापि विरचितः संदेशः।

(ग) कीदृशः। गण्डूषय श्रवणे रसदानेन।

(घ) किं चन्द्रस्तथा चन्दन इव शिशिरः किं वल्लकीपञ्चमः
कर्णे वल्लभसंगमो मनसिजः किं वा सपक्षस्थितः।
दृष्टिः किं कमलेषु रज्यति मनाक्किं नाम मे दक्षिणः
स वा दक्षिणमारुतो यदि त्वया माध्यस्थ्यमालम्बितम्॥

(ङ) भोः, अधुना प्रत्याय्यसे।

(च) सखि, निजदशानिवेदनगर्भनिर्भरं दृढमुपालब्धो भर्ता।

(छ) एवं श्रुत्वा किं प्रतिपद्यते।

**सखी**—किं अण्णम् ।

जं जलरासिसुताए नवरसतण्हाउलेण कण्हेण ।
ससिहण्डमण्डणेण वि पडिवण्णं जं च गोरीए ॥ ३२ ॥ (क)

**नायिका**—अवि ण कहिं पि अवहीरस्सादि सखी । (ख)

**सखी**—(विहस्य ।)

तुह्मारिसीओ परिहवविसअम्मि कहं व वज्जन्ति ।
किज्जउ कहं विअ फुडं णिअडाहिँ सुहाइदं दूरे ॥ ३३ ॥ (ग)

**नायिका**—(सोत्कलिकं संस्कृतमाश्रित्य ।)

जाने सखि स्मरशिखिज्वलिता जनस्य
तस्य व्रजामि निकटं परिभूय लज्जाम् ।
पश्चाद्यथाभिरुचितं विदधातु देवी
किं दुःसहं विरहपावकतोऽपि वा स्यात् ॥ ३४ ॥

**विदूषकः**—भो, ण जुत्तं दाणिं पडिबालणम् । उपसरीअदु । (घ)

**राजा**—मूर्ख, किं तरलोऽसि ।

**सखी**—साहि, किं उत्तावलासि । तारिसाइं जेव्व तुह लक्खणाइं जेहिं किं ण संभावीअदि । (ङ)

**नायिका**—ईरिसाइं मह भाअधेआइं जेण मिच्चुसंभावणा । (इति संस्कृतमाश्रित्य ।) (च)

---

(क) किमन्यत् ।

यज्जलराशिसुताया नवरसतृष्णाकुलेन कृष्णेन ।
शशिखण्डमण्डनेनापि प्रतिपन्नं यच्च गौर्या ॥

(ख) अपि न कुत्राप्यवधीरयिष्यति(?) सखी ।

(ग) युष्मादृश्यः परिभवविषये कथमिव व्रजन्ति ।
क्रियतां कथमिव स्फुटं निगडैः सुखायितं दूरे ॥

(घ) भोः, न युक्तमिदानीं प्रतिपालनम् । उपसृियताम् ।

(ङ) सखि, किमाकुलासि । तादृशान्येव तव लक्षणानि यैः किं न संभाव्यते ।

(च) ईदृशानि मम भागधेयानि यैर्मृत्युसंभावना ।

गुर्वीं धुरं दुरभियोगनिधिर्मनोभू-
रारूढवानविषये मनसोऽनुबन्धः ।
बन्धुर्न कश्चिदपि निघ्नतया स्थितिश्च
हा निश्चितं मरणमेव ममेह जातम् ॥ ३५ ॥

(इति मोहमुपगच्छति ।)

**विदूषकः**—भो, पमादो पमादो । मए पढमं जेव्व आअक्खिदं उपसप्पीअदु त्ति । (क)

(राजा ससंभ्रममुपसर्पति ।)

**सखी**—विजयताम् ।

**विदूषकः**—अव्वह्मण्णं अव्वह्मण्णम् । (ख)

**सखी**—महाराअ, हत्थेण फंसीअदु जेण चेअणं पावेदि । (ग)

**राजा**—(तथा कुर्वन् ।)

विलोलत्वं चक्षुः स्पृशति मुकुलावस्थमपि य-
द्दुरास्विद्यन्मध्यं कुचकलशयोरुच्छ्वसिति यत् ।
प्रसीदत्युद्दामा यदपि वदनश्रीः सपुलकं
तदेतस्याः संज्ञा ध्रुवमभिमुखी पक्ष्मलदृशः ॥ ३६ ॥

(पुनरवलोक्य ।) अहो सर्वावस्थाभिरव्यवधीयमानं रामणीयकमस्याः । तथा हि ।

भ्रूलेखा विनिवृत्तनृत्तरचना मुक्ताञ्चनोदञ्चन-
व्यापारा कुसुमास्त्रकार्मुकलतामुष्याः सगोत्रीकृता ।
मीलल्लीलमुपैति लोचनयुगं निद्रालुनीलोत्पल-
स्पर्धा श्वासकदर्थितोऽपि भजते बिम्बाधरः स्वां धुरम् ॥ ३७ ॥

**विदूषकः**—भोदी मम पिअवअस्सहत्थेण फंसिज्जन्ती कहं ण चेअणं पडिवज्जदि । (घ)

---

(क) भोः, प्रमादः प्रमादः । मया प्रथममेवाख्यातमुपसृप्यतामिति ।

(ख) अब्रह्मण्यमब्रह्मण्यम् ।

(ग) महाराज, हस्तेन स्पृश्यतां येन चेतनां प्राप्नोति ।

(घ) भवती मम प्रियवयस्यहस्तेन स्पृश्यमाना कथं न चेतनां प्रतिपद्यते ।

**राजा**—(सानन्दमात्मगतम् ।)

मग्नं मृगाङ्कसरसीव सुधानिधाने
गर्भे निषण्णमिव पङ्कजकैरवाणाम् ।
अप्यत्र यन्त्रविनिपीडितपारिजात-
निःस्यन्दधौतमिव निर्वृतिमेति चेतः ॥ ३८ ॥

**सखी**—सहि, एदेण हत्थफंसेण ण उच्छसासि त्ति अहो दे काठिणत्तणम् । (क)

**नायिका**—(किंचित्समाश्वस्य ।) अम्मो, किंत्ति रसाअणसित्तेव्व णिव्वुदिं उव्वहामि । एसो जिआअणो कङ्खिदो जणो । (इति किंचिद्दृष्ट्वा सलज्जमास्ते ।) (ख)

**राजा**—

वद सुवदने किं व्यामोहः समाश्वसिहि द्रुतं
प्रणयिनि जने किं प्रत्याशाविरोधि विचेष्टितम् ।
नय नयनयोरातिथ्यं मां मनोभववागुरा
परिचरतु मां नीलाम्भोजस्रजः कलयान्विता ॥ ३९ ॥

**विदूषकः**— भोदि, किं ण अलिअणिद्दा विद्दावीअदि । पिअवअस्सो एव्वं दीणत्तणं दंसेदि । (ग)

**सखी**— (सहासम् ।) किंत्ति पडिपत्तिमूढदा अङ्गीकदेत्ति । (एनां बलादानीय राजान्तिकमुपवेशयति ।) (घ)

---

(क) सखि, एतेन हस्तस्पर्शेन नोच्छ्वसिसीत्यहो ते कठिनत्वम् ।

(ख) अहो, किमिति रसायनसिक्तेव निर्वृतिमुद्वहामि । एष जीवनःकाङ्क्षितो जनः ।

(ग) भवति, किं नालीकनिद्रा विद्राव्यते । प्रियवयस्य एवं दीनत्वं दर्शयति ।

(घ) किमिति प्रतिपत्तिमूढता अङ्गीकृतेति ।

**नायिका**—(सकृतककोपम्।) अवेहि पडिहासशीले। (इति सासूयमवलोकयति।) (क)

**राजा**—

इयं यदालोकयति त्रपानता दृशा नवेन्दीवरदामदीर्घया।
तदन्यदेवाभ्यधिकं रसायनादवैमि पुष्पायुधदेहदोहदम्॥ ४०॥

(इति पटाञ्चले मृशन्।)

नायं जनः किमु परिच्छदमध्यमास्ते
यल्लज्जया ननु तनूदरि मुद्रितासि।
आलिङ्ग मां परिचितानि चिराद्भवन्तु
देहे हरिन्ति हरिचन्दनपल्लवानि॥ ४१॥

(इत्यालिङ्गितुमिच्छति।)

**नायिका**—(स्वगतम्।) हिअअ, मणोरहाणं वि उपरि वट्टसि। (ख)

**सखी**—दिज्जउ एदाणं वीसम्भगोट्ठी। (इति शनकैः किंचिदपसरति।) (ग)

**विदूषकः**—भोदि, एसा देवी आगदा। (घ)

(सखी ससंभ्रमं निवर्तते। नायिका सभयमुत्तिष्ठति।)

**राजा**—(सशङ्कं दिशोऽवलोक्य।) मूर्ख, क्वासौ।

**विदूषकः**—भो, तत्तभोदिं कण्णसुन्दरिं उद्दिसिअ देवी उज्जाणमलंकरेदित्ति भणिदं। (ङ)

**राजा**—(अग्रतोऽवलोक्य।) कथं सत्यमेवागता देवी। अहो ब्रह्मबन्धोरमुष्य फलितममङ्गलेन।

---

(क) अपेहि परिहासशीले।

(ख) हृदय, मनोरथानामप्युपरि वर्तसे।

(ग) दीयतामेतयोर्विस्रम्भगोष्ठी।

(घ) भवति, एषा देव्यागता।

(ङ) भोः, तत्रभवतीं कर्णसुन्दरीमुद्दिश्य देव्युद्यानमलंकरोतीति भणितम्।

---

१. 'सास्रमवलोकयति' इत्यादर्शपुस्तकपाठः.

**नायिका**—(विलोक्य । आत्मगतम् ।) अणब्भए इदं वज्जपडणं पेक्खिदम् । (क)

**सखी**—महाराअ, सुमरिदव्वो अअं जणो । संपदं अण्णदो गच्छह्म । (ख)

**विदूषकः**—अह्मे वि एव्वं जेव्व करेह्म । (ग)

(नायिका सख्या सह निष्क्रान्ता ।)

**राजा**—(निःश्वस्य ।)

कथमपि दिवः पुञ्जीभूय च्युतामिव कौमुदीं
कुमुदसुहृदः प्राप्य प्राणाधिकां विधिकारणात् ।
अहरहरहो प्राप्तं लीलारसोर्मिषु मज्जता
क्षणमपि मया न स्वातन्त्र्यं किमत्र विधीयताम् ॥ ४२ ॥

(ततः प्रविशति देवी हारलता च ।)

**हारलता**—कहं भट्टावि इह ज्जेव । (घ)

**देवी**—राअकज्जविरहे इमस्सिं काले इह ज्जेव्व दिणं णिव्विण्णो विणोदइ अज्जउत्तो अत्ताणअंत्ति । (ङ)

**राजा**—अपि विज्ञातोऽहं देव्या ।

**विदूषकः**—तधा कुविआ वअस्सेण अणुणीदा कधं विप्पदीवं पसज्जिअ अणुसरिस्सदि । (च)

---

(क) अनभ्रे इदं वज्रपतनं प्रेक्षितम् ।

(ख) महाराज, स्मर्तव्योऽयं जनः । सांप्रतमन्यतो गच्छावः ।

(ग) आवामप्येवमेव कुर्वः ।

(घ) कथं भर्तापीहैव ।

(ङ) राजकार्यविरहेऽस्मिन्काले इहैव दिनं निर्विण्णो विनोदयत्यार्यपुत्र आत्मानमिति ।

(च) तथा कुपिता वयस्येनानुनीता कथं विप्रतीपं प्रसज्ज्यानुसरिष्यति ।

---

१. आदर्शपुस्तकसंशोधकेन हारलतास्थाने देवी, देवीस्थाने च हारलता इति पदं शोधितमस्ति.

**राजा**—तदितोऽभ्यन्तरमेव व्रजावः ।

(इति निष्क्रान्ताः सर्वे ।)

द्वितीयोऽङ्कः ।

---

तृतीयोऽङ्कः ।

(ततः प्रविशतश्चेट्यौ ।)

**एका**—सहि बउलावलि, सो ण हु बन्धवो भणीअदि जस्सिं हिअअम्मि विअ णीसङ्कदाए ण रहस्सं संचारीअदि । ता कहेसु कीस तुअं देवीए वासे मन्तअन्ती आसि । (क)

**बकुलावली**—सहि मन्दोअरि, ण अत्थि मम वीसासो । तुअं चावलभावेण विसुमरिअ कस्स पि पुरदो काहिस्सासि त्ति ण आवेदेमि । जदि कुप्पसि ता एवं णिवेदीअदि । परं मन्तभेदो रक्खिदव्वो । (ख)

**मन्दोदरी**—अविस्सासिणि, कहेसु । (ग)

**बकुलावली**—सहि, भट्टा विज्जाहरकण्णाए अणुरत्तचित्तो, परं देवीकारणेण किं पि कादुं ण सक्कुणोदित्ति सव्वगदो पवादो । किं तु भट्टदारिआए कलहाअन्तो अवलावं करेदि । अज्ज क्खु पिअन्तअकेण अज्जबादराअणेण अन्तेउरसालाए पच्छादो णिहुअं हुविअ अज्ज पओसे परिकालिअमअणुज्जाणए संकेदो गहिदो अवअं मन्तिदं ण वेत्ति विरहलेहो अ णिअकरे कदो । देवीए सव्वं पि सुणिअ अहं भणिदा अज्ज मए कण्णसुन्दरीरूएण तुए तीअ सहीरूएण गदुअ अज्जउत्तो वञ्चिदव्वो । ता एदाए वत्ताए रक्खणं कदुअ उअअरणं सज्जीकरेसुत्ति । (घ)

---

(क) सखि बकुलावलि, स न खलु बान्धवो भण्यते यस्मिन्हृदय इव निःशङ्कतया न रहस्यं संचार्यते। तत्कथय कस्मात्त्वं देव्या वासे मन्त्रयन्ती आसीः ।

(ख) सखि मन्दोदरि, नास्ति मम विश्वासः । त्वं चापलभावेन विस्मृत्य कस्यापि पुरतः कथयिष्यसीति नावेदयामि । यदि कुप्यसि तदेवं निवेद्यते । परं मन्त्रभेदो रक्षितव्यः ।

(ग) अविश्वासिनि, कथय ।

(घ) सखि, भर्ता विद्याधरकन्यायामनुरक्तचित्तः, परं देवीकारणेन कि-

**मन्दोदरी**—अहो, संकडे पडिदो महाराओ । (इत्यग्रतोऽवलोक्य ।) एसो भट्टा लच्छीसणाहो णूणं एत्थ रमणपगीवएतंव ज्जेव पडिपालअन्तो चिट्ठदि । ता एहि गच्छामो । जाव अह्मे पेक्खिअ ण किं पि उप्पिस्सदि । (क)

(इति निष्क्रान्ते ।)

प्रवेशकः ।

---

(ततः प्रविशति यथानिर्दिष्टो राजा ।)

**राजा**—

न स्वेच्छागतयोऽपि साचिवलनावैचित्र्यशून्या दृशो
नाधौताधरकान्ति संस्तुतजनालापेऽपि लीलास्मितम् ।
वाचां विस्मरणेऽपि न व्यवहिता विच्छित्तिसंक्रान्तय-
स्तात्पर्यं मदनेन दर्शितमहो वैदग्ध्यदीक्षाविधौ ॥ १ ॥

अपि च ।

तद्वक्त्रेण विलुप्तकान्तिमहिमा वर्णोज्झितः शर्वरी-
मब्रह्मण्यमिव प्रसारितकरः कृत्स्नां विधत्ते विधुः ।
अप्याविष्कृतपत्रमुत्पलवनं तल्लोचनेन्दीवर-
च्छायारिक्थमिव द्विरेफपटलीवाचालमाकाङ्क्षते ॥ २ ॥

---

मपि कर्तुं न शक्नोतीति सर्वगतः प्रवादः । किं तु भर्तृदारिकया कलहायमानोऽपलापं करोति । अद्य खलु प्रिय············आर्यबादरायणेनान्तःपुरशालायाः पश्चान्निभृतं भूत्वाद्य प्रदोषे परिकलितमदनोद्यानके संकेतो गृहीतः········मन्त्रितं न वेत्ति विरहलेखश्च निजकरे कृतः । देव्या सर्वमपि श्रुत्वाहं भणिता अद्य मया कर्णसुन्दरीरूपेण त्वया तस्याः सखीरूपेण गत्वार्यपुत्रो वञ्चयितव्यः । तदस्या वार्ताया रक्षणं कृत्वोपकरणं सज्जीकुरुष्वेति ।

(क) अहो, संकटे पतितो महाराजः । एष भर्ता लक्ष्मीसनाथो नूनमत्र रमण············एव प्रतिपालयंस्तिष्ठति । तदेहि गच्छावः । यावदावां प्रेक्ष्य न किमपि············ ।

(इति साङ्गभङ्गम् ।)

तत्पादद्वितयस्य दास्यमपि न प्राप्नोति पङ्केरुहं
तद्भ्रूभङ्गविनिर्जितं स्मरधनुर्नम्रं सदा तिष्ठति ।
इन्दुः किं दुरतिक्रमस्य कुरुतां धातुः सुधासूतिर-
प्यङ्कं तन्मुखकिंकरत्वपिशुनं धत्ते सहोत्थं यतः ॥ ३ ॥

(स्मरणमभिनीय ।)

प्रायो दास्यति नो पयोधरतटी गन्तुं पुरस्तादिति
ध्यानेनेव चकास्ति साचिगमने शिक्षारसश्चक्षुषोः ।
अन्तः स्थानमिव स्मरैकसुहृदः कस्यापि दातुं बहि-
र्निर्गन्तुं हृदयादपि स्तनयुगं विस्तारि संनह्यति ॥ ४ ॥

अपि च ।

कान्तिः कापि कपोलयोः परिणमत्तालीदल[1]स्पर्धिनी
वर्धन्ते मधुपावलीवलयिनः श्वासानिलाः संततम् ।
कार्श्यस्यावरणं तरङ्गितग[2]तैर्लावण्यमेवाङ्गके
सारङ्गायतचक्षुषः किमथवा सर्वं नवीनायते ॥ ५ ॥

अपि च ।

कंदर्पदैवतनिकेतनवैजयन्ती
यान्ती विलासरसमन्थरमुत्पलाक्षी ।
दृष्टिं निवेदितवती मयि कालकूट-
लेशान्धकारितसुधालहरीविचित्राम् ॥ ६ ॥

(सनिःश्वासम् ।) तत्किमद्यापि चिरयति वयस्यः ।

विज्ञातेङ्गितया तरङ्गितघनक्रोधानुषङ्गं धृतः
किं देव्या प्रतिपालयन्परिजनं तस्याः क्वचित्सुभ्रुवः ।
खेदं सैव सखेलवारणगतिर्न प्रापिता चेति मे
चेतः सान्द्रसमुल्लसन्नवनवोल्लेखं मुहुस्ताम्यति ॥ ७ ॥

(प्रविश्य ।)

**विदूषकः**—दिट्ठिआ वड्ढसि कज्जसिद्धीए । (क)

(क) दिष्ट्या वर्धसे कार्यसिद्ध्या ।

१. 'वनस्पर्धिनी' इत्यादर्शपुस्तकपाठः. २. 'गतैर्' इत्यादर्शे पाठः.

**राजा**—(सहर्षमालिङ्ग्य ।) कथमिव ।

**विदूषकः**—(कर्णे ।) एव्वमेवं । (क)

**राजा**—(सानन्दम् ।)

भूयोऽपि तावदिदमेव निवेदय त्वं
चन्द्रांशुभिः कवलिता इव सूक्तयस्ते ।
अन्तर्बहिश्च हृदयेन किमप्यमन्द-
निःस्यन्दमिन्दुमणिनेव विलीयते मे ॥ ८ ॥

(इति सोत्साहम् । आकाशे ।)

भव भव शतयामा यामिनि स्वामिनि त्वं
छुरय रजनिनाथ ज्योत्स्नया दिङ्मुखानि ।
अयि विरमय काम क्रेङ्कितं क्रूरबाण-
व्ययपरिचयचञ्चत्कर्मणः कार्मुकस्य ॥ ९ ॥

(गगनमवलोक्य ।) सखे, समासन्नप्रायस्तत्र गमनसमयः । तथा हि ।

व्योमभ्रान्तिपरिश्रमेण तृषितैराकृष्यमाणो हयैः
प्रस्वेदश्लथमानसारथिकरप्रभ्रष्टवल्गैरिव ।
अम्भोधेरधिकूलकच्छगहनं क्षीणच्छवि क्ष्माभृतः
स्थित्वा मूर्धनि पश्चिमस्य विशति स्वैरं ग्रहग्रामणीः ॥ १० ॥

अपि च ।

दूरं भानुरुदञ्चितारुणकरः पाथोनिधौ पद्मिनी-
स्पर्शासक्तरजोङ्गरागविगमत्रासादिवामज्जति ।
अन्तः कान्तिमिव प्रियस्य विरहोत्कण्ठाविनोदार्थिनी
रोद्धुं मुद्रयति स्वपङ्कजवनीकोषं च पाथोजिनी ॥ ११ ॥

**विदूषकः**—भो पिअवअस्स, अअं अ तीए अवत्थाणिवेदओ विरहलेहो वाचीअदु । (ख)

---

(क) एवमेवम् ।

(ख) भोः प्रियवयस्य, अयं च तस्या अवस्थानिवेदको विरहलेखो वाच्यताम् ।

(राजा वाचयति ।)

एतां गृहाण सखि रत्नगृहप्रविष्टां
ज्योत्स्नां पिधाय सहसैव गवाक्षमार्गान् ।
नीलीरसेन सह वर्तय पट्टके च
चन्द्रः समेतु कियतापि परिक्षयेण ॥ १२ ॥

ज्योत्स्नानिर्गममार्गमुद्रणविधिं धत्तोरुकुम्भे मुहु-
स्तारा: कारयतान्यतो[1] बत मुहुः संमार्जनीनां चयैः ।
पञ्चेषोर्भजताभिचारचरुतां[2] विस्मार्यतां पञ्चमः
किं चायं पिकमण्डलस्य मयि चेत्सख्यः सुखं वाञ्छथ ॥ १३ ॥

अपि च ।

कलयत दलबन्धं संधिषु न्यस्य सान्द्रं
ननु जतुरसपङ्कं पङ्कजेन्दीवराणाम् ।
इह विरहवतीनां जीवितं येन नायं
हरति परिमलश्रीबान्धवो गन्धवाहः ॥ १४ ॥

नयनयुगलवल्गन्नीरसंक्षाल्यमान-
स्तनमलयजलेपा सावलेपा कथासु ।
इति सुभग समग्रामेव रात्रिं विधत्ते
निरुजसुलभवस्तुप्रार्थनाभिः सखीनाम् ॥ १५ ॥

अपि च ।

धूर्तोऽयं सखि बध्यतामिति वि[3]धुं रश्मिव्रजैः कर्षति
ज्योत्स्नाम्भः परतः प्रयात्विति रिपुं राहुं मुहुर्याचते ।
अप्याकाङ्क्षति सेवितुं सुवदना देवं पुरद्वेषिणं
भूयो निग्रहवाञ्छया भगवतः शृङ्गारचूडामणेः ॥ १६ ॥

**विदूषकः**—एह्निं किं मण्णसि । (क)

---

(क) अधुना किं मन्यसे ।

---

१. 'वरमुहुः' इत्यादर्शपाठः. २. 'चतुरा' इत्यादर्शपाठः. ३. 'विधू' इत्यादर्शपाठः.

**राजा**—(लेखं[1] बहुलं प्रसार्य ।) कथमत्राप्यक्षराणि । (वाचयति ।)

पश्यागच्छ कुतूहलादपि गृहानस्माकमाकर्णय
त्वं देवि च्छलिता न केनचिदिति प्रोक्तं शुकानामपि ।
सा नः कापि सखीषु नास्ति सुभग प्राप्तस्तदीयाङ्क-
स्पर्शोष्मग्लपितो न कामपि रुजं यस्याः किणाङ्कः करः ॥ १७ ॥
कथमपि हृदि कृत्वा त्वद्वियोगातिभारं
सुभग निबिडलज्जामज्जदारम्भमास्ते ।
पिशुनयति कृशाङ्ग्याः केवलं मन्मथाग्निं
श्वसित[2]पवनधूमश्यामला चित्रशाला ॥ १८ ॥

**विदूषकः**—(पुरतोऽवलोक्य ) भो, तुह्माणं दुहुं पि तारिसो सिणेहो जारिसो इमस्स चक्कवाअजुअलस्स । (क)

**राजा**—( सस्पृहमवलोकयन्[3] ।)

रक्ताम्भोरुहचारुचञ्चुपुटकेनोद्धर्तुमिच्छन्निव
भ्रश्यत्पश्यति बिम्बमम्बरमणेश्चक्राह्वयो विह्वलः ।
साश्रुर्मुञ्चति चक्षुषी प्रतिदिशं कान्तास्य दीनानना
मा भैषीस्त्वमिति स्वकालविरहत्राणार्थिनीवानिशम् ॥ १९ ॥

**विदूषकः**—भो, निरन्तरगोधनसहस्ससमुद्धूतधूलीसमुच्छाहिदतरुणतरतिमिररिञ्छोलीलञ्छणे समए अणुसरीअदु संकेदट्ठाणम् । (ख)

**राजा**—(ऊर्ध्वमवलोक्य ।)

संधत्ते धूपधूमच्छविमबहु तमः प्राप्यते तारकाभिः
पुष्पस्रग्दामशोभा नभसि नवनिशाकामिनीतल्पकल्पे ।

---

(क) भोः, युवयोर्द्वयोरपि तादृशः स्नेहो यादृशोऽस्य चक्रवाकयुगलस्य ।

(ख) भोः, निरन्तरगोधनसहस्रसमुद्धूतधूलीसमुत्साहिततरुणतरतिमिरपङ्क्तिलाञ्छने समयेऽनुस्रियतां संकेतस्थानम् ।

---

१. 'लेखनं' इत्यादर्शपाठः. २. 'श्वसिति' इत्यादर्शपाठः. ३. 'अवलोकयाति' इत्यादर्शपाठः.

मध्ये कस्तूरिकाङ्कं दधदिव हरिणं किं च संध्यानुबन्धा-
दिन्दुः सिन्दूरभिन्नस्फटिकमणिशिलाभ्रमलीलां तनोति ॥२०॥

तदादेशाय तमुद्देशं यावन्नालम्बते जरठतां रजनीपरिवृढः ।

**विदूषकः**—इदो पिअवअस्सो । (क)

(इति परिक्रामतः ।)

**विदूषकः**—(अग्रतो दृष्ट्वा ।) एदं तं। पविसदु भवं। उपविसदु पिअव-अस्सो । (ख)

(तथा कुरुतः ।)

**राजा**—अहो रम्यः समयः ।

बध्यन्ते कुसुमगृहाणि धूपधूमै-
स्तान्येव स्मरदयितानि संस्क्रियन्ते ।
धन्यानामपि च सुलोचनासमीपे
रोचन्ते सपदि मनोलसद्विलासाः ॥ २१ ॥

**विदूषकः**—भो वअस्स,

कीराणं पञ्जराणं सुरतकलरुओग्घुट्ठवादानुवाद-
त्तासेणं किज्जमाणा मणिमयवलहीवाहिराई वडन्ति ।
सेज्जाठाणे कआणं फुरइ कलरवो केलिपारावआणं
धण्णाणं हुन्ति कीलाजलकणहरणा संपदं चन्दपाआ ॥२२॥(ग)

**राजा**—(निःश्वस्य ।)

उरसि सुरतनिद्रालीनकान्ते न मग्नं
धवलगृहगवाक्षस्पन्दिभिश्चन्द्रपादैः ।

---

(क) इतः प्रियवयस्यः ।

(ख) एतत्तत् । प्रविशतु भवान् । उपविशतु प्रियवयस्यः ।

(ग) भो वयस्य,

कीराणां पञ्जराणां सुरतकलरुतोद्घुष्टवादानुवाद-
त्रासेन क्रियमाणा मणिमयवलभीबहिर्भागेण पतन्ति ।
शय्यास्थाने……स्फुरति कलरवः केलिपारावतानां
धन्यानां भवन्ति क्रीडाजलकणहरणाः सांप्रतं चन्द्रपादाः ॥

श्रुतमपि भुजशाखापञ्जरे चारुलीला-
मधुरमधरपीडाकूजितं नायताक्ष्याः ॥ २३ ॥

(इति सौत्सुक्यम् ।)

सान्द्रश्रीखण्डपाण्डुस्तनकलशभरात्तारहारप्रकाण्ड-
ज्योत्स्नापुञ्जाभिषेकद्विगुणपरिणमत्कौमुदीमग्नवक्त्रा ।
उत्कण्ठाकृष्यमाणा प्रगुणमनसिजादिश्यमानेन काचि-
न्मार्गेण प्राणनाथप्रणयरभसतः सान्द्रलीलां तनोति ॥ २४ ॥

यस्यै कुप्यति नूतनस्तरुणिमा लावण्यलक्ष्मीरियं
यत्रापत्रपते न संवदति या प्रेमानुबन्धस्य न ।
श्रुत्वैतां च ततां गिरं चिरमसावेतत्किमित्याकुलो
वैक्लव्यं च कुतूहलं च वदनं स्मेरं च धत्ते स्मरः ॥ २५ ॥

(ततः प्रविशति कर्णसुन्दरीवेषा देवी, बकुलावलिवेषा हारलता च ।)

**देवी**—सहि हारलदे, अह्मे किं पि सुणन्तिओ चिट्ठह्म । (क)

**राजा**—अये, कथं प्राप्तैव प्राणेश्वरी । (मुखमवलोक्य ।) अहह ।

जानामि विस्मृतिममन्यत पद्मयोनि-
र्लावण्यसारमभिलिख्य मृगाङ्कबिम्बम् ।
तेनात्र काकपदकं हरिणच्छलेन
दत्त्वा लिलेख मुखमायतलोचनं ते ॥ २६ ॥

**विदूषकः**—अहं पि दाव वण्णेमि ।

रइकलहविरोहे रोहिणीकज्जलंसु-
प्पसरपरिगदो व्व ज्झामलो लञ्छणेण ।
निजवअणसवण्णं जामिणीडिम्भमेणं
वहइ रअणिणाहो लालयन्तो व्व अङ्के ॥ २७ ॥ (ख)

---

(क) सखि हारलते, आवां किमपि शृण्वत्यौ तिष्ठावः ।

(ख) अहमपि तावद्वर्णयामि ।

रतिकलहविरोधे रोहिणीकज्जलाश्रु-
प्रसरपरिगत इव श्यामलो लाञ्छनेन ।

**देवी**—(आत्मगतम् ।) हदास, तुज्झ एसो सव्वो एव्व परिफन्दो । (क)

**राजा**—सखि बकुलावलि, किमियं वामता भवत्सख्याः, यदेवमालोकनेनापि न कृतार्थयति ।

**हारलता**—णेहो एत्थ अवरज्झदि, णो उण वामदा । (ख)

**राजा**—

झटिति कुवलयानि व्रीडया पीडितत्वा-
द्दधतु कृतकनिद्रां चन्द्रिकासंगमेऽपि ।
अपि तरलय लीलामज्जदुन्मज्जदन्तः-
स्फुरितकुसुमचापं चक्षुराकेकराक्षि ॥ २८ ॥

अपि च ।

सुतनु विसृज लज्जां वल्गु वल्गन्तु वाचः
कवचयतु विपञ्चीपञ्चमः श्रोत्रयुग्मम् ।
अपि कुरु परिरम्भं चारु रम्भोरु गात्रे
परिणमति कठोरः कैरवेशप्रकाशः ॥ २९ ॥

(इति समन्तादवलोक्य । आत्मगतम् ।) अहो निःसीमं रामणीयकम् ।

जयति धनुरधिज्यं भ्रूविलासः स्मरस्य
स्पृशति किमपि जैत्रं तैक्ष्ण्यमक्ष्णोः प्रचारः ।
अपि च चिबुकचुम्बी श्यामलाङ्ग्यास्तनोति
स्तनकलशनिवेशः पेशलश्रीः पृथुत्वम् ॥ ३० ॥

(इत्यालिङ्गति ।)

**देवी**—(प्रकटीभूय ।) साअदं अज्जउत्तस्स । (इति क्षिपति ।) (ग)

---

निजवदनसवर्णं यामिनीडिम्भमेनं
वहति रजनिनाथो लालयन्निवाङ्के ॥ .

(क) हताश, तवैष सर्व एव परिस्पन्दः ।

(ख) स्नेहोऽत्रापराध्यति, न पुनर्वामता ।

(ग) स्वागतमार्यपुत्राय ।

---

१. 'पेशलश्रीपृथुत्वम्' इत्यादर्शपाठः.

**राजा**—(सवैलक्ष्यम् ।)

स्वयं कृतेऽपराधे तु ज्ञाते धीर्यस्य जायते ।
अपत्रपायां महती तद्वैलक्ष्यं वयं स्तुमः ॥ ३१ ॥

(विदूषको राज्ञः पक्षश्चाधोमुखस्तिष्ठति ।)

**राजा**—

त्वां प्रत्येव मयापि नर्म कृतमित्युक्ते कुतो मन्यसे
निर्दोषोऽहमिति ब्रवीमि सहसा दृष्टव्यलीकः कथम् ।
क्षन्तव्यं मयि सर्वमित्यपि भवेदङ्गीकृतोऽयं विधिः
किं वक्तुं मम युक्तमित्यनुगुणं देवि त्वमेवादिश ॥ ३२ ॥

(इति पादयोः पतितुमिच्छति ।)

(देवी साक्षेपं हारलतया सह निष्क्रान्ता ।)

**विदूषकः**—भो, किं अरण्णरोदणेण । देवी एव्व अणुसरीअदु । (क)

**राजा**—एवमिति ।

(इति निष्क्रान्ताः सर्वे ।)

तृतीयोऽङ्कः ।

---

चतुर्थोऽङ्कः ।

(नेपथ्ये ।)

अवन्ध्या भवतु प्रभातसंध्या देवस्य । संप्रति

रवितुरगखुराग्रक्षुण्णपूर्वाद्रिधातु-
क्षितिरज इव धत्ते धाम पौरंदरी दिक् ।
अपरजलधिवेलोद्भूतडिण्डीरपिण्ड-
भ्रममममृतमरीचिः किं च दत्ते प्रतीच्याम् ॥ १ ॥

अपि च ।

चन्द्रालोकनरागजागरणतः श्रान्तेव कृत्स्नां निशां
प्रालेयानिलसौहृदात्कुमुदिनी निद्रावृता घूर्णते ।
अप्येते विदितप्रबोधसमयाः प्रत्यूषभोगावली-
र्गायन्तीव कलस्वरा मधुलिहः पद्माकराणामितः ॥ २ ॥

---

(क) भोः, किमरण्यरोदनेन । देव्येवानुस्रियताम् ।

अपि च ।

उन्मृष्टा शयनेषु चित्रसुरतक्रीडाविधेः साक्षिणी
　लाक्षारागमयी लिपिः श्रमवशाः पारावताः शेरते ।
सर्वं साधकमत्र तु प्रतिविधिं कुर्युः कुरङ्गीदृश-
　स्तादृश्यः प्रसरन्ति यद्गुरुजनस्याग्रे शुकानां गिरः ॥ ३ ॥

(ततः प्रविशति विदूषकः ।)

**विदूषकः**—(सपरितोषम् ।) साहु अमच्च, साहु । देवीए भाइणेयं कुमारं कण्णसुन्दरीए समाणवअस्सं अप्पणो सआसे से वेसधारिणं आणअन्तेण तस्स व्व णिवासे कण्णसुन्दरीं मुअन्तेण सव्वं साहिदम् । ता पिअवअस्सस्स चक्कवट्टिभावः सव्वधा अहिमुहो संवुत्तो । अवरं देवीए परिहासादो रक्खिदो अज्ज क्खु महाभावो अ । मए मन्दभाअधेआए वामत्तणेण अज्जउत्तो किलिम्मिदोत्ति कण्णसुन्दरीपदिकिदिगब्भरूअं भाइणेअं परिणाइउं पिअवअस्सो पउत्तो । संपदं देवी एव्व विलक्खा हुविस्सदि । ता दुस्सअसंगदनिवाहस्स तस्स परिवासवट्टी होमि । (इति निष्क्रान्तः ।) (क)

(ततः प्रविशति राजा विदूषकश्च ।)

**राजा**—

निद्रां लम्भयता चिरं भगवता भालस्थलीलोचन-
　ज्वालापल्लवसंस्तरे पुरजिता पुष्पायुधं मन्मथम् ।

---

(क). साधु अमात्य, साधु । देव्या भागिनेयं कुमारं कर्णसुन्दर्याः समानवयस्कमात्मनः सकाशे तस्या वेषधारिणमानयता तस्यैव निवासे कर्णसुन्दरीं मुञ्चता सर्वं साधितम् । तत्प्रियवयस्यस्य चक्रवर्तिभावः सर्वथाभिमुखः संवृत्तः । अपरं देव्याः परिहासाद्रक्षितोऽद्य खलु महाभावश्च । मया मन्दभागधेयया वामत्वेनार्यपुत्रः क्लामित इति कर्णसुन्दरीप्रतिकृतिगर्भरूपं भागिनेयं परिणाययितुं प्रियवयस्यः प्रवृत्तः । सांप्रतं देव्येव विलक्षा भविष्यति । तद्दुःसहसंगतनिवासस्य(?) तस्य परिपार्श्ववर्ती भवामि ।

हा हानिर्महती कृता विरहिणां यद्वज्रसारान्स्मरः
कोऽप्यन्यः क्षिपति प्रतिक्षणमयं मर्माविधः सायकान् ॥ ४ ॥

[1]अपि च ।

न प्राप्तः प्रणयापराधसमये बाष्पाम्बुधौतोऽधर-
श्चित्रं नात्र विपर्ययेण सुतनोर्दृष्टं भ्रुवोस्ताण्डवम् ।
निद्रामुद्रितचक्षुषः श्रुतमपि क्रीडावसाने मया
न प्रत्युत्तरमुत्कटाक्षरमहो वामः प्रकामं विधिः ॥ ५ ॥

**विदूषकः**—अहो, अज्ज वि किंति उत्तम्मासि । जं मसिविलित्तं कदुअ पिसुणाणं वअणं संपण्णकप्पो जादो मणोरहो । (क)

**राजा**—

युक्त्या यद्यपि मुद्रितो विधिरयं चेतस्तथापि स्थिरा-
माशामेति कुरङ्गशावकदृशः प्राप्तौ न तस्याः क्षणम् ।
अङ्कस्थेऽपि जने मनोहृति किमप्युत्प्रेक्षते तत्क्षणा-
ज्ज्ञेयं कापि सुलोचना पुनरसावायाति दूरे दृशोः ॥ ६ ॥

(नेपथ्ये ।)

सुखाय ग्रीष्मसमयो महाराजस्य । संप्रति

सत्पानीयमिति श्रुतेः स्वभवने पूर्वं परीक्षाविधौ
त्वद्वैरिक्षितिपालपक्ष्मलदृशस्तृष्णातुराः कानने ।
बाष्पाम्भःकणचक्रवालरचनाचञ्चत्कपोलान्तरं
मुक्तादाम विलोकयन्ति गमनव्यग्राः कुचाग्रस्थितम् ॥ ७ ॥

**राजा**—(सोत्कण्ठम् ।)

सपदि दिवसमध्ये पुण्यभाजः सुजन्मा
वितरति रतिलीलोल्लासिना मानसेन ।

---

(क) अहो, अद्यापि किमित्युत्ताम्यसि । यन्मषीविलिप्तं कृत्वा पिशुनानां वदनं संपन्नकल्पो जातो मनोरथः ।

---

१. 'अपि च' इत्यादर्शे नास्ति.

वरयुवतिरमन्दं चन्दनस्यन्दसान्द्र-
प्रसृतलवणिमाम्भःपङ्किलामङ्कपालीम् ॥ ८ ॥

(सोत्सुक्यम्।)

रम्भास्तम्भमनोभिरामसहजस्पर्शा यदूरुस्फिजः
संपन्नागुरुधूपवासविधयो यन्मज्जनार्द्राः कचाः।
यच्चाकैतवशीतलाः कुचभुवः सा कान्तिरेणीदृशः
पुष्पेषोस्तदहो निदाघसमयम्लानस्य जीवातवे ॥ ९ ॥

अपि च।

ताम्बूलद्रवमुद्रणेन विधुरच्छायो न बिम्बाधर-
श्चक्षुः क्षालितकज्जलं जलभरैः पुष्यत्यभिख्यां निजाम्।
कोऽप्यन्यः कबरीभरस्य विगलद्बिन्दोरमन्दो रसः
स्नानान्ते सपदि स्मरास्त्रमनघं किं वा न वामभ्रुवाम् ॥ १० ॥

तत्किमद्यापि चिरयति देवीसमाह्वानम्।

**विदूषकः**—भो, मा उत्तम। देवीए एसो पडिहासो त्ति महन्तो अहिणिवेसो। (क)

(प्रविश्य।)

**चेटी**—जेदु जेदु भट्टा। एदाइं आहरणाइं देवीए पेसिदाइं विवाह-*जोग्गाइं परिहाइअ विवाहभूमी तुरिदं अलंकरीअदु।* (इत्याभरणानि समर्पयति।) (ख)

**राजा**—एतत्त्वं गृहाणापरम्। मां समागतं देव्यै निवेदय। (इति कण्ठादवतार्य मुक्तादाम समर्पयति।)

(चेटी गृहीत्वा निष्क्रान्ता।)

---

(क) भोः, मा उत्ताम्य। देव्या एष परिहास इति महानभिनिवेशः।

(ख) जयतु जयतु भर्ता। एतान्याभरणानि देव्या प्रेषितानि विवाहयोग्यानि परिधाय विवाहभूमिस्त्वरितमलंक्रियताम्।

**राजा**—(आत्मीयानलंकारान्विदूषकाय दत्त्वा नाट्येनात्मानमलंकरोति। निःश्वस्य।)

तद्वैवाहिकहोमधूमकलनामीलत्कपोलं मुखं
किं लज्जारसमज्जनादवनमज्जायेत दृग्गोचरम् ।
यत्पारिप्लवलोचनाञ्चलमिलद्दूर्वाङ्कमङ्के रतेः
सुप्तस्यापि मनोभुवस्त्रिजगतां साम्राज्यदानक्षमम् ॥ ११ ॥

**विदूषकः**—किं तुहं विवाहविहीए अग्गिपज्जालणेण वा करेसि । जधा तं समप्पइ देवी तधा सव्वधा गिह्णसु । (क)

(नेपथ्ये ।)

गीयन्तां मङ्गलानि स्फुरतु चतुरता ताण्डवे लासिकानां
सिच्यन्तां बाह्यकक्षाः क्षितिपतिभिरपि क्षिप्यतां पुष्पवृष्टिः ।
संघैः स्वःकन्यकानां परिणयविधये मण्डपोद्देशमेति
प्रेयश्चित्तानुवृत्तिव्रतनिहितमतिः सस्मिता येन देवी ॥ १२ ॥

**विदूषकः**—भो, णीसंदेहं जाणसु वञ्चिदा देवी । ता एहि । तुरिदं गच्छम्ह । इदो इदो । (ख)

(इति परिक्रामतः ।)

(ततः प्रविशति देवी चेटी च, विभवतश्च परिवारः ।)

**देवी**—सहि हारलदे, पज्जत्तं विप्पलम्भेण अज्जउत्तस्स । (इति पुरोऽवलोक्य ।) एसो संपत्तो भट्टा समं बम्भणविडेण । (ग)

(इति सावरणं तिष्ठतः ।)

**विदूषकः**—एसा देवी । उपसप्पदु भवं । (घ)

(इति तथा कुरुतः ।)

---

(क) किं त्वं विवाहविधयेऽग्निप्रज्वालनेन वा करोषि । यथा तां समर्पयति देवी तथा सर्वथा गृहाण ।

(ख) भोः, निःसंदेहं जानीहि वञ्चिता देवी । तदेहि । त्वरितं गच्छावः । इत इतः ।

(ग) सखि हारलते, पर्याप्तं विप्रलम्भेनार्यपुत्रस्य । एष संप्राप्तो भर्ता समं ब्राह्मणविटेन ।

(घ) एषा देवी । उपसर्पतु भवान् ।

**देवी**—(उत्थाय ।) जेदु जेदु अज्जउत्तो । (क)

(सर्वे यथोचितमुपविशन्ति ।)

**देवी**—(अञ्जलिं बद्ध्वा ।) जं मए किं पि विरुद्धं आअरिदं तस्स दण्डं कण्णसुन्दरीं समप्पेमि । (ख)

**राजा**—महानुभावप्रकृतिरसि । यदभिरुचितं तदाचर ।

(प्रविश्य ।)

**प्रतीहारी**—अमच्चो दुआरे चिट्ठदि । (ग)

**राजा**—तूर्णं प्रवेशय ।

(इति प्रतीहारी निष्क्रान्ता ।)

(ततः प्रविशत्यमात्यः प्रतीहारी च ।)

**प्रतीहारी**—इदो इदो अमच्चो । (घ)

(इति परिक्रामतः ।)

**प्रतीहारी**—एसो भट्टा । उपसप्पदु अमच्चो । (ङ)

(अमात्यो यथोचितमुपसर्पति ।)

**राजा**—आसनमासनम् ।

(प्रतीहारी आसनं दत्त्वा निष्क्रान्ता ।)

**देवी**—सहि, आणेसु कण्णसुन्दरिं जेण अमच्चस्स पुरदो समप्पिअ निरवराहा होमि । (च)

**चेटी**—णववहुत्ति जेव्व जवणिअन्तरे धरिदा सा । (इति निष्क्रम्य तां गृहीत्वा प्रविश्य च ।) देवि, पडिच्छसु एणम् । (छ)

---

(क) जयतु जयत्वार्यपुत्रः ।

(ख) यन्मया किमपि विरुद्धमाचरितं तस्य दण्डं कर्णसुन्दरीं समर्पयामि ।

(ग) अमात्यो द्वारे तिष्ठति ।

(घ) इत इतोऽमात्यः ।

(ङ) एष भर्ता । उपसर्पत्वमात्यः ।

(च) सखि, आनय कर्णसुन्दरीं येनामात्यस्य पुरतः समर्प्य निरपराधा भवामि ।

(छ) नववधूरित्येव जवनिकान्तरे धृता सा । देवि, प्रतीच्छैनाम् ।

**देवी**—(सलज्जां नायिकामन्तिके निवेश्य स्वगतम् ।) अच्चरिअम् । पच्चक्खं सेव्व एसा । अहो माहप्पं कवडनाडअस्स। (क)

**राजा**—

माञ्जिष्ठी लिपिरोष्ठयोः कवचितं चन्द्रस्य कान्त्या मुखं
भ्रूयुग्मं मकरध्वजस्य धनुषा सर्वाङ्गमालिङ्गितम् ।
लावण्यं कुचयोः सुवर्णकलशीमानेन नूनं कृतं
नो जाने कियतीं पपौ कुवलयच्छायां कटाक्षच्छविः ॥ १३ ॥

(विहस्य ।)

देवी निसर्गतरला तरलायताक्षी
संवादमिच्छति मदीक्षणवञ्चनाय ।
प्रत्यन्तरेक्षणमपि क्षणमेतदीय-
सादृश्यनिर्मितिविधौ विधिरप्यशक्तः ॥ १४ ॥

**देवी**—एसा मए तुज्झ समप्पिदा। भजसु णं चउसमुद्दपुहवीए रत्तम्। (इति हस्ते नायिकां समर्पयति ।) (ख)

**राजा**—(गृहीत्वा ।) प्रसन्नं देव्या ।

**देवी**—अमच्च, जुत्तं कदम् । (ग)

**अमात्यः**—किमुच्यते ।

वंशे तस्मिन्नजनि भवती मौक्तिकोत्सिक्तकान्तिः
कीर्तिर्यस्य च्छुरयति सुरक्ष्माधरेन्द्रस्य वक्षः ।
चालुक्यानां वसुमति गृहे किं च तेषां वधूस्त्वं
यैर्निश्चिन्तः कलयति हरिः सागरे नाम शय्याम् ॥ १५ ॥

---

(क) आश्चर्यम् । प्रत्यक्षं सैवैषा । अहो माहात्म्यं कपटनाटकस्य।

(ख) एषा मया तुभ्यं समर्पिता । भजैतच्चतुःसमुद्रपृथिव्या रत्नम्।

(ग) अमात्य, युक्तं कृतम् ।

---

१. 'नायिकां सलज्जामन्तिके निवेशयति । स्वगतम्' इत्यादर्शपाठः.

**विदूषकः**—संवुत्तो विवाहो। ता सोत्थिवाअणस्स अवसरो। (क)

**देवी**—(स्वगतम्।) हदास, पिक्खिस्ससि विआहम्। (ख)

**राजा**—(स्वगतम्।)

मदन कनकपुङ्खाः सन्त्वसंख्याः पृषत्काः
स्फुरतु विजयलक्ष्मीकर्मठं कार्मुकं ते।
अपि च सहचराणां कापि संपच्चकास्तु
प्रियजनविरहाधेरेष जातो यदन्तः ॥ १६ ॥

**अमात्यः**—(आत्मगतम्।) अवसरः प्रकाशनस्य। (प्रकाशम्।) कः कोऽत्र।

(प्रविश्य।)

**प्रतीहारी**—आणवेदु अमच्चो। (ग)

**अमात्यः**—देवीभागिनेयः कुमारः कौतुकेनानीत आसीन्मया स्वमन्दिरे। बन्धुसंगतो न वेति जानीहि।

**प्रतीहारी**—संपदं जेव्व मए हिण्डन्तो दिट्ठो। (इति निष्क्रान्ता।) (घ)

**देवी**—(आत्मगतम्।) हा, हदम्हि मन्दभाइणी। मए कधिदं जेव्व कैदवं त्ति पच्चक्खं सेव्व एसा त्ति। ता वञ्चिदम्हि। किं कीरदि। (इति धैर्यमवलम्बते।) (ङ)

(प्रविश्य।)

**प्रतीहारी**—गज्जणणअरं जेदुं गअस्स रुच्चिकस्स सआसादो पहाणो वीरसिङ्घो आअच्छदि। (च)

---

(क) संवृत्तो विवाहः। तत्स्वस्तिवायनस्यावसरः।

(ख) हताश, प्रेक्षिष्यसे विवाहम्।

(ग) आज्ञापयत्वमात्यः।

(घ) सांप्रतमेव मया हिण्डन्दृष्टः।

(ङ) हा, हतास्मि मन्दभागिनी। मया कथितमेव कैतवमिति प्रत्यक्षं सैव एषेति। तद्वञ्चितास्मि। किं क्रियते।

(च) गर्जननगरं जेतुं गतस्य रुच्चिकस्य सकाशात्प्रधानो वीरसिंह आगच्छति।

**अमात्यः**—अविलम्बितं प्रवेशय ।

(प्रतीहारी निष्क्रम्य वीरसिंहेन सह प्रविशति ।)

**वीरसिंहः**—जयति देवः साम्राज्येन ।

**अमात्यः**—आसनम् ।

(प्रतीहारी आसनं दत्त्वा निष्क्रान्ता ।)

**राजा**—वीरसिंह, निवेदय वृत्तान्तम् ।

**वीरसिंहः**—यथा तावदितो निर्गत्य गर्जनाधिपतिबलस्यास्मद्बलं सिन्धो रोधसि मिलितम्, तथा देवाय निवेदितमेव । अनन्तरं महति समरसंमर्दे

पांसूनां सूचिभेद्यैः सकलमपि कुलक्ष्माभृतां छादनेच्छा-
बद्धोत्साहैः प्रवाहैरसुषिरमभवद्व्योमसीमान्तरालम् ।
द्वारश्रेणीनिवेशश्रियमथ धरणीमण्डलं वीर्ययाता
जातोर्वी तेऽनुवीर(?) विरचितविवरास्तत्र चाहो मुहूर्तम् ॥ १७ ॥

ततश्च ।

किं दोर्वीर्येण मौर्वीं विरचय धनुषि त्वामहं न प्रहर्ता
निःशङ्कस्त्वं रथस्थः प्रहर ननु यतः प्राक्प्रहारप्रियोऽहम् ।
वीराणामित्युदाराः सुचिरमुदचरन्नाककान्तानिकायैः
स्निह्यत्कर्णा विमानप्रणिहितवदनैर्भाविताम्तत्र वाचः ॥ १८ ॥

**राजा**—ततः ।

**वीरसेनः**—क्रमेण

नीरन्ध्रं रुन्धते स्म त्रुटितमिव तडिज्ज्योतिषा व्योमरन्ध्रं
शस्त्राणि त्रासताम्यद्दिनकरतुरगश्रेणिदूरेक्षितानि ।
तीक्ष्णासिच्छिन्नमुह्यद्भटवरवरणारम्भसंभारभाजां
येन स्वःस्वैरिणीनामवतरणविधावप्यभून्नावकाशः ॥ १९ ॥

(देवी स्मयते ।)

**विदूषकः**—उक्कम्पिदोम्हि । (क)

---

(क) उत्कम्पितोऽस्मि ।

**राजा**—ततः ।

**वीरसेनः**—

कबन्धस्कन्धेषु स्रवदतिघनस्त्यानरुधिर-
स्थिरारम्भं गुह्यावनिधरशिरः श्रेणिमभितः ।
पुरो दृष्ट्वा दृष्ट्वा सुरयुवतयः किंनरकुल-
क्षयाशङ्कातङ्कात्क्षुभितमनसः क्षिप्रमभवन् ॥ २० ॥

अपि च ।

गायन्तीषु सुराङ्गनासु मधुरं सौगन्ध्यवत्तन्मुख-
श्वासोल्लासिनि षट्पदावलिरवे वेणुध्वनिस्पर्धिनि ।
धीरं वैरिकबन्धताण्डवविधौ सङ्ग्रामरङ्गे लस-
त्सेनानां गजगर्जितेन मुरजध्वानानुकारो धृतः ॥ २१ ॥

**राजा**—ततश्च ।

**वीरसेनः**—तत्कृतं कर्म रुचिकेन येन विस्मिताः सुराः ।

**राजा**—ततश्च ।

**वीरसेनः**—

त्रातारं जगतां विलोलवलयश्रेणीकृतैकारवं
सोन्मादामरसुन्दरीभुजलतासंसक्तकण्ठग्रहम् ।
कृत्वा गर्जनकाधिराजमधुना त्वं भूरिरत्नाङ्कुर-
च्छायाविच्छुरिताम्बुराशिरशनादाम्नः पृथिव्या पतिः ॥ २२ ॥

(सर्वे मोदन्ते । विदूषको नृत्यति ।)

**अमात्यः**—किं ते भूयः प्रियमुपकरोमि ।

**राजा**—

दृष्टं देव्या किमपि भुवनाश्चर्यतत्त्वं महत्त्वं
लब्धा लक्ष्मीरिव मनसिजक्ष्माभुवः पक्ष्मलाक्षी ।
एकच्छत्रं समजनि महीमण्डलं तत्प्रियं मे
किं स्यादस्मात्परमपि वरं यत्तु याचे भवत्तः ॥ २३ ॥

---

१. 'वरश्रेणि' इत्यादर्शपाठः.

तथापीदमस्तु—

हेलाभ्यस्तसमस्तशास्त्रगहनः साहित्यपाथोनिधि-
क्रीडालोडनपण्डितः प्रियतमः शृङ्गारिणीनां गिराम्।
एकैकेन दिनेन निर्मितमहाकाव्यादिरव्याहत-
प्रागल्भ्यस्थितिविश्रुतः स्थिरमतिः पार्श्वे विदग्धः कविः॥ २४॥

(इति निष्क्रान्ताः सर्वे।)

चतुर्थोऽङ्कः।

---

भट्टश्रीबिह्लणोऽस्याः कविरकलुषधीः सिद्धयः साहसानां
स्रष्टुः शिष्टोपकारव्रतपरमगुरोः संमुखा यस्य तास्ताः।
अर्धे चन्द्रार्धमौलेर्विरचितवसतिर्देवता सापि यस्मै
शब्दब्रह्माभ्यनुज्ञां सममुपनिषदा बाल्य[1] एवादिदेश॥ १॥
यन्मूलं करुणानिधिः स भगवान्वल्मीकजन्मा मुनि-
र्यस्यैके कवयः पराशरसुतप्रायाः प्रतिष्ठां दधुः।
सद्यो यः पथि कालिदासवचसां श्रीबिह्लणः सोऽधुना
निर्व्याजं फलितः सहैव कुसुमोत्तंसेन कल्पद्रुमः॥ २॥
बिन्दुद्वन्द्वतरङ्गिताग्रसरणिः कर्ता शिरोबिन्दुकं
कर्मेति क्रमशिक्षितान्वयकथा ये केऽपि तेभ्यो नमः।
ये तु ग्रन्थसहस्रशाणकषणत्रुट्यत्कलङ्कैर्गिरा-
मुल्लेखैः कवयन्ति बिह्लणकविस्तेष्वेव संनह्यति॥ ३॥
सहोदराः[2] कुङ्कुमकेसराणां भवन्ति नूनं कविताविलासाः।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः॥ ४॥

**समाप्तेयं[3] कर्णसुन्दरी नाम नाटिका।**

---

१. 'सान्द्रैर्वेदध्वनिभिरनभिव्यक्तमञ्जीरनादा मौञ्जीबन्धात्प्रभृति वदने यस्य वाग्देवतासीत्' इति विक्रमाङ्कदेवचरितेऽपि (१८।८१) बिह्लणकविरात्मानं वर्णयति स्म. २. विक्रमाङ्कदेवचरितस्य प्रथमसर्गेऽप्ययं श्लोकः समुपलभ्यते. ३. आदर्शपुस्तके 'समाप्ता चेयं कर्णसुंद' इत्येतावदेवास्ति.

# काव्यमाला ।

## [1]महाकविश्रीसुभटकृतं

## दूताङ्गदम् ।

पायात्स वः कुमुदकुन्दमृणालगौरः
शङ्खो हरेः करतलाम्बरपूर्णचन्द्रः ।
नादेन यस्य सुरशत्रुविलासिनीनां
काञ्च्यो भवन्ति शिथिला जघनस्थलीषु ॥ १ ॥

अपि च ।

शंभोः कोदण्डभङ्गादविदितविभवः [2]शक्रसूनोर्विनाशा-
दज्ञातः सेतुबन्धादपि न परिचितः [3]कैकसीनन्दनेन ।
संवादादङ्गदस्याप्यनधिगतगतिः कारणान्मर्त्यमूर्ते-
र्भूयाद्भूत्यै जनानां जगति रघुपतेर्वैष्णवः कोऽपि भावः ॥ २ ॥

(नान्द्यन्ते)

**सूत्रधारः**—(परिक्रम्य नेपथ्याभिमुखमवलोक्य ।) प्रिये विलासवति, इतस्तावत् ।

---

१. अयं सुभटकविरत्र कुमारपालदेवं वर्णयति. स च कुमारपालः १०८८ मितात्खिस्तसंवत्सरादारभ्य ११७२ मितसंवत्सरपर्यन्तं गुर्जर(गुजरात)देशं पालयामास. श्वेताम्बरजैनोऽनेकग्रन्थकर्ता पण्डितवरः श्रीहेमाचार्योऽपि कुमारपालसमकालीन एव. (मुम्बईमुद्रितसुभाषितावलीपुस्तकोपोद्घातस्य १३९ पृष्ठं विलोकनीयम्.) हेमाचार्यकृतं कुमारपालचरितं प्राकृतनिबद्धं प्रसिद्धमेव. 'सुभटेन पदन्यासः स कोऽपि समितौ कृतः । येनाधुनापि धीराणां रोमाञ्चो नापचीयते ॥' इति कीर्तिकौमुद्यां (१।२४) ख्रिस्तसंवत्सरत्रयोदशशतकपूर्वभागसमुत्पन्नः सोमेश्वरदेवोऽपि सुभटकविं स्तौति. अस्मिन्ग्रन्थे न सर्वे श्लोकाः सुभटकृताः, किं तु भवभूतिराजशेखरादिकृता अपि श्लोका अत्र वर्तन्ते. परकीयश्लोकग्रहणं च कविरेव स्वयं ग्रन्थान्ते स्वीकरोति. 'पायात्स वः–' इत्यादि प्रथमश्लोकस्योत्तरार्धं काव्यालंकारटीकायां (२।८) नमिसाधुनोदाहृतः. २. वालिनः. ३. कैकसी रावणादीनां माता. 'नैकषी' इति पुस्तकान्तरपाठः.

(प्रविश्य)

**नटी**—अज्जउत्त, इअह्मि । आणवेदु अज्जो जं करणिज्जं । (क)

**सूत्रधारः**—विश्वविश्वंभराभारसमुद्धरणादिवराहस्य निजभुजयुगल[1]विदलितसकलवैरिवृन्दसुन्दरीनेत्रनीलोत्पलविगलितबहलबाष्पपूरप्लवमानप्रतापराजहंसस्य महाराजाधिराजश्रीमत्त्रिभुवनपालदेवस्य परिषदाज्ञया प्रबन्धविशेषमहमुपक्रममाणोऽस्मि । भो भोः सामाजिकाः, शृणुत सावधानाः यदद्य वसन्तोत्सवे देव[2]श्रीकुमारपालदेवस्य यात्रायां [3]पदवाक्यप्रमाणपारंगतेन महाकविना श्रीसुभटेन विनिर्मितं दूताङ्गदं नाम च्छायानाटकमभिनेतव्यम् ।

**नटी**—अज्जउत्त, जुत्तं ववसिदं । (ख)

(नेपथ्ये)

[4]तारापतौ वानरराजलक्ष्मीं निहत्य यो वालिनमानिनाय ।
तीर्णार्णवो दाशरथिः स देवः सुवेलशैलोपवनेष्वखेलत्[5] ॥ ३ ॥

**सूत्रधारः**—आर्ये, प्रारब्धमेव [6]कुशीलवैः । [7]यदमी रामानुचरवीराणां परस्परमालापाः श्रूयन्ते । तदेहि । आवामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

**प्रस्तावना ।**

---

(ततः प्रविशतः सुवेलशैलशिलातलासीनौ रामलक्ष्मणौ । [8]सुग्रीवादिकश्च विभवतः परिवारः ।)

[9]**रामः**—(लक्ष्मणं प्रति ।) वत्स लक्ष्मण,

---

(क) आर्यपुत्र, इयमस्मि । आज्ञापयत्वार्यो यत्करणीयम् ।

(ख) आर्यपुत्र, युक्तं व्यवसितम् ।

---

१. 'युगलार्गलाविदलित' इति पाठः. २. 'देव' इति पदं पुस्तकान्तरे नास्ति. ३. 'पदवाक्यपारंगमेन' इति पाठः. ४. सुग्रीवे. ५. 'खेलेत्' इति पाठः. ६. 'नर्तकैः' इति पाठः. ७. 'इहैव रामानुचराणां परस्परालापाः' इति पाठः. ८. 'सुग्रीवादिपरिवारश्च' इति पाठः. ९. 'रामः—(लक्ष्मणमवलोक्य ।) तीर्णोऽर्णवः—' इति पाठः.

तीर्णोऽर्णवः कवलितेव कपीश्वरस्य[1]
सेनाभटैर्झटिति राक्षसराजधानी ।
यत्पौरुषोचितमिहाद्य[2] कृतं मयात-
द्दैवस्य वश्यमपरं धनुषोऽथवास्य ॥ ४ ॥

**लक्ष्मणः**—आर्य, कातरजनमनोवलम्बिना दैवेन किम् ।
[3]उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ५ ॥

अपि च ।

यावल्ललाटशिखरं भ्रुकुटिर्न याति
यावन्न कार्मुकशिखामधिरोहति ज्या ।
तावन्निशाचरपतेः पटिमानमेतु
त्रैलोक्यमूलविभुजेषु भुजेषु दर्पः ॥ ६ ॥

तदादिश्यतामङ्गदाय दौत्यम् ।

**रामः**—(अङ्गदं सबहुमानमालोक्य[4] ।) वत्स,
पिता ते यद्वाली बलिनि दशकण्ठे कलितवा-
न्न[5] तद्वक्तुं शक्ता वयमयमुदास्ते न पुलकः ।
स एव[6] त्वं व्यावर्तयसि तनुजत्वेन पितृतां
ततः किं वक्तव्यं तिलकय निसृष्टार्थपदवीम्[7] ॥ ७ ॥

**अङ्गदः**—(मौलिमण्डलमिलत्करयुगलेन प्रणम्य विज्ञापयति ।) देव,
किं[8] प्राकारविहारतोरणवतीं लङ्कामिहैवानये
किं वा सैन्यमहं द्रुतं रघुपतेस्तत्रैव संपादये ।

---

१. सुग्रीवस्येत्यर्थः. २. 'इहाङ्कुरितं मयाद्य' इति पाठः. ३. अयं श्लोकः पुस्तकान्तरे नास्ति. प्रसिद्धश्च हितोपदेशादिषु. ४. 'आलोक्य समादिशति ।) महावीर अङ्गद' इति पाठः. ५. 'न शक्तास्तद्वक्तुम्' इति पाठः. ६. 'एष' इति पाठः. ७. निसृष्टार्थो दूतविशेष इत्यर्थः. ८. अस्माच्छ्लोकादारभ्यास्निमाङ्गदोक्तिपर्यन्तं पुस्तकान्तरे नास्ति.

आकल्पं कुलपर्वतैरविरलैर्बध्नामि वा सागरं
देवादेशय किं करोमि सकलं दोर्दण्डसाध्यं मम ॥ ८ ॥

**राम[1]ः**—वत्स,

[2]अज्ञानादथवाधिपत्यरभसादस्मत्परोक्षे हृता
सीतेयं प्रविमुच्यतामिति वचो गत्वा दशास्यं वद ।
नो चेल्लक्ष्मणमुक्तमार्गणगणच्छेदोच्छलच्छोणित-
च्छत्रच्छन्नदिगन्तमन्तकपुरं पुत्रैर्वृतो यास्यसि ॥ ९ ॥

**अङ्गदः**—देव,

संधौ वा विग्रहे वापि मयि दूते दशाननी ।
अक्षता वा क्षता वापि क्षितिपीठे लुठिष्यति ॥ १० ॥

**रामः**—[3]साधु भो वालिनन्दन, साधु । (इति पृष्ठे हस्तं दत्त्वा वि[4]सृजति ।)

(अङ्गदः प्रणम्य निष्क्रान्तः ।)

**सुग्रीवः**—(लङ्काशैलशिखरमालोक्य ।) देव, पश्य पश्य ।

सावज्ञमिव संपश्यन्कपिवीरवरूथिनीम् ।
निजांसे दशकण्ठोऽयं दत्ते मत्तेभवद्दृशम् ॥ ११ ॥

तदागच्छत । वयमपि सुवेलशैलवनतिलकितानि जलनिधेस्तटानि पश्यामः ।

(इति निष्क्रान्ताः ।)

(ततः प्रविशति रावणो मन्दोदरी विभीषणादिकश्च परिवारः ।)

**रावणः**—(विभीषणं प्रति ।) वत्स विभीषण,

[5]एते ते मम बाहवः सुरपतेर्दोर्दण्डकण्डूहराः
सोऽहं सर्वजगत्पराभवकरो लङ्केश्वरो रावणः ।

---

१. 'रामः प्राह' इति पाठः. २. अयं श्लोकः क्षेमेन्द्रेण सुवृत्ततिलके भवभूतिनाम्नोदाहृतः. तत्र च द्वितीयचरणे 'सीतेयं प्रविमुच्यतां शठ मरुत्पुत्रस्य हस्तेऽधुना' इति पाठोऽस्ति. ३. 'साधु अङ्गद, साधु वालिनन्दन' इति पाठः. ४. 'विसर्जयति' इति पाठः. ५. 'एते ते' इत्यादि श्लोकद्वयं पुस्तकान्तरे नास्ति.

सेतोर्बन्धमिमं शृणोमि कपिभिः पश्यामि लङ्कां वृतां
जीवद्भिस्तु न दृश्यते किमथवा किं वा नहि श्रूयते ॥ १२ ॥

अपि च ।

जम्भारातीभकुम्भस्थलदलनपटुश्चन्द्रहासाभिधानः
खङ्गः किं तापसस्य श्रवणविषयतां न प्रयातो मदीयः ।
यन्नासौ मेघनादप्रभृतिभटशतैर्व्यावृतां वेत्ति लङ्कां
तन्नूनं सत्यमेतत्प्रचलति हि मतिः प्राप्तकालस्य जन्तोः ॥ १३ ॥

यदाखण्डलदर्पेन्दुराहवो बाहवो मम ।
द्रुह्यन्ति तापसेभ्योऽपि तदरिष्टमहो महत् ॥ १४ ॥

**मन्दोदरी**—(स्वगतम् ।)

तं ज्जेव्व अज्ज व्वि गले गरलं गव्वस्स वरिसए एस ।
जग्गन्ति जेण रक्कसकुलम्मि सोअंकुरकुडप्पा ॥ १५ ॥

(प्रकाशम् ।) णाह, पेक्ख पेक्ख । अच्चरिअं अच्चरिअं ।

विलसिदसरोसवानरवरूहणीकलअलस्स कल्लोला ।
इह तुह विलासवासम्मि वीर विरअन्ति पडिसद्दं ॥ १६ ॥ (क)

**रावणः**—(सावज्ञम् ।) देवि प्रकृति[1]प्रियवादिनि, अलमलमनया मर्कट[2]कीटकोलाहलविभीषिकया । किमप्यपरं वक्तुकामासि ।

**मन्दोदरी**—

अज्ज वि ण कोवि दोसो रहुपहुणो देव देहि वैदेहीं ।
मंदोदरीअ मंडणमखंडभावं समब्भेदु ॥ १७ ॥ (ख)

---

(क) तमेवाद्यापि गले गरलं गर्वस्य वर्षत्येषः ।
जाग्रति येन राक्षसकुले शोकाङ्कुरकुड्मलाः ॥

नाथ, प्रेक्षस्व प्रेक्षस्व । आश्चर्यमाश्चर्यम् ।

विलसन्सरोषवानरवरूथिनीकलकलस्य कल्लोलाः ।
इह तव विलासवासे वीर विरचयन्ति प्रतिशब्दम् ॥

(ख) अद्यापि न कोऽपि दोषो रघुप्रभोर्देव देहि वैदेहीम् ।
मन्दोदर्या मण्डनमखण्डभावं समभ्येतु ॥

---

१. 'प्रकृति' इति पुस्तकान्तरे नास्ति. २. 'कटककोलाहलबिभीषया' इति पाठः.

**रावणः**—(सकोपहासम् ।) देवि,

एकं तावदकृत्यमेतदतुलं यन्मैथिलीयं हृता
द्वैतीयीकमिदं विमृश्य यदसौ तस्मै तदा नार्पिता ।
तार्तीयीकमिदं तु यत्कपिभटैर्बद्धेऽद्य वारां निधौ
संधानं दशकंधरो रचयति क्ष्मानन्दिनीमर्पयन् ॥ १८ ॥

तदवतंसयतु भवती विलासगृहम् । (इति मन्दोदरी बाष्पं विसृजन्ती निष्क्रान्ता ।)

**रावणः**—(विभीषणं प्रति ।) वत्स विभीषण, तवापि किमपि वक्तव्यमस्ति ।

**विभीषणः**—देव लङ्केश्वर, विचारय नयचक्षुषा ।

मनुष्यौ न मनुष्यौ तौ वानरास्ते न वानराः ।
व्याजेन किमपि च्छन्नं देव दुर्दैवमेव ते ॥ १९ ॥

तदियं मुच्यतां राक्षसकुलकालरात्रिर्जानकी ।

**रावणः**—(सरोषं खड्गमादाय ।) आः पाप प्रतिपक्षपक्षपातिन् कुलाङ्गार दुराचार, एष ते चन्द्रहासेन शिरः पातयामि । (इति संरभते ।)

(विभीषणश्च सभयमपसरति ।)

**माल्यवान्**—(अन्तराले भवन् ।) देव लङ्केश्वर, विचारय नयचक्षुषा किमहितमभिहितं कुमारविभीषणेन ।

**रावणः**—भोः, त्वमपीदृशः संपन्नः ।

(माल्यवान्सभयं तूष्णीमास्ते ।)

**रावणः**—(विभीषणं प्रति ।) अरे बान्धवापसद[1], परिहर मे राजधानीम् । तमेव च वनेचरमनुप्रविश्य प्रकाशय नीतिनैपुण्यम् । न पुनः कथाशेषं करिष्यामि ।

**विभीषणः**—न भाव्यमन्यथा भवति । (इति वदन्निष्क्रान्तः ।)

(ततः प्रविशति प्रहस्ताभिधः प्रतीहारः ।)

**प्रहस्तः**—देव, रामस्य दूतोऽहमिति ब्रुवाणः कोऽपि शाखामृगो द्वारमध्यास्ते ।

**रावणः**—(सावज्ञम् ।) प्रवेशय तावत् ।

---

१. 'बान्धवाभास' इति पाठः.

(ततः प्रविशति प्रहस्तेन सहाङ्गदः ।)

**अङ्गदः**—(रावणमवलोक्य स्वगतम् ।)

स एष जगदास्कन्दकौतुकी दशकंधरः ।
यन्मौलिकमलारामे रामः क्षेप्ता शिलीमुखान् ॥ २० ॥

(प्रकाशम् ।)

रे राक्षसाः कथयत क्व स रावणाख्यो
रत्नं रवीन्दुकुलयोरपहृत्य नष्टः ।
त्रैलोक्यदीपनकरास्त्रशिखाकराले
यो रामनामदहने[1] भविता पतङ्गः ॥ २१ ॥

(बहवो राक्षसा रावणरूपं बिभ्रति ।)

**अङ्गदः**—

रे रे रावण रावणाः कति बहूनेतान्वयं शुश्रुमः
प्रागेकं किल कार्तवीर्यनृपतेर्दोर्दण्डपिण्डीकृतम् ।
एकं नर्तनदापितान्नकवलं दैत्येन्द्रदासीजनै-
रेकं वक्तुमपि त्रपामह इति त्वं तेषु कोऽन्योऽथवा ॥ २२ ॥

**रावणः**—(बहुरूपाणि संहृत्य सहेलम् ।) भो भोः शाखामृग, कस्त्वं कस्यासि दूतः ।

**अङ्गदः**—

पितर्युपरते यस्तु नोद्वहेत्पैतृकीं धुराम् ।
तेन नैवोपदेष्टव्याः स्वस्य वंशस्य पूर्वजाः ॥ २३ ॥

तथापि भवतु ।

रक्षोदुर्भिक्षमाधातुमवतीर्णोऽस्ति यः क्षितौ ।
तस्य रामस्य दूतोऽहं सुतस्तस्य च बालिनः ॥ २४ ॥

अपि च ।

तस्य रामस्य दूतोऽहं येन मे जनको हतः ।
बालिनस्तस्य पुत्रोऽहं यद्वीर्यानुभवस्तव ॥ २५ ॥

---

१. 'सदने' इति पाठः.

**रावणः**—(अङ्गदं प्रति।)
रामः किं कुरुते

**अङ्गदः**— न किंचित्

**रावणः**— अपि च प्राप्तः पयोधेस्तटं
कस्मात्सांप्रतम्

**अङ्गदः**— एवमेव हि

**रावणः**— ततो बद्धः किमम्भोनिधिः।

**अङ्गदः**—
क्रीडाभिः

**रावणः**— किमसौ न वेत्ति पुरतो लङ्केश्वरो वर्तते

**अङ्गदः**—
जानात्येव विभीषणोऽस्य निकटे लङ्कापदे स्थापितः॥ २६॥

**रावणः**—(साशङ्कम्।) रामस्याधुना कीदृशी चर्या।

**अङ्गदः**—
अङ्के कृत्वोत्तमाङ्गं प्लवगबलपतेः पादमक्षस्य हन्तुः
कृत्वोत्सङ्गे सलीलं त्वचि कनकमृगस्याङ्गमाधाय शेषम्।
बाणं रक्षःकुलघ्नं प्रगुणितमनुजेनादरात्तीक्ष्णमक्ष्णः
कोणेनोद्वीक्षमाणस्त्वदनुजवचने दत्तकर्णोऽयमास्ते॥ २७॥

(रावणस्तत्रावज्ञां नाटयन्, प्रहस्तस्य कर्णे एवमेवं कथयति।)

**प्रहस्तः**—यदादिशति देवः। (इति निष्क्रान्तः।)

(ततः प्रविशति प्रहस्तेन सह मायामैथिली।)

**मैथिली**—जअदु जअदु अज्जउत्तः। (क) (इत्यभिदधाना रावणोत्सङ्गमारोहति।)

**रावणः**—(स्वगतम्।) साधु भो मायामयि साधु, जानासि दशकण्ठमाराधयितुम्।

---

(क) जयतु जयत्वार्यपुत्रः।

---

१. 'रामः किं कुरुते' इत्यादिरङ्गदरावणयोरुक्तिप्रत्युक्तिरूपः श्लोकः. २. सुग्रीवस्य. ३. हनूमतः.

**अङ्गदः**—(सविषादमात्मगतम् ।) अपि नाम जानकी परायाङ्गनाचरितमाचरेत् । भवतु । विलोकयामि तावत् ।

**रावणः**—देवि विदेहनन्दिनि, प्रतिबोध्यतां रामप्रहितोऽयं शाखामृगः ।

**मायामैथिली**—(अङ्गदं सबहुमानमवलोक्य ।) वत्स अङ्गद, मह वयणेहिं पडिबोधेहि राहवं

इम्मवर कीस खिज्जसि राहव तं वज णिअं णअरं ।
दिण्णाहं णिजहिअए सक्खीकिय मयणमेअस्स ॥ २८ ॥

अवि अ ।

मयि रावणंकपंकजविलासहंसीइँ अज्ज रहुणाहो ।
रक्खसभटेहिँ भंजिदभरतं भूसेदु णिजरज्जं ॥ २९ ॥ (क)

**अङ्गदः**—(कर्णौ पिधाय ।) न खलु भवती जानकी । यतः ।

अश्रुतपूर्वाविनया पर्याप्तालंकृता च शीलेन ।
सा राघवस्य पत्नी पुनाति भुवनानि गङ्गेव ॥ ३० ॥

(ततः प्रविश्य पटाक्षेपेण)

**राक्षसी**—

श्रुत्वा रघुपतेः किंचिदनिष्टं देवं मैथिली ।
विधातुं सर्वदुःखान्तं लतापाशेन वाञ्छति ॥ ३१ ॥

**रावणः**—(सखेदम् ।) आः, किमेवमभिहितमनवसरे । राक्षसाः, रक्षत रक्षत जानकीम् । (इति मायामैथिलीं विसर्जयति ।)

**अङ्गदः**—(सहर्षम् ।) परमार्थमैथिलीमयेन तेजसा तिरस्कृतं मायामैथिलीमयमन्धकारम् ।

---

(क) वत्स अङ्गद, मद्वचनैः प्रतिबोधय राघवम्

एषामुपरि कस्मात्खिद्यसे राघव तं व्रज निजं नगरम् ।
दत्ताहं निजहृदयेन साक्षीकृत्य मदनमेतस्य ॥

अपि च ।

मयि रावणाङ्कपङ्कजविलासहंस्यामद्य रघुनाथः ।
राक्षसभटैर्भञ्जितभरतं भूषयतु निजराज्यम् ॥

---

१. 'मैथिली स्वयम्' इति पाठः.

**रावणः**—भो वलीमुख, किमपि वक्तुकामः ।

**अङ्गदः**—

न दोषः स्वल्पोऽपि प्रभवति तवाकृत्यकरणा-
दपि क्रव्यादानां भवति परमं मण्डनमिव ।
अतः क्रव्यादेश त्वयि न परदारापहरणा-
दनौचित्यं किंचित्तदपि विषमाः क्षत्रियरुषः ॥ ३२ ॥

**रावणः**—(सक्रोधम् ।) आः पाप दुर्मुख, मौखर्यदर्शनेन राघवमर्षयसि न पुनर्निदर्शनेन ।

**अङ्गदः**—किमपरमुदाहरणं विलोकय ।

समं प्रतिज्ञया येन तीर्त्वा दुस्तरमर्णवम् ।
वनद्रुमाः सुवेलस्य भज्यन्ते त्वद्भुजा इव ॥ ३३ ॥

**रावणः**—अरे विचारमूढ,

पारावतैः किमयमम्बुनिधिर्न तीर्णः
क्रान्ताः कथं न कपिभिः क्व च नाम शैलाः ।
तद्वेद्मि दोर्बलमसौ यदि शौर्यरेखा-
माविष्करोति करवालकषोपलेऽद्य ॥ ३४ ॥

अपि च रे, रावणं न जानासि ।

आस्कन्धावधि कण्ठपीठविपिने प्राक्चन्द्रहासासिना
छेत्तुं प्रक्रमिते मयैव झटिति त्रुट्यच्छिरासंततौ ।
अस्मेरं गलिताश्रु गद्गदपदं भुग्नं च यद्येष्वभू-
द्वक्त्रेष्वेकमपि स्वयं स भगवांस्तन्मे प्रमाणं शिवः ॥ ३५ ॥

**अङ्गदः**—

किं राघवस्य दशकंधरचन्द्रहास-
वंशेऽभवन्भुवनभीतिभिदः शरास्ते ।
लूनानि यैस्तव शिरांसि पुनः प्ररोह-
मेष्यन्ति मूढ नहि धूर्जटिपर्वणीव ॥ ३६ ॥

**रावणः**—(सकोपं चन्द्रहासमादाय ।) रे अपसरापसर मेऽग्रतः, न पुनः कथाशेषं करिष्यामि ।

**अङ्गदः**—(गन्तुमिच्छन् ।)

रे नक्तंचरराज मुञ्च सहसा देवीमिमां मैथिलीं
मिथ्या किं निजपौरुषस्य नटनप्रागल्भ्यमभ्यस्यसि ।
एतां पश्यसि किं न किंनरगणैरुद्गीतदोर्विक्रमां
सेनां वानरभर्तुरुद्भटभुजस्तम्भाग्रभीमां पुरः ॥ ३७ ॥

अपि च ।

शिरोभिर्मा देवीः शिव इव न ते दास्यति पुनः
प्रबन्धं पश्याब्धेः सरस इव कैलाससुभट ।
हितं तु त्वां ब्रूमो मम जनकदोर्दण्डविजये
चलत्कीर्तिस्तम्भ त्यज कमलबन्धोः कुलवधूम् ॥ ३८ ॥

किं च ।

आदौ येन सुबाहुमुख्यपिशिताहारैः समं ताडका
नीता नाशमतश्च भग्नवदनश्रीस्ते स्वसाकारि च ।
हत्वा येन वने भवद्भटवटून्बद्धोऽम्बुधिश्च क्षणा-
त्कर्ता त्वन्निधनस्य सैष समरे भ्रान्तिस्तवाद्यापि का ॥ ३९ ॥

अपि च ।

रे रे राक्षस मा स्म शंकरवरभ्रान्त्या विभाङ्क्षीतियं
रुष्टो मूढ तदैव यन्मतिरभूत्सीतापहारे हरः ।
नो चेदिष्टकपालमण्डनभृताप्याखण्ड्य मुण्डावलीं
भक्त्या ढौकितमीश्वरेण किमहो प्रत्यर्पितं प्राभृतम् ॥ ४० ॥

अपि च । जानीमहे महेश्वरपरिचरणप्रसङ्गपरमार्थमपि भवतः । मिथ्याभिमानिन्,

आः पौलस्त्य किमेवमुत्पुलकितः स्वसै मुहुः श्लाघसे
यत्तोषं गमितः स्वमौलिकमलैर्बालेन्दुमौलिर्मया ।

---

१. 'तव किम्' इति पाठः.

प्राचीनं हि विरञ्चिपञ्चमशिरश्छेदापवादं स्मर-
न्देवोऽदत्त वरं तवापि कृपया कायव्रतं कुर्वतः ॥ ४१ ॥

शृणु रे दशवदन, वदनविवरविनिर्गतवाग्विभीषिकया न विभीमो वयम्।
(इत्यभिधाय निष्क्रान्तोऽङ्गदः ।)

(नेपथ्ये ।)

त्वयि त्रिभुवनाधीशे हन्ति वानरवाहिनी ।
सज्जो भव महावीर वीरत्वं क्व गतं तव ॥ ४२ ॥

**रावणः**—(सौत्सुक्यम् ।) अये, अस्मदनुजीविनो वध्यमाना भृशं बुम्बायन्ते ।

(ततः प्रविशन्ति विक्षताङ्गा निशाचरभटाः ।)

**निशाचराः**—

वानरैर्यदि वध्याः स्मस्त्वयि नाथेऽप्यसांप्रतम् ।
त्वमपि प्राणिते बुद्धिं शाश्वतीं मा कृथा वृथा ॥ ४३ ॥

**रावणः**—(सकोपं प्रहस्तं त्वरितमाहूय ।)

संनह्यतां सपदि राक्षसवीरसेना
के नाम रामहतकस्य वनौकसोऽमी ।
जागर्ति यन्मम भुजे ननु चन्द्रहासः
श्यामीकृतामरवधूमुखचन्द्रहासः ॥ ४४ ॥

(पुनर्विकटं परिक्रामन् ।) अरावणमरामं वा जगदद्य भविष्यति । (इति वदन्निष्क्रान्तः ।)

(ततः प्रविशतो हेमाङ्गदचित्राङ्गदौ गगनवीथीसंचारिणौ गन्धर्वौ ।)

**हेमाङ्गदः**—सखे चित्राङ्गद,

दिव्यास्त्रैर्भूर्भुवःस्वस्त्रितयडमरकोड्डामरैर्योधयित्वा
लूनोत्क्षिप्तैः शिरोभिर्दशभिरधिनभो दर्शितैकादशार्कः ।
काकुत्स्थेनावकीर्णो निजविशिखशिखायोगपीठोपहूतो
ब्रह्मास्त्रेणाधिशेते रजनिचरपतेर्वीरशय्यां कबन्धः ॥ ४५ ॥

**चित्राङ्गदः**—सखे, अनया गगनवीथ्या बहोः कालात्संचरावहे निर्भयमेवम् ।

( नेपथ्ये कलकलः ।)

यद्वक्त्राणां दशानामिव दश ककुभः शासितुं सृष्टिरासी-
द्विंशत्यायश्च दोर्भिर्दशगुणितमिव प्राप्तवान्वीर्यवर्ष्म ।
लङ्केन्द्रः संजितेन्द्रः समरभुवि जवाज्जानकीवल्लभेन
ज्योतिर्दीप्रैः क्षुरप्रैः स खलु विरचितो निर्विबन्धः कबन्धः ॥४६॥

**चारणः**—शृणु हेमाङ्गद, चित्राङ्गद, चित्रमिवावलोकय ।

हेलाखण्डितचण्डहेमहरिणैर्बाणैः कुलं रक्षसां
शेषीभूतविभीषणं गुणनिधौ कृत्वापि रामे स्थिते ।
प्रत्युज्जीवितशङ्कया यमजितो लङ्कापतेः कातरै-
र्नो मुक्ताः कुसुमस्रजो न च सुरैरास्फालितो दुन्दुभिः ॥ ४७ ॥

**चित्राङ्गदः**—(सचमत्कारं हेमाङ्गदं प्रति ।) सखे हेमाङ्गद, ईदृगेवाद्भुत-रसैकभाजनं भवानीपतिभक्तिभासुरः प्रबलप्रतापभरप्रणमितसकलसुरासुरो वीरवीरोत्तंसः खल्वयं नक्तंचरचक्रवर्ती । यः किल पुरा पुरारिपरिचर्या-वसरे

बिभ्राणं दशवक्त्रतां क्रममिलत्पञ्चाननीपूजया
यः सर्वं स्वमिव स्वमीश्वरमिति ज्ञात्वा मुखैः पञ्चभिः ।
शंभोरेव शिरःसु तं निजकरं व्यापारयन्वारितः
पार्वत्याः कथमप्यहो न स दशग्रीवो गिरां गोचरः ॥ ४८ ॥

(कर्मप्राबल्यमीक्षमाणः । सखेदम् ।) सखे हेमाङ्गद, पश्य पश्य ।

इह खलु विषमः पुरातनानां भवति हि जन्तुषु कर्मणां विपाकः ।
हरशिरसि शिरांसि यानि रेजुः शिव शिव तानि लुठन्ति गृध्रपादैः ॥४९॥

**हेमाङ्गदः**—सखे, नातिचित्रमेतत् । 'यतो धर्मस्ततो जयः' इत्ययं सत्य एव शास्त्रप्रवादः । अतोऽस्मिन्नर्थे शरीरादिभिः पुण्यापुण्यकारिणामायति-र्दर्शिता । अत्र रावण एवोदाहरणमापद्यते । तथाहि ।

वपुर्मुख्यं वित्तं व्ययितमिह धर्मार्थमवनौ
खलु स्फारीभूतं वलति विपरीतं नहि पुनः।
बलिं कुर्वञ्शंभोः पलभुजपतिः सत्रिभुवनां
शिरःश्रेणीं लेभे ननु विगमयन्नुत्पलकृते॥ ९० ॥

(नेपथ्ये।)

बाणैर्लाञ्छितकेतुयष्टिशिखरो मूर्छानमत्सारथि-
र्मांसास्वादनलुब्धगृध्रविहगश्रेणीभिरासेवितः।
रक्षोनाथकबन्धगाढपतनक्षुण्णाक्षदण्डो हयै-
र्हेषित्वा स्मृतमन्दुरास्थितिहृतैर्लङ्कां रथो नीयते॥ ९१ ॥

(पुनर्नेपथ्ये।)

सर्वा गीर्वाणवध्वो व्रजत निजगृहान्बद्धमाधोरण द्रा-
क्स्वर्गेभस्तम्भमालामय सुरकरिणं यामिका यात देवाः।
भूयो दिव्यद्रुमाणां भवतु ननु वने नन्दने संनिवेशो
द्वारि क्षिप्तं यदैन्द्रे दशवदनशिरः किंकरैरङ्कितस्य(?)॥ ९२ ॥

अपि च।

रणरसिकसुरस्त्रीमुक्तमन्दारदामा
स्वयमयमवतीर्णो लक्ष्मणन्यस्तहस्तः।
विरचितजयशब्दो बन्दिभिः स्यन्दनाङ्का-
द्दिनकरकुललक्ष्मीवल्लभो रामभद्रः॥ ९३ ॥

**रामः**—(पुष्पकाधिरूढोऽयोध्यामागच्छन्सीतां प्रति लङ्कारणभूमिं दर्शयन्।)

अत्रासीत्फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भितः
केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी॥ ९४ ॥

इति नवरसगीर्भिर्जानकीं प्रीणयन्वः
पुलकिलललिताङ्गः पैतृकं प्राप्य धाम।

सुखयतु कुलराज्यं पालयन्नुत्कपौरः
प्रकटितबहुभद्रः सर्वदा रामभद्रः ॥ ५५ ॥
स्वनिर्मितं किंचन गद्यपद्यबन्धं कियत्प्राक्तनसत्कवीन्द्रैः ।
प्रोक्तं गृहीत्वा प्रविरच्यते स्म रसाढ्यमेतत्सुभटेन नाट्यम् ॥ ५६ ॥

इति सुभटकविप्रणीतं दूताङ्गदं नाम च्छायानाटकं समाप्तम् ।

समाप्तोऽयं ग्रन्थः ।

KÂVYAMÂLÂ 28.

THE

# DÛTÂNGADA

OF

# SUBHATA.

EDITED BY

PANDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1891.

*Price 2 Annas.*

( *Registered according to Act XXV of 1867.* )

All rights reserved by the publisher. )

काव्यमाला. २८.

श्रीसुभटकविप्रणीतं

# दूताङ्गदम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम् ।

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८९१

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यं २ आणकाः ।

KÂVYAMÂLÂ. 6.

THE

# KAMSAVADHA

OF

# S'ESHAKRISHNA.

EDITED BY

PANDIT DURGÂPRASAD

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1888.

*Price* 8 *Annas.*

( *Registered according to act XXV of 1867.*

(All rights reserved by the publisher)

काव्यमाला. ६.

महाकविश्रीशेषकृष्णप्रणीतं

# कंसवधम्

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम् ।

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८८८

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यं रूप्यकार्धः ।

# काव्यमाला।

## महाकविश्रीशेषकृष्णप्रणीतं

## कंसवधम्।

प्रथमोऽङ्कः।

प्रारम्भः शुभकर्मणस्त्रिभुवनक्लेशाभिचारागमः
कान्ताकर्षणकर्मकार्मणविधिः कामाद्वितीयश्रुतिः।
हुंकारो मदनस्य निर्वृतिवधूमञ्जीरशिञ्जाध्वनिः
श्रेयः संपदमातनोतु भवतः कंसारिवंशीरवः॥ १॥

अपि च।

वृन्दारण्ये चरन्ती विभुरपि सततं भूर्भुवःस्वः सृजन्ती
नन्दोद्भूताप्यनादिः शिशुरपि निगमैर्लक्षिता वीक्षितापि।
विद्युल्लेखावनद्धोन्नमदमलमहाम्भोदसच्छायकाया
माया पायादपायादविदितमहिमा कापि पैताम्बरी वः॥ २॥

अन्यच्च।

मुञ्चामुं चण्डिमानं मयि भुजगफणारत्नसंक्रान्तकाय-
च्छायां प्रेक्ष्य स्वकीयामपि मनसि वृथा मा कृथा दुर्वितर्कम्।

---

१. अयं महाराष्ट्राभिजनः शेषोपनामको नृसिंहसूनुः श्रीकृष्णकविः काश्यामकबरबादशाहराज्यसमये ख्रिस्ताब्दीयषोडशशतकस्योत्तरभाग आसीत्. एतन्नाटकं चानेनाकबरमन्त्रिणो राजाटोडरमल्लनाम्नः पुत्रस्य गोवर्धनधारीत्यपरनाम्नो गिरिधारिणः प्रेरणया प्रणीतम्. अनेनैव कविना काशीपरिसरवर्तिताण्डवपुरनृपतेरनुजन्मनो नरोत्तमस्याभ्यर्थनया पारिजातहरणचम्पूरपि निरमायि. नाटकस्यास्य मुद्रणमस्माभिः पुस्तकद्वयाधारेणारब्धमस्ति. तत्र प्रथमं पुस्तकं प्रायःशुद्धमन्तिमपत्ररहितं शतवर्षप्राचीनमिवोपलक्ष्यमाणं जयपुरराजवैद्यश्रीकृष्णरामकवेः सकाशादधिगतं क-चिह्नितम्. द्वितीयं चास्मदीयमेव नवीनं नातिशुद्धं च ख-चिह्नितमित्यवधेयम्.

इत्युक्त्वा पादपद्मे सपदि निपततो मूर्ध्नि गङ्गाधरस्य
प्रेङ्खन्तश्चण्डिकायाः शतगुणितरुषः पान्तु वोऽपाङ्गभङ्गाः[1] ॥ ३ ॥

(नान्द्यन्ते)

**सूत्रधारः**—अलमतिविस्तरेण । अद्य खलु निखिल[2]वृन्दारकवृन्दवन्द्यमानपादारविन्दस्य तुहिनगिरिनन्दिनीनयनानन्दनिःस्यन्दकन्दस्य सकलसुरासुरोरगनरकिंनरनिकरगीयमानत्रिपुरदहनावदानस्य त्रिभुवनभवनारम्भस्तम्भस्य चतुर्वर्गलक्ष्मीप्रतीक्ष्यमाणकृपाकटाक्षाञ्चलस्य भगवतः श्रीविश्वेश्वरस्य प्रासादप[3]रिसरसीम्नि महानेव कलकलः समुल्लसति । तदत्र यात्राप्रसङ्गसंगतैर्नानादिगन्तवास्तव्यैर्विविधानवद्यहृ[4]द्यविद्याविनोदमोदमानमानसैः सकलकलाकलापकौशलनिकषै[5]र्विदग्धमिश्रैरुपस्थानीयैर्भवितव्यम् । तद्यावदेतान्निजविज्ञानोपहारेणोपतिष्ठे । यतः ।

बुद्धिं वर्धयति श्रियं वितनुते वैदग्ध्यमामुञ्चति
श्रेयः पल्लवयत्यघानि दलयत्युन्मीलयत्युन्नतिम् ।
विज्ञानं परिशोधयत्युपचिनोत्युच्चैः कलाकौशलं
किं किं नारभते हरेरिव कथाजर्यं[6] सतां संगतम्[7] ॥ ४ ॥

(परिक्रम्य पादान्तरे स्थित्वा । सविमर्षम् ।) कथमनाहूत एव रङ्गं प्रविशन्नवज्ञापराहतो नोपहसनीयः स्याम् । यतः ।

नागच्छन्नुपहूयते न वचनोत्थानासनैः पूज्यते
नो पृच्छन्ननुभाष्यते न च दृशा सान्द्रादरं वीक्ष्यते ।
ईर्ष्यारोषकषायिते हृदि घृणालेशोऽपि न स्पृश्यते
किं त्वेकः प्रवदन्समञ्जसमपि प्राज्ञः शठैर्हस्यते ॥ ५ ॥

(निमित्तं सूचयित्वा । सहर्षम् ।)

स्पन्दते दक्षिणं चक्षुर्वक्षो विस्फार्यते यथा ।
सामाजिकास्तथा मन्ये नृत्याय त्वरयन्ति माम् ॥ ६ ॥

---

१. 'भृङ्गाः' इति क-पुस्तकपाठः. २. 'निखिल' इति क-पुस्तके नास्ति. ३. 'परिसर' इति क-पुस्तके नास्ति. ४. 'हृद्य' इति क-पुस्तके नास्ति. ५. निकषः सुवर्णपरीक्षणपाषाणः. ६. न जीर्यतीत्यजर्यमिति संगतस्य विशेषणम्. ७. मैत्री.

(आकाशे कर्णं दत्त्वा ।) किं ब्रूथ—'दूराध्वसंचारपरिश्रान्तस्वान्तानस्मान्केनचिदभिनवग्रथितवस्तुना प्रयोगेण भगवत्कृपानुबन्धिना विनोदय' इति । तद्यावद्गृहं गत्वा गृहिणीमाहूय तथा करोमि । (नेपथ्याभिमुखमवलोक्य ।) अये, कथं

रात्रिजागरणायासकषायितविलोचना ।
अद्याप्येषा विशालाक्षी निद्रातन्द्रां न मुञ्चति ॥ ७ ॥

तथा हि[1] ।

स्खलति शिथिलग्रन्थिर्गात्रादसौ सिचयाञ्चलः
　स्थगयति कुचौ वामः पाणिः परं धृतवासनः ।
गलति कबरी वक्रं लीलालकैः परिभूयते
　तदपि नयनानन्दायैषा दशा हरिणीदृशः ॥ ८ ॥

(विमृश्य ।) सुखप्रसुप्तामप्येतां कालातिपातकातरः प्रबोधयामि तावत् । (प्रविश्य ।) आर्ये, कथमद्यापि निद्रासि । ननूदितभूयिष्ठ एव भगवान्किरणमाली । तथा हि ।

मीलत्कैरवलोचनां प्रविगलत्ताराच्छहारावलीं
　म्लायच्चन्द्रमुखीं विशृङ्खलतमःकेशां सशेषाम्बराम् ।
प्रातः सत्वरमित्वरीमिव[2] बलादुद्गाढरागैः करै-
　राकर्षन्निव यामिनीमनुपतत्यम्भोजिनीवल्लभः ॥ ९ ॥

अपि चातिपतति[3] पुरंध्रीगृहाचारसमयः । नन्वेतामेव तावत्प्रभातवेलां पतिव्रताधर्ममनुवर्तमानां दिनकरकुलवधूं पश्यतु भवती । तथा हि ।

उद्धुध्य प्रथमं प्रसाध्य वदनं संमृज्य तारोत्करं
　निर्माल्यावकरं ततोऽवतमसैरालिप्य सद्गोमयैः ।
सौरैः स्वस्तिकमण्डलानि किरणैरारभ्य निर्मात्यह-
　र्लक्ष्मीः स्त्रीसमयागतं सरसिजैः पुष्पोपहारं भुवः ॥ १० ॥

---

१. 'तथा हि' इति ख-पुस्तके नास्ति. २. कुलटामिव. ३. 'निपतति' इति क-पाठः.

**नटी**— (सहसापसृत्य।) एसाह्मि । आणवेदु अज्जो किं णिमित्तं महच्चे अ पच्चूसे सद्दाविदह्मि । (क)

**सूत्रधारः**— आर्ये, त्वरयन्त्येते नानादिगन्तागताः सकलकलाजलधिसांयात्रिका यात्रिकाः संगीतरङ्गप्रसङ्गाय माम् । तत्प्रसाध्यन्तां पात्राणि प्रवेशोचितवर्णिकापरिग्रहेण ।

**नटी**—को उण एदाणं सामाजिआणं मज्झे णिग्गहाणुग्गहसमत्थो अज्झक्खो जस्स पुरदो णच्चामो । (ख)

**सूत्रधारः**— आर्ये, अयमेव तावदखिलब्रह्माण्डमण्डपमहानटः सृष्टिस्थितिप्रलयनाटिकासूत्रधारः सूत्रात्मा विश्वसाक्षी भगवानिन्दुशेखरः । *तत्पादपद्मपरिचर्यापर्याप्तप्राप्तसाम्राज्यधुरंधरो गोवर्धनधारिराजश्च ।*

**नटी**—को उण एसो गोवर्धनधारीति भणिज्जइ । (ग)

**सूत्रधारः**—तदाकर्ण्यतां यदि कौतुकम् ।

अस्ति क्ष्मापालमौलिज्वलदमलमणिश्रेणिनिःश्रेणिरोह-
द्रोचिर्वीचिप्रपञ्चच्छुरितपदनखप्रेङ्खदुद्यन्मयूखैः ।
येनाकालेऽपि बालारुणकरनिकरो जागरोज्जृम्भमाण-
ज्योत्स्नाजालैर्जटालं स्फुटमजनि हरिच्चक्रवालान्तरालम् ॥ ११ ॥

अपि च ।

वापी पातालमूलं जलमुरगनदी कच्छपः स्वच्छकन्दः
शेषो नालं दलानां विततिरपि फणाः कर्णिका शैवशैलः ।

---

(क) एषास्मि । आज्ञापयत्वार्यः किं निमित्तं महत्येव प्रत्यूषे शब्दायितास्मि ।

(ख) कः पुनरेतेषां सामाजिकानां मध्ये निग्रहानुग्रहसमर्थोऽध्यक्षो यस्य पुरतो नृत्यामः ।

(ग) कः पुनरेष गोवर्धनधारीति भण्यते ।

---

१. 'सोपसृत्य' इति ख-पाठः. २. 'मज्झे' इति क-पुस्तके नास्ति. ३. 'अज्झक्खो' इत्यस्य स्थाने ख-पुस्तके 'अज्जउत्तो' इत्यस्ति. ४. 'अये' इति ख-पाठः. ५. 'पर्याप्तप्राज्यसाम्राज्य–' इति क-पाठः.

तारास्ताराः परागा मधु च मधुमती केसरा दन्तिदन्ता-
स्तस्मिन्यत्कीर्तिपद्मे भ्रमति मधुकरः शर्वरीसार्वभौमः ॥ १२ ॥
तस्यास्ति तण्डनकुलामलमण्डनस्य
श्रीतोडरक्षितिपतेस्तनयो नयज्ञः ।
नानाकलाकुलगृहं स विदग्धगोष्ठी-
मेकोऽधितिष्ठति गुरुर्गिरिधारिनामा ॥ १३ ॥

तेन चाहं सबहुमानमाहूय ससमाजेनादिष्टोऽस्मि ।

**नटी**—जइ एवं ता कीस चिन्तापज्जाउलहिअओ विअ चिरअन्तो चिट्ठसि । (क)

**सूत्रधारः**—प्रिये, महदेव चिन्तास्थानं सभ्योपस्थानम् । तथा हि ।

नाहूतापि पुरः पदं रचयति प्राप्तोपकण्ठं हठा-
त्पृष्टा न प्रतिवक्ति कम्पमयते स्तम्भं समालम्बते ।
वैवर्ण्यं स्वरभङ्गमञ्चति बलान्मन्दाक्षमन्दानना
कष्टं भोः प्रतिभावतोऽप्यभिसभं वाणी नवोढायते ॥ १४ ॥

**नटी**—अज्ज, जइ एव्वं ता किं ति अप्पा संकडे पाडिज्जइ । (ख)

**सूत्रधारः**—आर्ये,

त्वरयति नृपगोष्ठीसंस्तवख्यातिलिप्सा
जडयति च विदग्धाराधनासाहसिक्यम् ।
इति न समधिकर्तुं रूपकं नो विरन्तुं
प्रभवति बत दोलारोहदुःस्थं मनो मे ॥ १५ ॥

**नटी**—को उण उआओ विअद्धाराहणस्स । (ग)

**सूत्रधारः**—प्रिये, ममाप्येष विमर्शश्चिरं चेतसि वर्तते । यतः ।

प्राचीं वाचामुदारां नवरसलहरीहारिबन्धान्प्रबन्धा-
नापीय श्रोत्रपात्रैरपहृतहृदया हन्त तर्षप्रकर्षात् ।

---

(क) यद्येवं तत्कस्माच्चिन्तापर्याकुलहृदय इव चिरयंस्तिष्ठसि ।

(ख) आर्य, यद्येवं तत्किमित्यात्मा संकटे पात्यते ।

(ग) कः पुनरुपायो विदग्धाराधनस्य ।

गुम्फैः संफुल्लमल्लीसरससुमनसां माधुरीमुद्गिरन्तः
सन्तः संतोषमन्तः कमपि सहृदयास्वाद्यमेते वहन्ति ॥ १६ ॥

अपि च ।

सारस्वते स्रोतसि दूरमग्नैः सुधीवरैरुद्धृतसूक्तिरत्ने ।
न तत्किमप्युर्वरितं यदेषामुपायनीकृत्य पुरो भवेयम् ॥ १७ ॥

अन्यच्च ।

निर्मज्याशु सुधीवरैः प्रतिपदं सारस्वतोदन्वतः
प्रोद्धृत्यापहृतैर्दिगन्तसुलभैः सत्सूक्तिमुक्ताफलैः[1] ।
सद्वर्णैः परिपूर्णकर्णहृदया भूमीभुजोऽमी ततः
किं मेताननुरञ्जयिष्यति वचोवाचालकाचावली ॥ १८ ॥

(स्मृतिमभिनीय । सहर्षम् ।) आर्ये, दिष्ट्या समासादितः खलु दुरन्तचिन्ता-कान्तारसंतारहेतुः । तथा हि ।

पृथ्वीमण्डलमौलिमण्डनमणिः श्रीमन्नृसिंहात्मजः
कृत्वा कृष्णकविः कुतूहलवशादस्मासु यन्न्यक्षिपत् ।
नाट्यं कंसवधाभिधानमधुना तस्य प्रयोगोद्यमं
विद्वद्राजसमाजमानसमहानन्दाय विन्दामहे ॥ १९ ॥

**नटी**—(अपवार्य ।) कहं सो वि कवीणं मज्झे संभाविज्जई । (क)

**सूत्रधारः**—अयि मुग्धे, किमेवमाशङ्कसे । यतः ।

चतुर्दशसु विद्यासु परिकार्मितचेतसः ।
कवितेति कियन्नाम तस्याश्चर्यं विपश्चितः ॥ २० ॥

**नटी**—णं भणामि पसाअकविणो विअ तस्स वि पण्डिअकइणो वाणी विअद्धजणस्स पज्जुत्ता भोदि त्ति । (ख)

---

(क) कथं सोऽपि कवीनां मध्ये संभाव्यते ।

(ख) ननु भणामि प्रसादकवेरिव तस्यापि पण्डितकवेर्वाणी विदग्धजनस्य पर्युक्ता भवति ।

---

1. 'मुक्ताभरैः' इति क-पाठः

**सूत्रधारः**—बाढम् । यतः ।

मौलौ मन्दारदामभ्रमदलिपटलीकाकली श्रोणिबिम्बे
कूजत्काञ्चीकलापं चरणकमलयोर्मञ्जुमञ्जीरशिञ्जाम् ।
उत्सङ्गे कीरगीतं स्तनभुवि मसृणं वल्लकीपञ्चमं वा
तत्काव्ये दत्तकर्णा शिवशिव मनुते भारती भारमेव ॥ २१ ॥

अपि च ।

यः पीयूषमयूखधामनि सुधासाराच्छकच्छेऽपि यः
क्षुभ्यत्क्षीरसमुद्रसान्द्रलहरीलावण्यपूरेऽपि यः ।
यः कान्ताधरपल्लवे मधुरिमा नासौ समुद्राहते
श्रीविद्वत्कविकृष्णपण्डितवचोवीचीसमीचीनताम् ॥ २२ ॥

**नटी**—अज्जउत्त, णं सुणीआदि सद्दाणुसासणे दिढं कदब्भासो एसो त्ति । (क)

**सूत्रधारः**—आर्ये, भूषणमेतन्न दूषणं कवीनां व्याकरणकोविदतेति । तथा हि ।

रसालंकारसारापि[१] वाणी व्याकरणोज्झिता ।
श्वित्रोपहतगात्रेव[२] न रञ्जयति सज्जनान् ॥ २३ ॥

**नटी**—(सोद्वेगम् ।) अण्णं भणामि । विसविसमविसहरवइजीहासहस्सणीसरिअवक्ककक्कसविअडवअणोवण्णासणिच्चाहिओअफंसदूसिआ तस्स जीहा कहं महुरमहुररसलालसाइं[३] रसिअजणमणाइं रञ्जइस्सदित्ति णत्थि मे हिअअस्स आसङ्गो । (ख)

---

(क) आर्यपुत्र, ननु श्रूयते शब्दानुशासने दृढं कृताभ्यास एष इति ।

(ख) अन्यद्भणामि । विषविषमविषधरपतिजिह्वासहस्रनिःसृतवक्रकर्कशविकटवचनोपन्यासनित्याभियोगस्पर्शदूषिता तस्य जिह्वा कथं मधुरमधुररसलालसानि रसिकजनमनांसि रञ्जयिष्यतीति नास्ति मे हृदयस्यासङ्गः ।

---

१. 'रसालंकारसंपन्ना' इति ख-पाठः. २. 'खिन्नोपहतगात्रेव' इति ख-पाठः. ३. 'रसालसाइं' इति ख-पाठः. 'रसालसानि' इति तच्छाया.

**सूत्रधारः**—(विहस्य।) अयि मुग्धे, न खलु निसर्गमधुरोदारप्रकृतयो वाचः सांसर्गिकैर्दोषैरुपहन्यमाना अपि स्वाभाविकं गुणमतिवर्तन्ते। पश्य तावत्।

ध्माता भालतलानलैः कवलिता कण्ठोत्थहालाहलै-
र्लीढाथ जटाटवीवलयितैराशीविषाणां गणैः।
कीर्णा भस्मभिराहतास्थिपटलैर्विद्धा जटाग्रैरपि
स्वीयामुज्झति माधुरीं हरशिरोरत्नं किमिन्दोः कला॥ २४॥

**नटी**—(सोत्प्रासम्।) अज्ज, एवं णेदम्। णं भणामि तह वि दुज्जणा अवज्जणिज्जा जह अणुमेत्ते वि अह्माणं कुसीलवाणं खलिदे ण पडिहसन्ति। (क)

**सूत्रधारः**—आर्ये, अलमनया चिन्तया। निसर्गः खलु स तादृशो नोपायसहस्रैरपि विपरिणमयितुं शक्यः। यतः।

अमृतं किरति हिमांशुर्विषमेव फणी समुद्गिरति।
गुणमेव वक्ति साधुर्दोषमसाधुः प्रकाशयति॥ २५॥

तदलं कालातिपातेन। प्रस्तूयतां प्रावेशिकं संगीतकम्।

**नटी**—कं उण समअं समस्सिअ गाइस्सम्। (ख)

**सूत्रधारः**—नन्विममेवाचिरप्रवृत्तं सर्वसुखाकरं प्रावृट्समयमाश्रित्य गीयताम्। इह हि।

मृदितमृदुमृदङ्गध्वानधिक्कारिमेघ-
ध्वनिमुदितमयूरीमन्द्रकेकोपगीताः।
सजलजलदजालानीलनेपथ्यलक्ष्य-
क्षणरुचिरुचिराङ्ग्यः स्वैरमाशा नटन्ति॥ २६॥

(क) आर्य, एवमेतत्। ननु भणामि तथापि दुर्जना आवर्जनीया यथाणुमात्रेऽप्यस्माकं कुशीलवानां स्खलिते न प्रतिहसन्ति।

(ख) कं पुनः समयं समाश्रित्य गास्ये।

१. 'स्वाभाविकगुणान्नातिवर्तन्ते' इति ख-पाठः. २. 'तादृशः' इति ख-पाठः. ३. 'विनिमयितुं' इति ख-पाठः. ४. 'जलदलीलानील' इति ख-पाठः. ५. 'क्षणरुचिरुचिरम्याः' इति ख-पाठः.

**नटी**—तह । (इति गायति ।)

पणमह जलहरसमअं विज्जुज्जलसोम्मसामसुहआसिरिम् ।
[1]जं दट्ठूण दिसाणं कदम्बमउलेहिँ होन्ति पुलआइं ॥ २७ ॥ (क)

**सूत्रधारः**—(सहर्षम् ।) आर्ये, सम्यगुपलक्षितं भवत्या । [2]सकलमङ्गलालयः किलायं समयः । तथा हि ।

[3]वसुदेवदुःखहारी नारीनयनोत्सवो जलदकालः ।
शौरिरिव [4]सीरिमित्रं [5]कंसंमदाविच्युतं कुरुते ॥ २८ ॥

(नेपथ्ये ।)

आः पाप, कोऽयमलीकवैतालिकः सकलसुरासुरचक्रचूडामणिमयूखमांसलप्रतापाग्निनिर्दग्धवैरिजातस्य त्रिभुवनजयलक्ष्मीविभ्रमावासमण्डपस्तम्भायमानप्रचण्डभुजदण्डस्य सकलवीरवंशावतंसस्य कंसस्यापि मदप्रच्यवमभिलषन्वाचाटतां प्रकटयति ।

**नटी**—(सोत्कम्पम् ।) अज्ज, को एसो जस्स आआलिअप्पलअवादविहडन्तबम्हण्डखण्डपप्फुरन्तघोरणिग्घोसबोलन्तदहदिहामुहो एक्ककालगज्जन्तदिग्गअविमुक्कचिक्कारकक्कसो कण्ठधुणी सुणीअदि । (ख)

**सूत्रधारः**—अये, ममाप्ययमपरिचितः । (निपुणं निरूप्य ।) नूनमसौ

अस्मद्वचःप्रतिफलन्निजनामधेय-
वर्णावलीश्रवणरोषकषायिताक्षः ।

---

(क) तथा ।

प्रणमत जलधरसमयं विद्युदुज्ज्वलसौम्यश्यामसुभगाश्रियम् ।
यं दृष्ट्वा दिशां कदम्बमुकुलैर्भवन्ति पुलकानि ॥

(ख) आर्य, क एष यस्याकालिकप्रलयवातविघटमानब्रह्माण्डखण्डप्रस्फुरद्घोरनिर्घोषशब्दायमानदशदिङ्मुख एककालगर्जद्दिग्गजविमुक्तचीत्कारकर्कशः कण्ठध्वनिः श्रूयते ।

---

१. 'जंस्सि दहदिसाणं' इति क-पाठः. 'यस्मिन्दशदिशां' इति तच्छाया. २. 'सर्व' इति ख-पाठः. ३. वसुदेवः श्रीकृष्णजनकः. जलदकालपक्षे त्वस्फुटोऽर्थः. ४. सीरी बलदेवः; (पक्षे) सीरिणो हालिकाः. कर्षका इति यावत्. ५. कंसः कृष्णमातुलः. तं मदविच्युतं निर्मदं कुरुते; (पक्षे) कं जनं संमदेन हर्षेण विच्युतं रहितं कुरुते. अपि तु न कमपि.

आभङ्गुरभ्रुकुटिभीषणभालपट्टः

कंसः करालकरवालनिविष्टमुष्टिः ॥ २९ ॥

न तदस्य पुरतः स्थातुमस्माकमुचितम् । यतः ।

पितरं भगिनीं भामं भागिनेयाञ्जिघांसता ।

तृणीकृता घृणा येन स किमस्मानुपेक्षते ॥ ३० ॥

तदेहि । अन्यतो गच्छावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

---

(ततः प्रविशति यथानिर्दिष्टः कंसः ।)

**कंसः**—(साटोपं परिक्रम्य । सक्रोधम् ।) किमात्थ रे, किमात्थ 'कंसं मदविच्युतं कुरुते' इति । ननु रे, नाद्यापि विदितस्ते त्रिभुवनैकवीरो निर्मिताशेषदुर्मदध्वान्तध्वंसः कंसः ।

यद्दोर्दीप्यत्प्रतापानलबहलवलज्ज्वालजालावलीढः

शिश्ये शौरिः पयोधौ तुहिनगिरिदरीष्वन्धकारिर्निलिल्ये ।

ब्रह्मा पद्मासनः सन्गमयति समयं तापसच्छद्मना त-

द्रक्षोयक्षोरगाणामिह बत कतमो वीक्षितं मे क्षमेत ॥ ३१ ॥

(हस्तौ निष्पीड्य ।) ननु रे,

कारागारनियन्त्रितासुरसुरस्त्रीनेत्रकादम्बिनी-

निर्यद्वारिसारिज्झरव्यतिकरैर्निर्वाप्यमाणोऽपि यः ।

उच्चैरौर्व इव प्रजिज्वलयिषुर्ब्रह्माण्डमुज्जृम्भते

कस्तं वा मम दोर्मदं दमयितुं जागर्ति लोकत्रये ॥ ३२ ॥

(नेपथ्ये ।)

आः, कथमित्थं विकत्थसे । ननु रे,

यस्ते मदं दमयिता दनुजेन्द्रकालो

बालः स कोऽपि भगवान्क्वचिदप्रमेयः ।

---

१. 'हस्ते' इति ख-पाठः. २. भामं भगिनीपतिम्. ३. अन्धकारिः शिवः.

संवर्धते गिरिगभीरगुहाविहार-
तन्द्रालुकेसरिकिशोर इवाविभाव्यः ॥ ३३ ॥

**कंसः**—(सातङ्कम् ।) कथमियमाकाशे दुरुपश्रुतिः श्रूयते । न चाशरीरा दैवी वागर्थेन विसंवदते कथंचित् । संभावितश्चायमर्थः । निसर्गविद्वेषिणो हि देवा बहुधास्माभिः कदर्थिता वैरप्रतियातनाय स्वयमशक्ता अपि बहुधावतीर्णमेव[1] पुराणपुरुषं पुनरवतारयिष्यन्तीति । कथितश्चायमर्थः पूर्वमप्यन्तरिक्षचारिण्या वाण्या वसुदेवेन निवृत्तपाणिग्रहणां स्वसारं देवकीं प्रस्थापयतो मम । यथा—'अस्यास्त्वामष्टमो गर्भो हन्ता यां वहसेऽबुध' इति । तदाकर्ण्य च ततः प्रतीपमाशङ्कमानेन मया देवकीवसुदेवौ दृढनिगडयन्त्रितौ कारागारमारोपितौ । तद्गर्भाश्चोत्पतन्त एव बहवो व्यापादिता एव । संप्रति तु शिलातले निपात्यमानया दारिकया योगमायया हस्तादुत्प्लुत्य गगनतलमुत्पतितया प्रागुक्तमेव । नारदेनापि पुनरुक्तं यत्किल 'वसुंधराभारावताराय गृहीतवर्णिकान्तरः कं[2]पटपटुर्बटुनाटितकेन वैकुण्ठनाथः सपरिजनो गोकुले प्रच्छन्नरूपः संचरति' इति । तदस्यानर्थबीजस्य प्रतिक्षेपे नोपेक्षितुं युक्तम् । भवतु तावत् । (प्रकाशम् । नेपथ्याभिमुखम् ।) कः कोऽत्र भोः ।

(प्रविश्य ।)

**दौवारिकः**—जयदु जयदु महाराओ । एसह्मि । (क)

**कंसः**—हेमाङ्गद, समाहूयतां महामात्यः ।

**हेमाङ्गदः**—जं देवो आणवेदि । (इति निष्क्रम्य तेन सह प्रविश्य ।) इदो इदो महामच्चो । एसो महाराओ तुमं चिरं पडिक्खन्तो चिट्ठदि । ता उपसप्प णम् । (ख) (संस्कृतमाश्रित्य ।)

---

(क) जयतु जयतु महाराजः । एषोऽस्मि ।

(ख) यद्देव आज्ञापयति । इत इतो महामात्यः । एष महाराजस्त्वां चिरं प्रतीक्षमाणस्तिष्ठति । तदुपसर्पैनम् ।

---

१. 'बहुधावतीर्य तमेव' इति क-पाठः. २. 'कपटपटुपटु–' इति ख-पाठः.

हेलोत्खातदिगन्तदन्तिदशनैः संस्त्यानदानद्रव-
द्रोणीश्यामलकान्तिभिर्विरचितं सिंहासनं मण्डयन् ।
रज्यल्लोचनकोणशोणकिरणं चन्द्रातपत्रं दध-
त्स्वर्बन्दीकरचामरैः परिचितो देवोऽयमास्ते पुरः ॥ ३४ ॥

**महामात्यः**—(पुरोऽवलोक्य । राजानं निर्वर्ण्य ।) कथमयं रसान्तरावेशविलक्ष इवालक्ष्यते । तथा हि ।

निःश्वासैः परुषैर्विशुष्यदसकृल्ल्याददश्यमानाधरं
स्विद्यद्भालकपोलरागमधिकं नेत्रेऽरुणिम्नार्जयन्[1] ।
वक्त्रं किंचिदिवाञ्चयन्नुपरतव्यापारमन्ताश्चिरं[2]
चिन्ताकुञ्चितलोचनाञ्चलमहो देवः परिध्यायति ॥ ३५ ॥

तदत्र महता केनचिद्भयरोषद्वैराज्यावेशबीजेन[3] भवितव्यम् । भवतु परिज्ञास्यामि तावत् । (उपसृत्य ।) जयतु जयतु महाराजः ।

**कंसः**—महामात्य, इत आस्यताम् ।

**महामात्यः**—(उपविश्य ।) देव, दिष्ट्या वर्धसे ।

स्वैरास्वादितशत्रुशोणितमधुव्याघूर्णमानाङ्गया
बन्दीभूतसुरेन्द्रवृन्दवनिताबाष्पाम्बुभिः स्नातया ।
स्फूर्जत्तावककान्तकीर्तिवसनप्रान्तेन संवीतया
निर्व्याजं परिरभ्यते तव भुजस्त्रैलोक्यराज्यश्रिया ॥ ३६ ॥

तत्किमपि चिन्तानिमित्तं ज्ञातुमिच्छामि ।

**कंसः**—किमिह चिन्तास्थानम् । यतः ।

निष्कण्टकं विरतवैरमपास्तशङ्कं
दासीकृतामरगणं हृतदिक्करीन्द्रम् ।
त्रैलोक्यमेव विहितं दनुजैश्चिरं त-
च्चिन्तानिमित्तमिह नस्तु किमस्तु वस्तु ॥ ३७ ॥

---

१. 'नेत्रारुणिम्ना' इति क-पाठः. २. 'इवाञ्चयन्' इति ख-पाठः. ३. 'द्वैराज्यदोष-' इति ख-पाठः.

तथापि दुरुपश्रुति[1]श्रवणसंभवशङ्कापिशाचिका किमप्युत्तरलयति मे चेतः । तथा हि ।

रिपुरिति दुरुपश्रुतिः श्रुतिं मे व्यथयति यद्यथातथं तथापि ।
जलधररसितं प्रकोपहेतुर्भवति हि बृंहितशङ्कया मृगारेः ॥ ३८ ॥

**महामात्यः**—महाराज, कासौ दुरुपश्रुतिः ।

(कंसः 'यस्ते मदं दमयिता' इत्यादि पठति ।)

**महामात्यः**—(स्वगतम् ।)

नैषा मृषा भवितुमर्हति देववाणी
नाणीयसीमपि नृपोऽर्हति हन्त चिन्ताम् ।
किं संप्रति प्रतिविधेयमिह प्रतीपे
दैवे प्रयुक्तमखिलं खि[2]लतां प्रयाति ॥ ३९ ॥

भवतु तावत् । (प्रकाशम् ।) महाराज, अलमनया चिन्तया । यतः ।

दर्पोद्धुरेषु चतुरङ्गबलाधिकेषु
भ्रूभङ्गमात्रपरिनिर्जितनिर्जरेषु ।
त्वत्पादमूलपरिवर्तिषु मादृशेषु
नामापि शत्रुरिति हन्त कु[3]तः प्रसिद्धम् ॥ ४० ॥

या चेयं दुरुपश्रुतिरित्युदाहृता देवेन तन्न किंचिदेतत् । यतः ।

पदे पदे प्रस्खलता मोहोपहतचेतसाम् ।
सु[4]रोपजीविनामित्थं प्रलापा नहि दुर्लभाः ॥ ४१ ॥

अन्यच्च विज्ञापयामि—भूतार्थमेतदुदाहृतं देवस्य । नीतिशास्त्रं पुनरन्यादृशम् । तथा हि ।

नावज्ञेयो रिपुरिति लघुः क्षीणसत्त्वोऽपि विज्ञै-
र्हन्तारण्यं दहति शनकैः संचिताङ्गः स्फुलिङ्गः ।
किं च न्यञ्चन्निभृतनिभृताकुञ्चिताङ्गो बिडालः
कालापेक्षी ग्रसति सहसालक्षितोत्फालमाखुम् ॥ ४२ ॥

---

१. 'श्रवणशङ्कापिशाची' इति क-पाठः. २. व्यर्थत्वमित्यर्थः. ३. 'न नः' इति क-पाठः. ४. सुराया मद्यस्य; (पक्षे) सुराणां देवानाम्.

न च संप्रत्यव्यञ्जितविक्रिया इति विस्मृतवैराः संभावयितुमर्हाः । नीतिर्हि तादृशी भविष्णूनाम् । यदुदाहरन्ति—

'कौर्मं संकोचमास्थाय प्रहारमपि मर्षयेत् ।

प्राप्ते तु काले नीतिज्ञ उत्तिष्ठेत्कालसर्पवत्' ॥ ४३ ॥ इति

विशेषतश्च न बहुशोऽपक्रियमाणा विश्वसनीयाः । अविश्रमो हि वैरनिर्यातनाधिकारः । तथा हि ।

उदितमुदितं हन्ति ध्वान्तं सहस्रकरः करै-

र्निहतनिहतं भूयो भूयस्तमः परिजृम्भते ।

विरमति तमो नेदं नायं निषीदति भानुमा-

न्न खलु विकसद्वैरा धीराः कथंचिदुदासते ॥ ४४ ॥

तदत्रावश्यमकुतोभयेनापि संनिहितात्याहितेनेव देवेनावहितेन भवितव्यम् । यतः ।

क्रूराः केसरिणस्तुषारशिखरिद्रोणीषु संशेरते

नागेन्द्रा अपि संचरन्ति विकटे विन्ध्याटवीकोटरे ।

धत्तेऽसौ भुजगेश्वरोऽपि धरणिं पातालमूले वस-

न्प्रायः पौरुषभूषणा नयविदो जातु प्रमाद्यन्ति न ॥ ४५ ॥

**कंसः**—एवमेतत् । किं तु चिन्तयामि, कथममी प्रच्छन्नकौलिकाः कपटपटवः सर्व एकपद एव सुनिग्रहा इति ।

**महामात्यः**—(चिरं विचिन्त्य ।) महाराज,

यज्ञायत्तं जीवितं देवतानां यज्ञाः साङ्गा ब्राह्मणेष्वायतन्ते ।

ते चाप्येते धर्मकर्मैकमूला मूले छिन्नेऽस्तैव वार्तामराणाम् ॥ ४६ ॥

एषु च निगृहीतेषु सर्वनिदानमेकादशात्मा विष्णुरपि सुनिग्रहः । यत्स्मरन्ति—

'विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ।

श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनुः' ॥ ४७ ॥ इति ।

**कंसः**—ममाप्येष परामर्शः । (नेपथ्याभिमुखमवलोक्य ।) कः कोऽत्र भोः ।

---

१ 'कृष्णसर्पवत्' इति पञ्चतन्त्रादिधृतः पाठः. २ 'संनिहितभृत्याहितेनैव' इति ख-पाठः.

(प्रविश्य ।)

**वेत्रहस्तः पुरुषः**—जयदु जयदु भट्टा। एसोह्मि। आणवेदु भट्टा। (क)

**कंसः**—वेत्रधर, समादिश निदेशवर्तिनः[1]—

हन्यन्तां द्विजदेवसेवनपराः सर्वेऽपि वर्णाश्रमा
ध्वंस्यन्तां दमदानसत्यनियमस्वाध्याययज्ञादयः ।
पीड्यन्तां च तपोवनानि परितस्तीर्थानि पुण्याश्रमा
बध्यन्तामचिरात्सुरा हरिहरब्रह्मादयः सानुगाः ॥ ४८ ॥

**वेत्रहस्तः**—जं भट्टा आणवेदि। (ख) (इति निष्क्रान्तः।)

**कंसः**—महामात्य, त्वमपि स्वं नियोगमशून्यं कुरु। वयमप्यनन्तरकरणीयाय प्रयतामहे[2]।

(इति निष्क्रान्ताः सर्वे ।)

इति कंसवधे प्रथमोऽङ्कः ।

---

द्वितीयोऽङ्कः ।

(ततः प्रविशति तालजङ्घः ।)

**तालजङ्घः**—आदिष्टोऽस्मि तत्रभवता महामात्येन यत्किल 'अस्मद्भर्गनिसर्गवैरिणः पुराणपुरुषस्य नराकारधारिणः क्वापि[3] प्रच्छन्नः प्रभवः श्रूयते। तत्प्रवृत्तिमुपाहर' इति। तत्किमत्र प्रतिपद्ये। यतः।

अन्विष्टा गिरिकंदरोदरसरित्कान्तारपुण्याश्रमाः
स्वःपातालमहीतलेषु परितश्चारैश्चरद्भिश्चिरम् ।
नाभूत्कर्णपथातिथिर्दितिकुलारातिप्रथा सर्वथा
तत्किं वाद्य निवेदयाम्यविदितादिष्टार्थसारः प्रभुम् ॥ १ ॥

(चिरं विचिन्त्य। दीर्घं निःश्वस्य।) हन्त भोः,

अघटनघटनपटीयानेकः किल केवलं कालः ।
संभाव्यतेऽद्य डिम्भाज्जृम्भारिजितोऽपि यत्प्रभोर्भीतिः ॥ २ ॥

---

(क) जयतु जयतु भर्ता। एषोऽस्मि। आज्ञापयतु भर्ता।

(ख) यद्भर्ताज्ञापयति।

---

१. 'उपजीविनः' इति ख-पाठः. २. 'सज्जीभवामः' इति ख-पाठः. ३. 'क्वचित्' इति ख-पाठः.

(स्मृतिमभिनीय सहर्षम् ।) अये, अस्ति किलैषा किंवदन्ती । यत्

'यशोदया लाल्यमानो नन्दगोपस्य गोकुले ।
बिडम्बयन्बाललीलां वासुदेवोऽभिवर्धते' ॥ ३ ॥ इति ।

तं चातिमानुषगुणाकृतिपौरुषाद्यै-
राद्यं पुमांसमनुमाय निहन्तुमेनम् ।
प्राक्प्रेषिताः शकटधेनुकपूतनाद्या
नाद्यापि हन्त विनिवर्तितुमुत्सहन्ते ॥ ४ ॥

भवतु । तावद्गोकुलपरिसरमेवानुसरामि । (इति परिक्रम्य पुरोऽवलोक्य ।) अये, कथमयं गोकुलनिवासी गोपानां सौवस्तिको[1] ब्राह्मण इत एवाभिवर्तते । तदस्मादेव निःशेषां प्रवृत्तिमुपालप्स्ये । (उपसृत्य ।) गर्ग, प्रणम्यसे ।

**गर्गः**—कुशली भव ।

**तालजङ्घः**—कियद्दूरं प्रस्थितोऽसि ।

**गर्गः**—नन्दादेशाद्गोकुलोत्पातानुपशमयितुं ध्रुवतीर्थं गच्छामि ।

**तालजङ्घः**—अथ किं गोकुले ।

**गर्गः**—महत्येव दुरवस्था हा कष्टं कष्टं[2] समाधीयते । तथा हि ।

वेतालग्रहपूतनाप्रभृतयो बालग्रहाः शान्तिकै-
र्नीता बल्युपहारमन्त्रमणिभिः शान्तिं कथंचिन्मया ।
उत्पाताः शकटासुरप्रभृतिभिर्दैत्यैः कृतास्ते पुन-
र्बालेनाद्भुतकर्मणा स्वयमहो कृष्णेन नीताः क्षयम् ॥ ५ ॥

**तालजङ्घः**—(स्वगतम् ।) तदेतत्प्रस्तूयते यदर्थोऽयमस्माकमायासः । (प्रकाशम् ।) स्पष्टं तावत्प्रपञ्च्यतां कः केन हत इति ।

**गर्गः**—

पूर्वं कौचिदुपस्थितौ तरुवरव्याजेन नन्दाङ्गणे
बुद्ध्वाकस्मिकमेष रिङ्गणपरो बालो विशालोर्जितः[3] ।

---

१. स्वस्तिकृत्. पुरोहित इति यावत्. २. 'कष्टं कष्टं समास्थीयते' इति ख-पाठः. ३. 'विशालोर्जितौ' इति ख-पाठः.

मात्रा मध्यनिबद्धदामकलितान्तोलूखलाकर्षणा-
दारुग्णौ यमलार्जुनौ समहरद्दीर्घार्तिघोरस्वरौ ॥ ६ ॥

**तालजङ्घः**—(स्वगतम् ।) तावेतौ नारदशापवशादवाप्ततरुभावौ नलकूबरमणिग्रीवौ भगवत्संनिधानैकोपनेयशापान्तौ कुबेरतनयौ । (पुनः सातङ्कम् ।) तन्नूनमयमेव भगवतोऽवतारो बाललीलामनुभवन्भविष्यति । भवतु । ज्ञास्यामि तावत् । (प्रकाशम् ।) अथापरमावेदय ।

**गर्गः**—

कंसादेशवशात्प्रविश्य शिबिरं नन्दाङ्गणेऽवस्थितं
पापिष्ठं शकटं विभाव्य कपटं बालोऽथ कालोपमः ।
तत्सौवस्तिकविप्रवाचनविधिव्यग्रीभवच्चिन्तया
मात्रा किंचन वञ्चितः क्षितितले क्षुत्क्षामदेहो लुठन् ॥ ७ ॥

**तालजङ्घः**—(सावष्टम्भम् ।) ततस्ततः ।

**गर्गः**—

क्षीरस्यार्तिभरोत्क्षिप्तचरणाङ्गुष्ठनोदितम् ।
पर्यास्थच्छकटं कूटं जर्जराङ्गास्थिपञ्जरम् ॥ ८ ॥

**तालजङ्घः**—अहह, असमञ्जसमसमञ्जसम् । अथान्येषां को वृत्तान्तः ।

**गर्गः**—

वात्यावर्तविवर्तनव्यतिकरादादाय बालं बला-
दन्धीकृत्य जनं जवादुदपतद्दूरं तृणावर्तकः ।

**तालजङ्घः**—(साश्वासम्[2] ।) ततस्ततः ।

**गर्गः**—

तं च क्ष्माधरभारभूरिगरिमा व्यालम्ब्य कण्ठे हठा-
दायच्छन्समपोथयत्पृथुशिलापट्टे निपात्यार्भकः ॥ ९ ॥

**तालजङ्घः**—अहो दुरवस्थेदानीं जयास्था[3] ।

यस्मिन्धावत्यमरनगरीलुण्ठनोत्सर्पिदर्प-
स्फूर्जज्जङ्घाजवपरिणमच्चण्डवात्याविवर्तैः ।

---

१. 'आभुग्नौ' इति ख-पाठः. २. 'साश्वासम्' इति ख-पुस्तके नास्ति. ३. 'जयावस्था' इति क-पाठः.

उच्चैर्भ्राम्यन्नभसि निदधे शृङ्गमुत्पाट्य मेरोः
क्रन्दत्संक्रन्दनमधुकरं लूननालं यथाब्जम् ॥ १० ॥

तस्यापि ते मनुष्यगर्भादपीदृशी दशा।

**गर्गः**—

रिष्टोऽपि दुष्टदिष्टाकृष्टः कण्ठावगुण्ठने तिष्ठन्।
दष्टोऽच्युतेन दशनैर्दष्टो[1] नष्टः क्षणार्धेन ॥ ११ ॥

**तालजङ्घः**—हा धिक्, कष्टं भोः। अथ पूतनायाः का वार्ता।

**गर्गः**—यापरेषाम्। तथाहि।

कृत्वा रूपं त्रिभुवनमनोमोहनं पाययन्ती
स्तन्यं हालाहलमयमथानेन निष्पीतसारा।
हा धिक्कष्टं किमपि सहसा राक्षसी पर्यणंसीत्

**तालजङ्घः**—(सोत्साहम्।) ततस्ततः।

**गर्गः**—

क्रूराक्रन्दैर्बधिरितजगत्तत्क्षणाच्च व्यरंसीत् ॥ १२ ॥

**तालजङ्घः**—हा वत्से, अनूष्मणि शलभायितासि।

घुणेन प्रोत्कीर्णा तदहह शिला वज्रघटिता
*न शम्पासंपातात्किमपि[2] शतधाशीर्यत तृणैः।*
विलिल्ये प्रालेयक्षितिरपि न खद्योतमहसा
यदाधत्से वत्से किमपि नरडिम्भादभिभवम् ॥ १३ ॥

(दीर्घमुष्णं च निःश्वस्य।)

स्वाराज्यैकफले रिपुक्षयमखे देवद्विजाघारके[3]
कंसस्यानुशयानलेऽसुरयशःक्षीराहुतीर्जुह्वता।
त्वं धाय्या[4] विहितासि हन्त विधिना वत्से न जाने पुनः
का पूर्णाहुतिरुत्तमा तदमुना क्रूरेण कारिष्यते ॥ १४ ॥

१. 'दुष्टो' इति ख-पाठः. २. 'अथ' इति ख-पाठः. ३. आघारो घृताहुतिविशेषः. 'देवद्विषद्याजके' इति क-पाठः. ४. अग्निसमिन्धनमन्त्रः.

**गर्गः**—तदपि नातिचिरादेव स्फुटीभावमुपैष्यति । अतिचपलः किल कालकौलेयको नास्मदुपेक्षाक्षणक्षेपं क्षमते ।

**तालजङ्घः**—ततस्ततः ।

**गर्गः**—ततश्च तथा तथोत्पातपरम्परापराभूयमाना व्रजवासिन उपनन्दनाम्ना गोपवृद्धेनोपमन्त्र्य गोकुलादुदुष्य नातिदूरे निरामयं बहलजलं मिलदुलपशबलं वृन्दावनमध्यमध्यूषुः ।

तत्रापि वसता तेन सबलेनाघहारिणा ।
लीलामात्रेण निहताः प्रलम्बबकधेनुकाः ॥ १५ ॥

**तालजङ्घः**—(सवैक्लव्यम् ।) हा वत्साः, कथमकस्मादेव दशमीं दशामापन्नाः स्थ । (सरोषम् ।) कथमयमतिप्रसजति कालकालकौलेयकः । ननु रे कृतान्तहतक,

*विद्राणेषु दिगीश्वरेषु समिति द्रागुत्प्लुतिप्रद्रुत-*
क्रुध्यत्कासरतुङ्गशृङ्गविधुतिव्याविद्धगात्रः पतन् ।
कारागारनिकारमाशु गमितः संतर्ज्यमानो भटैः
काकुव्याकुलगीः कृपावशहृदा न त्वं मया मोचितः ॥ १६ ॥

तदधुना न भविष्यसि ।

**गर्गः**—(स्वगतम् ।)

अपि स्यादस्माकं किमपि कुशलं गोकुलभुवां
(निःश्वस्य ।) कुतो वा कल्याणं प्रकृतिकुटिले राजनि रिपौ ।
(सावष्टम्भम् ।) अये शान्तं पापं यदि स भगवान्किंचन कृपा-
कटाक्षप्रक्षेपैः क्षपयति विपक्षप्रातिभयम् ॥ १७ ॥

**तालजङ्घः**—क्व पुनरिदानीं निर्भराश्चर्यगर्भोऽर्भकाकारवर्णिकाप्रच्छन्नोऽघटनघटनापटीयान्नटवपुः साक्षादीक्षणातिथिः स्यात् ।

---

१. 'तदप्यचिरादेव स्फुटीभवितुमुपैष्यति' इति ख-पाठः. २. 'उत्प्रेक्षा' इति ख-पाठः.
३. 'गोकुलाददूरे बहलजलं' इति ख-पाठः. ५. 'नटपटु' इति क-पाठः.

**गर्गः**—श्रुतं मया नातिचिरादेव गोकुलोपशल्यमुपेयुषा यत्किल

धनुर्यज्ञोत्सवे कृष्णं सबलं मातुलः किल ।
निनीषुर्मथुरामेष क्रूरोऽप्यक्रूरमादिशत् ॥ १८ ॥

**तालजङ्घः**—सखे, यथादिष्टमनुष्ठीयताम् । अहमपि वृन्दावनपरिसर एवैनमनुसरामि । (इति निष्क्रम्य ।) तदेतद्वृन्दावनम् । अन्वेषयाम्येनम् । (इति परिक्रामति ।)

(नेपथ्ये ।)

रे रे व्रजवासिनः, सावधाना भवत । नन्वयमनुपतति नेदीयानेव

कोपाटोपातिवल्गद्विकटखुरपुटप्रस्फुटद्भूमिपृष्ठा-
दुत्तिष्ठद्भिर्गरिष्ठैर्व्रजजननयनान्यन्धयन्धूलिजालैः ।
कुर्वन्द्यामेष हेषारवशतबधिरां वालधिं प्रोद्धुनान-
श्चूडावालान्तरालप्रणिहितकपिलक्रूरतारस्तुरंगः ॥ १९ ॥

**तालजङ्घः**—(सातङ्कम् ।) आः, किमेतत्स्यात् ।

न खलु सुरभिसैरभीसमृद्धे शिशुचलकर्णकतर्णकावकीर्णे ।
अतिचकितजनव्रजे व्रजेऽस्मिन्ननुपधिरेष तुरंगमप्रचारः ॥ २० ॥

(पुनर्नेपथ्ये ।)

धावन्धीरं धरायां क्षणमथ विदधद्धौरितं धूतमूर्धा
चञ्चन्यञ्चत्खुराग्रक्षणधरणिरजोधोरणीदुर्विभाव्यः ।
चित्रं चङ्क्रम्यमाणश्चिरमथ सहसा संभ्रमं बिभ्रदुर्वी-
गर्वाग्गर्वादखर्वाद्विरुजति जनताः सर्वतः पर्वताभः ॥ २१ ॥

**तालजङ्घः**—(निपुणं निरूप्य ।) नूनमनेन महाराजनिर्दिष्टेनाश्ववर्णिकाप्रच्छन्नमूर्तिना विविधमायाविषपटीयसा केशिना भवितव्यम् । (सहर्षम् ।) तदनेन सकलसुरासुरचक्रदुःसहपराक्रमेण तत्क्षणादेवास्मत्प्रतिपक्षः सपक्षो व्यापादयिष्यते । साधु रे केशिन्, साधु । कृतकृत्योऽसि । यतः ।

---

१. पुच्छम्. २. 'चूला' इति क-पाठः. ३. गोमहिषीसंपन्ने. ४. सद्योजातवत्सव्याप्ते. ५. निश्छलः. ६. धौरितमश्वगतिविशेषः.

दर्पोद्धुरेषु निहतेषु निशाचरेषु
मायासु मायिनी खिलत्वमुपेयुषीषु ।
कंसस्य भृत्यनिवहैरिह यद्विपक्ष-
पक्षक्षयक्षमतयाद्य विभावितोऽसि ॥ २२ ॥

(पुनर्नेपथ्ये ।)

रे रे गोपालाः, दिष्ट्या जीविताः स्मः ।

परित्यजत साध्वसं भजत धीरतां नेत्रयो-
र्जहीत विनिमीलिकां भवत भूबिलेभ्यो बहिः ।
विदीर्णमुखकंदरोदरनिविष्टमुष्टिक्षत-
क्षरद्रुधिरधोरणिः स निहतो वयस्येन नः ॥ २३ ॥

**तालजङ्घः**—(ससंभ्रमम् ।) कथं सत्यमेव निहतः । (निपुणं निरूप्य ।)
अहह,

वमति रुधिरधारां नासिकानालरन्ध्रा-
ल्लुठति धरणिपीठे क्ष्मां खुराग्रैः क्षुणत्ति ।
घुरति किमपि घोरं केसराण्युद्धुनीते
तदणुमपि विलम्बं न क्षमन्तेऽसवोऽस्य ॥ २४ ॥

हन्त भोः, वज्रसाराणि हृदयानि जीवलोकस्य । यदेवमनेकधा कुलक्षयमध्यक्षयन्नपि प्राणिमि । तदस्मिन्निहते नूनमासन्नमत्याहितं महाराजस्य दैवैकचिकित्सनीयमालोकयामि । यतः ।

वाचा नाचरितं दृशा न कलितं कर्णेऽपि नाकर्णितं
चित्तेनापि न चिन्तितं न च पुनः स्वप्नेऽपि संभावितम् ।
दैवज्ञैर्न निवेदितं न पिशुनैराशङ्कितं कर्हिचि-
त्तत्तादृग्व्यसनं विधिर्घटयति क्रूराशयः प्राणिनाम् ॥ २५ ॥

तदेनं वृत्तान्तमुपहरामि महामात्यस्य । (इति निष्क्रान्तः ।)

इति कंसवधे द्वितीयोऽङ्कः ।

---

१. श्रीकृष्णे. २. निष्फलत्वम्. ३. श्रीकृष्णेन.

तृतीयोऽङ्कः।

(ततः प्रविशति रथारूढोऽक्रूरः सारथिश्च।)

**अक्रूरः**—(दीर्घमुष्णं च निःश्वस्य।) हन्त भोः,

असारे संसारे विषविषमपाके नृपसुखे
कृतान्तेनाक्रान्ते प्रकृतिचपले जीवितबले।
ध्रुवापाये काये विषयमृगतृष्णाहतहृदः
परप्राणैः प्राणानहह परिपुष्णन्ति कुधियः॥ १॥

अहो, अस्य दितिजकुलकलङ्कस्य कंसस्य निर्विवेकता निर्घृणता च। यतः।

स्वस्त्रीयेषु हतेषु सप्तसु मनाङ् नाद्यापि निर्विद्यते
तादृक्चेदयमष्टमोऽपि किमितस्त्रासेन संभ्रम्यते[1]।
कस्त्रातुं प्रभवेद्भवेद्यदि हरिर्हन्तावतीर्णः स्वयं
मृत्यौ जन्मवतां ध्रुवे[2] च मरणं श्रेयः परं श्रीपतेः॥ २॥

(विमृश्य।) अथवा किमेनमासुरीमतिदारुणां प्रकृतिमाश्रितमुपालभे। ननु तावदहमात्मानमेव तादृशे नृशंसे कर्मणि प्रवर्तमानमाकलयामि। तथा हि।

राजाराधनतत्परेण सहसा स्वीकुर्वता शासनं
कृत्याकृत्यविचारवञ्चितधिया धर्मोऽपि नापेक्षितः।
स्पृष्टा नैव घृणा तृणाय च मतो लोकस्त्रपाप्युज्झिता
धिक्कुक्षिंभरिणा मयाद्य कृपणाः प्राणाः परं पोषिताः॥ ३॥

**सूतः**—आयुष्मन्, कथमयं महाराजो जानन्नपि स्वजनसंबन्धमतिस्नेहपर्याकुलहृदयेन भवता वत्सौ रामकृष्णावुपनिनीषति।

**अक्रूरः**—सूत, सोऽयं कुटिलनीतिपण्डितः परस्परमस्मासु विरोधमुत्पाद्य सुन्दोपसुन्दन्यायेन सर्वानेवास्मान्संजिहीर्षति। तथा हि।

नानेष्ये यदि तौ ध्रुवो मम वधस्तच्छासनातिक्रमा-
दाहर्तुं यदि यामि वक्ष्यति तदा[3] को वा न मां सौनिकम्[4]।
निन्देन्नन्दनविप्रयोगविवशो मां नन्दगोपो जर-[5]
ज्ज्ञातिर्द्रक्ष्यति वा चिरादहरहः शप्स्यन्ति गोपाङ्गनाः॥ ४॥

---

१. 'संभाव्यते' इति ख-पाठः. २. 'ध्रुवं' इति ख-पाठः. ३. 'ततः' इति ख-पाठः. ४. हिंसकम्. ५. वृद्धः.

**सूतः**—आयुष्मन्, अपि नाम महाराजाज्ञागौरवनियन्त्रणात्कथमपि तथोपसीदन्तं तत्रभवन्तं भगवान्वासुदेवो न प्रतीपमाशङ्किष्यते ।

**अक्रूरः**—सूत, सत्यमात्थ ।

दुर्जनवशवर्तिनमिह चिरतरविरहेण लुप्तसौहार्दम् ।
न प्रत्येति स्वजनं मृग इव मृगयूपसर्पिणं हरिणम् ॥ ५ ॥

तथापि ।

सर्वान्तरात्मा भगवान्सर्ववृत्त्यवबोधकः ।
न मामनन्यशरणमन्यथा प्रतिपत्स्यते ॥ ६ ॥

**सूतः**—आयुष्मन्, प्रत्यासीदति सायंतनः समयः । तत्त्वर्यताम् । रामकृष्णावलोकनेन नयने सफलयावः ।

**अक्रूरः**—(क्षणं ध्यात्वा सहर्षम् ।) हन्त भोः, स एष दारुणतरे दारकाहरणकर्मणि नियुञ्जानेन महाराजेन प्रयुक्तो निग्रहोऽप्यनुग्रहायैव कल्पिष्यते मयि । अद्य खलु

कुवलयदलदामश्यामकान्तिः कलावा-
न्नयनचुलुकनीयः कोऽपि पीयूषराशिः ।
व्रजपरिसरधूलीकेलिलोलः किशोरा-
कृतिकृतिपरिचेयो द्रक्ष्यते ब्रह्मसारः ॥ ७ ॥

**सूतः**—(प्रतीचीमवलोक्य ।) आयुष्मन्, पश्य ।

अहरखिलमशेषज्योतिषामेकशेषः
सकलभुवनवृत्तीः कर्मसाक्षी निरीक्ष्य ।
रथतुरगरजोभिः काञ्चनैः क्रान्तकायो
जलधिमभिनिमङ्क्तुं भानुमानाजिहीते ॥ ८ ॥

**अक्रूरः**—(सहर्षम् ।) सखे, साधु समुन्नीतम् ।

अधिवनमभिधावद्गोखुरोद्धूतधूली-
शबलविमलगात्रः स्फीतपीताम्बरश्रीः ।

---

१. 'मृगयूथसर्पिणं' इति क-पाठः. मृगयुर्व्याधः. २. 'मूर्त्यवबोधकः' इति ख-पाठः. ३. 'पश्य तावत्' इति क-पाठः. ४. 'अधिनिमङ्क्तुं' इति क-पाठः. ५. 'अभिवन' इति ख-पाठः.

व्रजपरिसरमेष्यञ्ज्योतिषां ज्योतिरेकः
सफलयति कदा नश्चक्षुरिन्दीवराक्षः ॥ ९ ॥

**सूतः**—

अस्तं यैतापि किल मस्तकवर्तिनासा-
वस्ताचलोऽहिमरुचा रुचिमभ्यलम्भि ।
प्रायः परोपकृतये कृतिनोऽनपेक्ष्य
स्वार्थं विपत्कवलिता अपि संघटन्ते ॥ १० ॥

**अक्रूरः**—(निपुणं निरूप्य । सानन्दम् ।)

अहिमकरमरीचिधातुरागैः शबलितमम्बुदमण्डलं दधानः ।
अनुहरति गिरिस्तुलां मुरारेर्वलयितचित्रशिखण्डमण्डनस्य ॥ ११ ॥

**सूतः**—अहह, असमञ्जसम् ।

अयमुदयमहीभृन्मस्तकन्यस्तपादः
खरतरकरदुःस्थां प्रौढिमाढौकमानः ।
दिवसमणिरथोच्चैर्द्रोक्परां प्राप्य काष्ठा-
महह विधिविरोधादम्बुधौ मज्जतीति ॥ १२ ॥

**अक्रूरः**—सूत, साधूत्प्रेक्षितम् । तथा हि ।

निर्मज्ज्याधिपयोधि भर्तरि रुचां लोकान्तरं प्रस्थिते
संध्याग्निं विशति प्रमीलति निजेऽम्भोजे दिनश्रीरियम् ।
यत्काष्ठाकर एष रज्यति तमोधूमोऽश्नुते रोदसी
संक्रन्दन्ति खगाः समेत्य ददते विप्राश्च तोयाञ्जलीन् ॥ १३ ॥

(पुनः सूतं प्रति ।) अये, बंहीयानतिवाहितः पन्थाः । तदधुनापि कियदन्तरं नन्दवाटस्य ।

**सूतः**—आयुष्मन्, इतो नेदीयानेव लक्ष्यते । तैदुपगतप्रायानेवास्मानवगच्छ । तथाहि निरूपयत्वायुष्मान् ।

अधितरणितनूजातीरवानीरपाली-
परिसरमतिकाली भाति तालीवनाली ।

---

१. गच्छतापि. २. 'निजाम्भोजे' इति ख-पाठः. ३. 'तदुपात्तप्राया' इति ख-पाठः.

विलसति तददूरेऽतुच्छतापिच्छगुच्छा-

वलिवलयितवल्लीवेल्लिता नन्दपल्ली ॥ १४ ॥

**अक्रूरः**—(निपुणं निरूप्य। ससंभ्रमम् ।) सूत, संभावयामि तावत् ।

गिरिशिखरविरूढप्रौढहिन्तालमाला-

पिहितगगनगर्भभ्राम्यदूर्जध्वजाग्रः ।

विहगविहतवेगव्यग्रशाखाकराग्रै-

स्त्वरयति परिरब्धुं नन्दघोषः किमस्मान् ॥ १५ ॥

**सूतः**—(किंचिदन्तरं गत्वा रथवेगं नाटयन्। पुरोऽवलोक्य।) आयुष्मन्,

उपवनतरुखण्डहिण्डमानाण्डजततिभिर्गृहमेधिहोमधूमैः ।

अपि च शिशुपशूद्धतै रजोभिः किमपि पुरस्तिमिराढ्यं चकास्ति ॥ १६ ॥

(पुनः सविषादम् ।) हन्त भोः,

अस्तमिते दिननाथे चिरयति चन्द्रे स्फुटासु तारासु ।

सहसा तमःप्रधानैर्व्याकुलितं हन्त भूतलं तरलैः ॥ १७ ॥

तथा हि ।

तमःश्यामे व्योम्नि स्फुटकनकलेखाङ्कुरचय-

प्रभा विद्योतन्ते निकष इव खद्योतनिकराः ।

सहस्रांशोरंशा इव चरमशैलव्यतिकरा-

द्विशीर्णाः पर्यस्ताः पथिकपृथुनिःश्वासपवनैः ॥ १८ ॥

**अक्रूरः**—सूत, साधु समर्थितम् । तथा हि ।

मेचकद्युतिदलान्तरलीनज्योतिरिङ्गणचमत्कृतिरम्याः ।

पादपा इह चकासति मेरोः क्ष्मां गता इव हरिन्मणिकूटाः ॥ १९ ॥

(कर्णं दत्त्वा। सहर्षम् ।) हन्त भोः,

स्नेहप्रस्नुतपीवरस्तनभरप्राग्भारभूरिक्षर-

त्क्षीरक्षालनपिच्छिलैः प्रतिपदं मार्गैर्निषिद्धत्वराः ।

हर्षोत्पुच्छयमानतर्णकरवोत्कर्णा व्रजायोत्सुका

गोसंघाः प्रतिहुंकृतैरिह मुहुः श्रोत्रोत्सवं कुर्वते ॥ २० ॥

---

१. भ्रमत्पक्षिसमूहैः. २. 'खद्योतो ज्योतिरिङ्गणः.'

**सूतः**—आयुष्मन्,

चारणेन परिचर्य समन्तादद्रिकाननदरीः परिपूय ।
संप्रति प्रतिनिवर्तयितासौ गोधनानि किल गोकुलनाथः ॥ २१ ॥

तथा हि । आकर्णयत्वायुष्मान् ।

चम्पे[1] चन्दनि चन्द्रिके चमरिके चन्द्रावलि श्यामले
गङ्गे गोमति गौरि गीतरसिके गायत्रि गोदावरि ।
धीरे धीवरि धूसरे धवलिके कालाक्षि कालीति च
व्याहाराः परितो हरन्ति हृदयं हेम्बा[2]रवाश्राविणः ॥ २२ ॥

**अक्रूरः**—(कर्णं दत्त्वा । सानन्दम् ।) सूत, इतोऽपि रमणीयमाकर्ण्यते ।

अनुसृतकरतालैर्वेणुवीणानुयातै-
र्मुखरितकलशृ[3]ङ्गैर्डिम्भडम्फाभिरामैः ।
मधुरमधुरगीतैर्हुङ्कृतैर्गोधनाना-
मिदमुदयति नादाद्वैतमानन्दसान्द्रम् ॥ २३ ॥

(पुनः कर्णं दत्त्वा ।)

क्षीरस्यावेगधावद्रभसनिपतितस्तन्यपानोर्जदोजः-
कूर्दद्वत्सावरोधव्यसनिशिशुशताकूतकोलाहलाढ्यः ।
गम्भीराभीरकुम्भीकुहरपरिणमद्धीरगोक्षीरधारा-
ध्वानोऽध्वन्यध्वगेभ्यः पिशुनयति चिरादेष गोष्ठस्य गोष्ठीः॥२४॥

**सूतः**—(सोत्साहम् ।) अहह, संप्रति

हुंकृतभांकृतहींहीहीकृतधुंधुंधुमारवैर्मुखराः ।
व्याकुलबालकगोकुलवत्सकुलैः संकुलाः ककुभः ॥ २५ ॥

**अक्रूरः**—सूत, समासादितप्रायास्तदिदानीं नन्दघोषोपशल्यभूमयः । तत्संयम्यन्तां प्रग्रहाः । यावद्रामकृष्णचरणनलिनविन्यासपूतपांसुसंपर्कादात्मानं पवित्रयन्तौ पादचारेण गोपुरपरिसरशिखरमारुह्य नन्दनन्दनानुगमनमनुपालयावः ।

---

१. चम्पे इत्यादीनि धेनुसंबोधनानि. २. हम्बा धेनुशब्दः. ३. शृङ्गडम्फादयो वाद्यविशेषाः.

सूतः—साधु मन्त्रितमायुष्मता । तदेते संयता वाजिनः । समवतरत्वायुष्मान् ।

(इति रथादवतरणं नाटयतः ।)

अक्रूरः—(पुरतो निरूप्य । सवितर्कम् ।) अये[1], कथमियं

व्रजपरिसरभूमिष्वापतद्गोखुराग्र-
क्रथनसिकतिलासु व्यक्तपद्मध्वजश्रीः ।
समविषमनिपाता शैशवं व्यञ्जयन्ती
स्मरयति पदपङ्क्तिः कापि कस्यापि पुंसः ॥ २६ ॥

(ध्यानं नाटयित्वा । स्वगतम् ।)

एतद्रूढं सत्समूहैरमूढैर्योगारूढैर्यत्कथंचित्समूढम् ।
लीलोन्मीलड्डिम्भदम्भस्य विष्णोर्वन्दे वेदान्तैकवेद्यं पदं तत् ॥ २७ ॥

(नेपथ्ये कलकलः ।)

अक्रूरः—(कर्णं दत्त्वा ।) अये, कथमयमिदानीं

कासांचिन्नयनाञ्चलं विचलयन्नाभरिवामभ्रुवां
दोर्वल्लीरिह दोहने विकलयन्मौलिं मुहुर्दोलयन् ।
अन्तः कन्दलयन्नमन्दममलामानन्दकन्दावलीं[2]
विघ्नौघं दलयन्मुरारिमुरलीनालीरवः श्रूयते ॥ २८ ॥

(परिभाव्य स्वगतम् ।)

तावन्माध्वीक साध्वी भवतु तव कथा क्षीरपूरासि वन्द्य-
स्तावत्तावच्चकोरी चुलुकयतु चिरं शीतरोचिर्मरीचीन् ।
तावत्पीयूषयूषैर्विदधतु[3] विबुधास्तोषपोषं कथंचि-
द्यावन्नाकर्णितैषा मधुरिपुमुरलीमाधुरीसाधुरीतिः ॥ २९ ॥

(सहसा परावृत्य पुरोऽवलोक्य । सहर्षम् ।) अये, कथमियमित एव

मुखरितकलभृङ्गीमाधुरीसाधुरीति-
क्षरदधरमधूलीमोहिताशेषविश्वः ।
अमलतमतमालश्यामलः कोमलाङ्गः
समुपसरति नेत्रानन्दनो नन्दसूनुः ॥ ३० ॥

---

१. 'अथेयम्' इति ख-पाठः. २. 'मनसां' इति ख-पाठः. ३. 'पीयूषपानैः' इति ख-पाठः.

(चिरं विभाव्य।) कथमयमतिमानुषपौरुषो बाललीलाकलेवरावृतोऽप्यनाद्यन्तब्रह्मास्वादसोदरानन्दमेदुरामुदञ्चयति चेतसो वृत्तिम्। (नेत्रे निमील्य ध्यानं नाटयन्।)

त्वं क्षीराम्बुनिधिं ममन्थिथ जगत्रातुं जघन्थासुरा-
न्दंष्ट्राग्रेण समुज्जहर्थ धरणिं सुष्वप्थ शेषे सदा।
दूरे तस्थिथ किं च वाङ्मनसयोः किं त्वेष नः प्राक्तनैः
पुण्यैरद्य पचेलिमैः किल बलात्पुंभावमालम्बसे॥ ३१॥

**सूतः**—[1]आयुष्मन्, पश्यैतत्। प्रातः प्रोषितयो रामकृष्णयोः प्रत्यागमनमनुपालयन्तौ जरन्तौ यशोदानन्दगोपौ संभृतातिथ्यसंभाराविव एवाभिवर्तेते। तदेतयोः प्रत्यनन्तरीभूय यथेष्टगोष्ठीसमागमसुखमनुभवावः।

**अक्रूरः**—सूत, एवमेतत्। तदेहि। गोपुरपरिसरमेवानुसरामः।

(इति निष्क्रान्ताः सर्वे।)

इति कंसवधे तृतीयोऽङ्कः।

---

## चतुर्थोऽङ्कः।

(ततः प्रविशति वेत्रपाणिः पुरुषः।)

**पुरुषः**—आदिष्टोऽस्मि तत्रभवता पुरोधसा [2]गर्गेण यत्किल मातुलालयाय प्रवत्स्यतोर्वत्सयो रामकृष्णयोस्तारानुकूल्यं परिज्ञातुं दैवज्ञमाज्ञापयेति। तदेन[3]मनुसरामि। (नेत्रे निमृज्योर्ध्वमवलोक्य।) अये, विभातप्राया विभावरी। तथा हि।

तमस्तोमज्योत्स्नारुणकिरणकिर्मीरितरुचि-
र्नभोलक्ष्मीरेषा जयति जगदुज्जीवनकरी।
निशाकल्पे लीनं पुनरपि सिसृक्षोस्त्रिभुवनं
विधातुः सृष्ट्यादौ प्रकृतिरिव वर्णत्रयमयी॥ १॥

(पुनर्निरूप्य।)

इतः शुक्ला चन्द्रद्युतिभिरिह रक्तारुणकरै-
स्तमिस्रैरप्यन्तःस्खलितगतिभिर्मेचकरुचिः।

---

१. 'भगवन्' इति ख-पाठः. २. 'गार्ग्येण' इति क-पाठः. ३. 'अनुसरामीति' इति ख-पाठः.

प्रभातश्रीरेषा विलसति पुरःस्था सुकृतिनां
मिमङ्क्षूणां जह्नुद्युमणिविधिजासंगम इव ॥ २ ॥

(पुरोऽवलोक्य ।) कथमयं दैवज्ञः [2]प्राचीनगोपुरशिखरमध्यमध्यारूढो मित्रोदयं प्रतीक्षमाण आस्ते । तद्यावदुपसर्पामि । (गतिवैकल्यमभिनीय । स्वगतम् ।)

न जराजर्जरैरङ्गैरेतां सोपानपद्धतिम् ।
आरोढुमवरोढुं वा मनागुत्सहते मनः ॥ ३ ॥

अहह, कथं दुर्दैवेन दुःस्थामेनामवस्थां प्रतिलम्भितोऽस्मि । तथा हि ।

अन्यत्रेहितमन्यतो निपतति क्लेशादुदस्तं पदं
मुष्टिर्न क्षमते क्षणं कलयितुं यष्टिं पृथोर्वेपथोः ।
न श्रोत्रे शृणुतश्चिराय परितस्तारस्वरं व्याहृतं
धिक्कष्टं जरसातुरस्य मरणं मन्ये महानुत्सवः ॥ ४ ॥

हन्त भोः,

गलति वदने लाला वाचः स्खलन्त्यपरिस्फुटाः
स्रवति सततं चक्षुर्नासं न संचरतः पदे ।
मुखमदशनं दृष्टिः शून्या वृथा च विचेष्टितं
शिव शिव जरा बाल्यं भूयः प्रसौति नवं नवम् ॥ ५ ॥

अपि च ।

अन्योक्त्या परिचिन्वते परिजनान्संचार्यमाणाः [3]परस्कन्धन्यस्तभुजाश्चिरेण [4]चरणाक्षेपं समातन्वते ।
न स्वेनैव कृतं स्मरन्ति सहसा त्रुध्यन्ति निष्कारणं
वृद्धव्याधितभूभुजः किल समावस्था विधात्रा कृताः ॥ ६ ॥

तदिहस्थ एवैनमाहूय निवेदयामि पुरोधसो निदेशम् । (इति [5]बाहुमुत्क्षिपन्नाह्वयति ।)

---

१. जह्नुद्युमणिविधिजा गङ्गायमुनासरस्वत्यस्तत्संगमे प्रयागे मिमङ्क्षूणां स्नातुमिच्छताम्. २. 'प्राचीनप्राची' इति क-पाठः. ३. 'परं' इति क-पाठः. ४. 'चरणाक्षेपे समारम्भिणः' इति क-पाठः. ५. 'बाहू' इति ख-पाठः.

(प्रविश्य ।)

**दैवज्ञः**—(सहर्षं स्वगतम् ।) कथं क्षणमपि व्याक्षेपासहिष्णवो महतां मनोरथाः । यतः प्रस्थानोत्सुकयोर्वत्सयो रामकृष्णयोरतिप्रशस्ततरो यात्रामुहूर्त उषस्येव समुपस्थितः । तथा हि ।

चन्द्रः पुष्पगतस्तृतीयभवने सिद्धिप्रदो दक्षिणः
केन्द्रस्थाः कथयन्ति सौम्यखचरा योगाधियोगं शुभम् ।
अम्भःसंभृत एष कुम्भनिवहो वेश्याशिरःस्थः पुरः
प्रस्थाने कथयन्ति शात्रववधं सर्वेऽर्थसिद्धिं तथा ॥ ७ ॥

तत्सत्वरमुपसृत्य यात्रोचितमङ्गलाचारोपकरणान्युपाहरामि । (इति ससंभ्रममवतीर्य पुरोऽवलोक्य ।) अये, कथमयमन्तःपुरप्रतीहारो रत्नापीड इत एवाभिवर्तते । तदस्मान्निशीथवृत्तं नन्दाक्रूरयोः संवादमवगच्छामि । (इत्युपसर्पति ।)

**दैवज्ञः**—अये रत्नापीड, कथमर्धोन्मीलितलोचन एव संचरन्नतिघूर्णमानानामङ्गानामनीश्वर इवावलक्ष्यसे ।

**रत्नापीडः**—किं भणामि । कष्टात्कष्टतरः खलु परप्रेष्यभावः । यतः ।

श्रान्तोऽपि हन्त रजनीगुरुजागरेण
कार्यातिपातचकितो न शये क्षणार्धम् ।
भ्रूभङ्गवीक्षणवितर्कितचित्तवृत्ति-
र्नित्यानुवृत्तिनिरतः प्रभुवृत्तमीक्षे ॥ ८ ॥

**दैवज्ञः**—तत्कथय कारणं रात्रिजागरणस्य ।

**रत्नापीडः**—सखे, किं न जानासि ।

अक्रूरागमसंभ्रमादुपहृतैरातिथ्यसंभावना-
संभारैरतिवाहितो न विदितः पूर्वोऽर्धरात्रो मया ।
विश्लिष्यत्सुतसंज्वरातुरजरद्गोपप्रमीलामिल-
च्छोकस्त्रीपरिसान्त्वनैर्नयनयोरेव प्रभाता निशा ॥ ९ ॥

**दैवज्ञः**—हन्त भोः, कथं हर्षस्थाने विषादावसरः । यतः प्रियात्प्रि-

१. 'तस्मात्' इति ख-पाठः. २. 'अभिलक्ष्यसे' इति क-पाठः.

[1]यतमः किल मातुलावासवासो भागिनेयानाम्, भगिनीनां च भर्तृपक्षात्पितृपक्षे पक्षपातो बंहीयानेव ।

**रत्नापीडः**—आः कथमनेकधाध्यक्षयन्नप्यमीषां प्रेमबन्धपरिपाकमनभिज्ञ इव पृच्छसि । न जानासि किं मातुलवर्णिकाप्रतिच्छन्नोऽयमसुरोत्तंसः कंसो वासुदेवाय द्रुह्यन्वसुधामधिवसति । तदेवं तयोरप्रतीकारमत्याहितमुपस्थितमवगच्छामि ।

**दैवज्ञः**—सत्यमात्थ, किं तु न संभावयामि परमभागवतेन मनीषिणा प्रियसुहृदाक्रूरेण प्रत्यनन्तरीभूय नीयमानयोरनयोः किमप्यमङ्गलम् । न खल्वयमणुमपि राज्ञो दुराशयमवगत्य विपाकदारुणं दूत्यकर्माङ्गीकुर्यात् ।

**रत्नापीडः**—आः, कथमविदग्धमुग्धमतिरसि । [2]नह्यस्त्यकर्तव्यं नाम परप्रेष्यभावमापन्नानाम् । राजानुवर्तिनां पुनर्विशेषेण । ते हि राजानुरञ्जनमेव बहुमन्यमानाः

> क्षमां सत्यं दयां धर्मं घृणां लोकभयं दमम् ।
> विस्मृत्य केवलं [3]राजरञ्जनं पर्युपासते ॥ १० ॥

**दैवज्ञः**—महाशयः [4]खल्वक्रूरो न दुराशयमनुसरिष्यति ।

**रत्नापीडः**—(विहस्य ।) किं न [5]पश्यसि ।

> अन्तर्मलिनसंसर्गाच्छ्रुतवानपि दुष्यति ।
> यच्चक्षुःसंनिकर्षेण कर्णोऽभूत्[6]कुटिलाशयः ॥ ११ ॥

**दैवज्ञः**—(निमित्तं सूचयित्वा ।) शान्तं पापम् । प्रतिहतममङ्गलम् । स्वस्त्यस्तु गोकुलवासिभ्यः ।

(नेपथ्ये कलकलः ।)

**रत्नापीडः**—(सादरमाकर्ण्य । प्रकाशम् ।) सखे, [7]अवधीयताम् । यथायं मधुरमुरजवेणुवीणाशङ्खकाहलबहलकोलाहलान्तरालोन्मीलत्प्रचुरपुरपुरंध्री-

१. 'प्रियतरः' इति ख-पाठः. २. 'नह्यस्त्यकर्मविचारणं नाम' इति ख-पाठः. ३. 'राज्ञां रञ्जनं' इति ख-पाठः. ४. 'खल्वसौ' इति ख-पाठः. ५. 'पश्यामि' इति क-पाठः. ६. 'कुटिलाश्रयः' इति ख-पाठः. ७. 'विधीयताम्' इति ख-पाठः.

समाजमङ्गलाचारगीतध्वनिरुपगोपुरमुच्चैरुच्चरति, तथा तर्कयामि प्रस्थितौ रामकृष्णाविति । तद्यावत्प्रत्यनन्तरीभूय प्रास्थानिकोपदासंपत्संपादनेन सपुत्रौ गोपवृद्धौ परिचरावः ।

(इति निष्क्रान्तौ ।)

प्रवेशकः[1] ।

---

(ततः प्रविशतो रामकृष्णौ, सुदामाक्रूरावलम्बितौ यशोदानन्दगोपौ च ।)

**यशोदानन्दगोपौ**—

हा वत्स राम रमणीयमुखारविन्द
हा कृष्ण वृष्णिकुलकैरवकाननेन्दो ।
क स्थः समेत्य सहसा परिरभ्य गाढ-
मङ्गानि शीतलयतं परितप्तयोर्नौ ॥ १२ ॥

(इति मूर्च्छां नाटयतः ।)

**अक्रूरः**—(वसनाञ्चलेन वीजयन् ।) गोपवृद्धौ, समाश्वसितम् । अनव-सरः खल्वयं शोकस्य[2] । ननु प्रवत्स्यतोर्वत्सयोः प्रवर्त्यतां मङ्गलाचारः ।

**गोपवृद्धौ**—(समाश्वस्य । सोपालम्भम् ।) हन्त भोः,

उत्पत्तिप्रभृति प्रतिक्षणमतिप्रीत्या मयाराधिता
यूयं बल्युपयाचितव्रतमहादानोपदानैः सुराः ।
धिक्कष्टं कथमेष तस्य विषमः पाकः पुरः प्रोद्भू-
द्यद्वत्सौ समुपाहरामि बलये कंसाय विश्वद्रुहे ॥ १३ ॥

(रामकृष्णावुपसृत्य पादयोः पततः ।)

**अक्रूरः**—गोपवृद्धौ, प्रवत्स्यन्तौ रामकृष्णौ भवन्तावभिवादयेते । तत्प्रस्थानोचिताभिराशीर्भिरभिवर्धयतमेतौ ।

**गोपौ**—(सास्रवर्षम् ।) हा वत्सौ, क वर्तेथे । न खलु कथंचित्परि-भावयितुमीशावहे युवाम् ।

---

१. 'प्रस्तावना' इति क-पाठः. २. 'नावसरः खल्वेष शोकावेशस्य' इति ख-पाठः.

शोकोद्वेलविलोलबाष्पसलिलप्रम्लिष्टदृष्टी[1] जरा-
जीर्णावुज्झितपाटवेन्द्रियगणावन्धौ निमग्नौ शुचि[2] ।
आवां सौनिकदारुणेन विधिना प्रस्थापयन्तौ युवां
हस्तेनाप्यतिवेलवेपथुभृता न स्प्रष्टुमीशावहे[3] ॥ १४ ॥

(रामकृष्णावुपसृत्य पित्रोरङ्कमधिरोहतः । तयोर्नयने उन्मार्जयन्तौ ।)

आगर्भसंभवादस्मच्चिन्तासंतापतान्तयोः ।
पित्रोः क्लेशाय नौ जन्म केवलं किल गोकुले ॥ १५ ॥

तदद्य भवन्तौ सप्रणयप्रणाममनु प्रार्थयावहे ।

संमान्य मातुलादेशं द्रक्ष्यामो न चिरेण वाम् ।
युष्मद्बाष्पाम्भसा[4] यस्मादभिषिक्तौ तदास्पदे ॥ १६ ॥

**वृद्धगोपौ**—यथाभिरुचितमायुष्मतोः ।

वाता वान्तु शिवा दिशश्च विदिशः सन्तु प्रसन्नाः सदा
नद्यः शीतजलाः स्रवन्तु तरवः पुष्णन्तु सत्संपदः ।
पन्थानः सिकतोत्तरा विदधतु क्षेमं च निष्कण्टका
देवश्चक्रधरश्च तत्र भवतोर्विघ्नान्विजेघ्नीयताम् ॥ १७ ॥

**अक्रूरः**—प्रतिगृह्यतामाशिषः पित्रोः । अतिपतति यात्रामुहूर्तवेला ।

**रामकृष्णौ**—शिरसा गृहीताः । (इति निष्क्रान्तौ ।)

**नन्दः**—(चिरं दूरमवलोक्य ।) आर्ये, कथमतिक्रामतो लोचनपथं वत्सौ । तदिदानीमनीशोऽस्मि शोकविक्लवान्यङ्गानि वोढुम् । (इति मूर्छितः पतति ।)

**यशोदा**—अज्ज, समस्ससिहि समस्ससिहि । अज्जुत्तं दाणिं सोइउम् । अमङ्गलं खु एदं पवासिदाणम् । ता वड्ढावेहि सुहासीहिं । मणावह कुल-देवदाओ । अच्चिअन्दु सोत्थिवाअणिआ बम्हणा । दिज्जन्तु वायणाइं सोह-

१. 'प्रश्लिष्ट' इति ख-पाठः. २. शोके. ३. 'ईहामहे' इति क-पाठः. ४. 'बाष्पभरैः' इति ख-पाठः.

ग्गिणीणम् । जह वच्छाणं कल्लाणमप्पडिहदं भोदि । ता गच्छामो लहु लहु घरसंणिवेसम् । (क) (इति नन्दमवष्टभ्य प्रतिष्ठते ।)

**नन्दः**—अये,

दूरं गतोऽपि हृदये विनिविष्ट आस्ते
संवीक्ष्यते च पुरतः परितः प्रसर्पन् ।
तत्किं ममैष मतिविभ्रम एव वा स्या-
द्यत्प्रस्थितो मधुपुरीं मधुभित्सरामः ॥ १८ ॥

(स्मृतिमभिनीय ।)

मर्माण्युच्चैर्व्यथयति मनो हन्त मथ्नाति यत्ना-
द्धैर्यग्रन्थिं श्लथयति सखे किं च मुष्णाति तृष्णाम् ।
कष्टं दृष्टिं तिरयति हरेर्बालकेलीकलापो-
ऽकस्मादस्मत्स्मृतिशतशिरःशेखरीभूय भूयः ॥ १९ ॥

**यशोदा**—(संस्कृतमाश्रित्य ।) आर्य, दुष्प्रवेशः खल्वेष घोरतरो घोषप्रदेशः । तथा हि ।

नार्यो रुदन्ति न रुवन्ति पतंगसंघा
गावस्तृणानि न चरन्ति न वान्ति वाताः ।
भृङ्गाः पिबन्ति न मधूनि हरौ प्रयाते
निर्जीविता इव दिशः प्रतिभान्ति शून्याः ॥ २० ॥

तदद्य वत्सप्रवासशोकावेशविक्लवमात्मानमात्मनैवावष्टभ्य व्रजवासिनो लोकान्परिसान्त्वयावः ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशतो रामकृष्णौ ।)

**रामः**—(प्राचीमवलोक्य ।) कथमुदितभूयिष्ठ एव भगवान्किरणमाली । तद्यावदेनमुपतिष्ठे । (अञ्जलिं बद्ध्वा ।)

---

(क) आर्य, समाश्वसिहि समाश्वसिहि । अयुक्तमिदानीं शोचितुम् । अमङ्गलं खल्वेतत्प्रवसितानाम् । तद्वर्धापयस्व शुभाशीर्भिः । मानयस्व कुलदेवताः । अर्च्यन्तां स्वस्तिवाचनिका ब्राह्मणाः । दीयन्तां वायनानि सौभाग्यवतीनाम् । यथा वत्सानां कल्याणमप्रतिहतं भवति । तद्गच्छावो लघु लघु गृहसंनिवेशम् ।

दिवसश्रीविजयजयन्मणिमयनीराजनामलस्थानम् ।
दिनकरमङ्कुरितांशुं विकचजपापुञ्जमञ्जुलं वन्दे ॥ २१ ॥

**कृष्णः**—आर्य, कथमयं गगनपथपान्थो भगवानतिदूरमुज्जिहासमानोऽप्युदयगिरिविरहपर्युत्सुक इव मन्थररथारोहणसुखमनुभवति । तदुत्प्रेक्षे—

मधुरमधुरभृङ्गीगीतसंगीतभङ्गी-
समसमुदयमङ्गीकृत्य सन्मङ्गलानि ।
त्रिभुवनमभिषेकात्पङ्किलं कुङ्कुमाद्भिः
समुपसरति मन्दं मन्दमम्भोजबन्धुः ॥ २२ ॥

**रामः**—अहं पुनरेवमुत्प्रेक्षे—

निशामशेषामुपभुज्य वारुणीं प्राचीमुपेत्याथ तयावधीरितः ।
तदङ्घ्रिलाक्षारसरञ्जिताङ्को मन्दं विनिर्याति तदङ्गणाद्बहिः ॥ २३ ॥

अथवा ।

ताराः पारदगोलका इह नभःकाचोच्चकुप्यां क्षणं
न्यस्ताः संहतिमेत्य सान्द्रकिरणैश्चन्द्रभ्रमं कुर्वते ।[1]
अप्येताः सकलां निशां परिपतद्दीपाग्निपाकक्रमा-
त्प्रातः सिद्धरसात्मना परिणमन्त्यादित्यबिम्बच्छलात् ॥२४॥

(परितोऽवलोक्य सहर्षम् ।) कथममी तरुणतरणिकिरणरञ्जितशिखरराजिराजितशाद्वलाभोगभासिनो[2] भूमिभागाः । तथा हि ।

तरणिकिरणलेशाः शक्रगोपप्रकाशा-
स्तरुणतृणशलाकाश्लेषिणः संविभान्ति ।
अभिनवरविबिम्बस्पर्धयाद्रीपराधा
इव मरकतशूलेष्वर्पिताः पद्मरागाः ॥ २५ ॥

**अक्रूरः**—(समन्तादवलोक्य । सकौतुकम् ।) भगवन्कृष्ण, इतः[3] पश्यतु भवान्[4] ।

१. 'सौरकिरणैः' इति क-पाठः. २. 'शाद्वलभाग' इति ख-पाठः. ३. 'इत इतः' इति क-पाठः. ४. 'भगवान्' इति ख-पाठः.

सजलजलदनीलं त्वामुदीक्ष्योर्ध्वकण्ठा
नटति विततबर्हं मण्डली बर्हिणानाम्।
मधुरमधुरकेकाराविणी बन्धुबुद्ध्या
समुपसरति बर्हापीडिनं संभ्रमेण ॥ २६ ॥

**सुदामा**—इदमपरमुदीक्ष्यतामायुष्मान्।

उत्कर्णतर्णककुलाकुलितानि दोग्धुं
संदानितान्यपि भवन्तमनुद्रवन्ति।
उत्पुच्छमुन्मुखमुदश्रु कृतार्तनाद-
मात्मानपेक्षमभितः किल गोधनानि ॥ २७ ॥

**रामः**—(परितोऽवलोक्य। सहर्षम्।) आयुष्मन्, इतोऽवलोक्यताम्।

नेदीयांसस्तरणितनयातीरवानीरकुञ्जा
गुञ्जन्मञ्जुस्वरमधुकराराविणः स्वागतेन।
पान्थानस्मानुचितमतिथीनाह्वयन्तीव शाखा-
हस्तन्यस्तैः फलकिसलयैरानमन्तः समन्तात् ॥ २८ ॥

(किंचिदन्तरं गत्वा चिरं निरूप्य।) इदं चापरमनुरूपं निरूपयत्वायुष्मान्।

अधिरजनि निरुद्धोद्भ्रान्तभृङ्गार्तगुञ्जा-
रवमुखरितगर्भा भान्त्यमी पद्मकोषाः।
निभृतमनुभवन्तोऽनाहतं नादमन्त-
र्विजितपवनवेगाः किं नु योगाधिरूढाः ॥ २९ ॥

**कृष्णः**—(कलिन्दनन्दिनीं विलोक्य निर्वर्ण्य सोन्मादम्।) सखे सुदामन्,

पश्यन्नेतां चपलशफरीलोचनां पङ्कजास्यां
कोकद्वन्द्वस्तनभरनतां बालशैवालकेशीम्।
भृङ्गश्रेणीमधुरवचनां राजहंसप्रचारां
व्यासक्तोऽपि क्षणमिह पुनः प्रेयसीं स्मारितोऽस्मि ॥ ३० ॥

(तीरवनराजिं विलोक्य सविश्रब्धम्[1]।)

मधुरमधुरमेतत्कूजितं कोकिलानां
किमथ नगरनारीमञ्जुमञ्जीरनादः।

---

१. 'सविभ्रमं' इति ख-पाठः.

इयमपि नवगुच्छस्वच्छवक्षोजकान्तिः
सलयकिसलया वा कापि कान्ता लता वा ॥ ३१ ॥

**सुदामा**—इत इतस्तमालमालाविलोकनेन मनो विनोदयत्वायुष्मान् ।

**कृष्णः**—(समन्तादवलोक्य ।) सखे,

उद्यच्छिलीन्ध्रमरविन्दसुगन्धबन्धु-
मन्दानिलं निचुलकुञ्जमिलन्मिलिन्दम् ।
उत्पश्यतो भवति हन्त दुरन्तचिन्ता-
संतापसंततिनिदानमिदं वनं मे ॥ ३२ ॥

**सुदामा**—(स्वगतम् ।) कथमत्यावेगो विरहस्य । तदेनं रहस्यविश्रम्भालापैर्विनोदयिष्यामि । (प्रकाशम् ।) आयुष्मन्, अतिदूरमारूढः प्रौढप्रतापस्तपनः । तदस्मिन्विविक्ते बालशैवालशीतले शिलातले समुपविश्य ललाटंतपां माध्याह्निकीं वेलामतिवाहयामः ।

**कृष्णः**—साधु संविहितम् । ममाप्येष मनोरथः । तत्पुरोभूय निर्दिशय[1] सोपानपथम् । आर्यमक्रूरं[2] मद्वचनेन विज्ञापय, यदतिक्रामति माध्याह्निकी संध्या तदनुष्ठीयतां तदुचितं कर्मेति । तदुपरोधापराधपरिहाराय परिपालयामि[3] तीरपरिसरसरसदेशपरिशीलनेन । आर्यबलदेवश्च देवपूजोपयोग्यानि[4] तिलकुशकुसुमादीन्युपाहरन्भवन्तं परिचरिष्यति । तावदहमपि सुहृद्वियोगविक्लवमात्मानं सुदाम्ना वयस्येन समं स्वजनकथालापलीलाभिर्विनोदयिष्यामीति ।

**सुदामा**—यदादिशत्यायुष्मान् । (इति तथा करोति ।)

(ततः प्रविशति कृष्णः सुदामा च ।)

**कृष्णः**—सखे,

निजजनविरहव्यथा यथास्माननुकलमुत्तपति प्रतिप्रतीकम्[5] ।
अपि सखिसुहृदस्तथा कथंचित्स्मरयति नः कुतुकप्रसङ्गतोऽपि ॥३३॥

**सुदामा**—आयुष्मन्, त्वदेकजीवितानां त्वन्मात्रदेवतानां च कथ-

---

१. 'निदेशय' इति क-पाठः. २. 'आर्य मद्वचनेनाक्रूरं' इति क-पाठः. ३. 'परिपालयिष्यामि' इति क-पाठः. ४. 'योज्यानि' इति ख-पाठः. ५. प्रत्यङ्गम्.

मित्थमपि संभाव्यते। अथवा कथं न स्मरिष्यन्ति यदि जातिस्मरा भविष्यन्ति।

**कृष्णः**—कुत एतत्।

**सुदामा**—

आबालवृद्धवनितं पशुपक्षिवृक्ष-
गुल्मोलपप्रभृतयः किल गोकुलस्थाः।
त्वद्विप्रयोगजनितार्तिकुकूलवह्ना-
वापाकपाकपरिपाकमिवोद्वहन्ति॥ ३४॥

किं बहुना।

प्रहीणप्राणेव प्रमुषितनिधानेव तमसि
प्रविष्टेव प्रत्यस्तमितरविचन्द्रद्युतिरिव।
दवाग्नौ मग्नेवाचिरविरहखिन्नेव विषमा-
मवस्थां प्रस्थानप्रभृति भवतो नन्दवसतिः॥ ३५॥

(प्रविश्यापटीक्षेपेण)

**दूती**—(ससंरम्भम्।) भगवन्भुवनभागधेय,

अनन्यशरणामेतां त्वदेकायत्तजीविताम्।
विरहार्तिविलद्बाधां राधां कथमुपेक्षसे॥ ३६॥

**कृष्णः**—(ससंभ्रमं परिवृत्य।) कथमियं राधासहचरी विलासवती विवशहृदयेवात्याहितमिवावेदयति प्रेयस्याः। तन्निपुणमवगच्छामि तावत्। (प्रकाशम्।) विलासवति, अथ किमवस्था तत्रभवती मज्जीविताधिदेवता राधा।

**विलासवती**—

सजलैर्नलिनीदलैर्मृणालैः सुमनोभिर्नवपल्लवैः पटीरैः।
शतशः परिशीलितापि शीतैरुपचारैः प्रतिबुध्यते न राधा॥ ३७॥

---

१. 'मग्नेवाशनिविनिहतेवेति' इति क-पाठः. २. 'चलद्बाधां' इति क-पाठः. ३. 'कथय किमवस्था' इति ख-पाठः.

अपि च ।

अपि मरणमुपैति सा मृगाङ्के विलसति कैव कथा रसान्तरस्य ।
अपि कथमधुना दधातु शान्तिं विषमशरज्वरतीव्रदेहदाहः ॥ ३८ ॥

**कृष्णः**—(सुदामानं प्रति ।) सखे, किमाह विलासवती ।

**सुदामा**—आयुष्मन्, कथमसंभावना बहुधानुभूतस्वभावायामस्यां च विश्रम्भणीयवचनायाम् ।

**विलासवती**—न खल्वन्यथा कथयामि । यत इदानीं त्वयि प्रस्थिते ।

माला व्यालानुकारा परिमलबहुलस्निग्धचम्पा नु शम्पा
पम्पाकम्पानिलोऽस्या मलयजनिलयाशीविषोद्गारघोरः ।
न स्यादस्या विभाव्यज्वरमिह कतमस्योत्थकम्पानुकम्पा
झम्पासंपातजाग्रत्तुहिनकरहरिप्रोद्गमोत्त्रासभाजः ॥ ३९ ॥

**कृष्णः**—सत्यम् । संभावितमेतत् । सा किल

मां विना न क्षणं प्राणान्क्षामाङ्गी रक्षितुं क्षमा ।
न चन्द्रेण विना चान्द्री प्रभा भवितुमर्हति ॥ ४० ॥

(सुदामानं प्रति । स निःश्वासम् ।) सखे, अपि प्रयाणावसरे संभ्रमातिवेगेन गृहाद्बहिर्निर्गच्छता मया न साधु संबोधिता प्रेयसीति परितप्यते मे हृदयम् । तथा हि ।

श्रुत्वा यान्तं कथमपि रहो लब्धुमुत्कण्ठमाना
यावद्यावत्किमपि गदितुं मां पुरः स्थातुमैच्छत् ।
तावत्तावन्नयनसलिलं संभृतं संवरीतुं
यातायातैरहह दयिता केवलं वञ्चितैव ॥ ४१ ॥

अपि च ।

एकेनालोकयन्ती सभयमुभयतो ज्येष्ठदृष्टिप्रचारं
शून्येनानुव्रजन्ती प्रियमतिऋजुना लोचनेनापरेण ।

---

१. 'कथमियं भावना' इति ख-पाठः. २. 'कतरस्य' इति ख-पाठः. ३. 'तुहिनकरकर' इति क-पाठः.

बाला कालातिपाताकलनविरचितानल्पसंकल्पदुःस्था
चित्रन्यस्तेव तस्थौ मयि निहितमना लोचनागोचरेऽपि ॥ ४२ ॥

(लोचने निमील्य[1] चिरं ध्यात्वा सोत्कण्ठम् ।)

सान्द्रसान्द्रपुलकाङ्कुरपालीदन्तुरान्तुरभुजान्तरगूढः ।
कान्तया पुनरहं चिरचिन्तातान्तया बत कदा परिरभ्ये ॥ ४३ ॥

(उच्चैर्निःश्वस्य ।) हंहो दैवहतक, कथं वञ्चितोऽस्मि ।

सा बिम्बाधरमाधुरी निरवधिः सा केलिकोपाकुला
वाचः काचन चातुरी परिचितोदञ्चद्विपञ्चीचया ।
किं च व्यञ्जितपञ्चबाणविजयास्ताः सालसा दृष्टयो
भूयो गोचरतां व्रजन्त्यपि विधे तस्याः कुरङ्गीदृशः ॥ ४४ ॥

**सुदामा**—शान्तं पापम् । कथमनाश्वासः । नन्वचिरादेव तत्रभवान्समीहितभाजनं भविष्यति ।

**कृष्णः**—हन्त भोः,

मद्वियोगकृताबाधा राधा नोपेक्षितुं क्षमा ।
अनतिक्रमणीयं च मातुलस्योपसर्पणम् ॥ ४५ ॥

तत्किमत्र प्रतिपद्यताम् ।

**सुदामा**—(चिरं विचिन्त्य । प्रकाशम् ।) आयुष्मन्, उभयमप्यविरोधेन समाधीयताम् ।

**कृष्णः**—(सादरम् ।) कथमिव ।

**सुदामा**—तदाकर्ण्यतामवधानेन । अस्ति किल नातिदूरेऽधितरणितनयातीरपरिसरनिरस्तसमस्तोपसर्गमपास्तकलिकालकलुषमवधीरितविविधाधिबाधमगाधगुणगरिमसंभारगम्भीरं विश्वविश्वंभराभोगभूषणीभूतप्रभूतवैभवं दरदलितललितकमलकुलगलदमन्दमकरन्दगन्धबन्धुरपरागधारान्धीकृतपुष्पंधयधोरणीदोधूयमानमाधवीलतावनद्धं विविधतरुकुसुमकह्लारमधुरमधुपानमत्तमधुकरीकलरवमुखरीकृतदिगन्तरं मन्दानिलाधूतनूतनचूतम-

१. 'परिभाव्य' इति क-पाठः. २. 'पुलकान्तर' इति ख-पाठः. ३. 'परिरप्स्ये' इति ख-पाठः. ४. 'कृतां बाधां' इति ख-पाठः. ५. 'अवधूत' इति क-पाठः.

ञ्जरीनरीनृत्यमानपिकसुन्दरीसहस्रकलकलाकुलिततरुणतरुशिखरं तरणितनयोत्तुङ्गरिङ्गत्तरङ्गप्रसङ्गसंगतानङ्गरङ्गकूलकूजद्विहंगपुंगवद्वन्द्वानुभूयमानकछोलदोलाखेलनकुतूहलमतिचपलगोपालबालिकाकलितकरतालिकातरलवलयावलीकलकनककिङ्किणीचरणमणिनूपुरक्कणितवेणुवीणारवानुगतमृदुमृदङ्गध्वनिजनितहर्षप्रकर्षप्रकटिताकाण्डताण्डवाडम्बरोद्दण्डशिखण्डिमण्डलीमण्डितस्थण्डिलमतिविशदशशधरविसृमरकरनिकरचारुक्षीरधाराधोरणीधौतधरणिमण्डलमसमशरशरनिकरपरवशीकृतसुरनरमृगखगप्रमुखजीवजातसमुपजातशान्तमदनमहीपतिक्रीडावनं वृन्दावनं नाम ।

**कृष्णः**—(स्मृतिमभिनीय ।) अये, साधु स्मारितोऽस्मि । परिशीलितपूर्वमेतदस्माभिः । यत्किल

वाचालैः शुककेकिकोकिलकुलैरारब्धकोलाहलं
　वातान्दोलनलोलपल्लवलतालावण्यलीलागृहम् ।
उन्मीलन्मकरन्दतुन्दिलदलद्वासन्तिकासुन्दरं
　शश्वन्मामकमत्तचित्तकारिणः संरोधसंदानकम् ॥ ४६ ॥

अपि च ।

अतिचित्रैः सुमनोभिः सुमनोभिर्योगिनामिवोपचितम् ।
शीलितमगमैरगमैर्निगमैरिव योगमारूढैः ॥ ४७ ॥

**सुदामा**—एवमेतत् । तदत्रैव राकानिशाकरकरनिकरकरम्बिताशेषदिक्चक्रवाले परमोदाररमणीये समये तरणितनयातटोपशोभिवंशीवटोपान्तवेदिकाविहारमण्डलीमण्डनीभूय निभृतनिभृतमधरसुधापूरितमधुरमुरलीरवाहूतनूतनाभिसारिकासहस्रसविभ्रमारब्धसरभसपरीरम्भसंभ्रमो विरहविधुराभीरकामिनीसमाजमावर्जयन्नातिविततबाधां राधामप्याराधयत्वायुष्मान् । इत्थमनुभावितरासरसातिरेकपरम्परापचेलिमनिर्भरानन्दाद्वयविस्मृतरसान्तरमपरिचितोचितानुचितविचारचातुरीचमत्कारमपलपितपरापरादरगौरवव्य-

---

१. 'अतिचलद्गोपाल' इति ख-पाठः. २. 'वीणानकानुगत' इति क-पाठः. ३. 'इत्थमनुभवति' इति ख-पाठः. ४. 'विस्मृतपदम्' इति ख-पाठः. ५. 'व्यवहारतिरोहित' इति ख-पाठः.

वहारं तिरोहितबहिरुपाधिसंस्कारं रासक्रीडामहोत्सवं निर्वर्त्य, निवर्त्य च सकलसुन्दरीसमाजं प्रभातायां रजन्यां राजधानीमनुसरिष्यामः ।

**कृष्णः**—साधु पर्यालोचितम् । तद्विसर्जयैनां राधासमाराधनाय । उपाहरतु चैनां संदेशसंग्रहकारिकाम्—

त्वत्संकल्पप्रणयि हृदयं पञ्चभिः पञ्चबाणो
बाणैरेणीचपलनयने पञ्चतां नेतुमैच्छत् ।
कालक्षेपं यदयमदयोऽप्यद्य यावद्विधत्ते
तत्कर्तव्यापकृतिविपरीतार्थताशङ्कयैव ॥ ४८ ॥

**सुदामा**—विलासवति,

अलमिह तवोपचारैः प्रत्युतसंतापसंततिनिदानैः ।
अयमचिरादपनेष्यति भगवानस्या रसेन संतापम् ॥ ४९ ॥

*निभृतं च कर्णे कथय—यदद्य रासरसोत्सवाय मुरलीरवमाकर्ण्य तूर्णमेव* वंशीवटविहारभूमावुपस्थातव्यमिति ।

**कृष्णः**—अथवा सर्व एव गोकुलवासिनः समायातनीयाः । उचितं च प्रथमनिवसतौ सुहृदां प्रस्थितानुव्रजनम् ।

**विलासवती**—यदादिशति देवः । (इति निष्क्रान्ता ।)

**कृष्णः**—सखे, अक्रूरमुपसृत्य विज्ञापय—भगवन्, अतिकठोरकिरणस्तपति तपनः । तन्नातिदूरे वृन्दावनोपवनेऽद्य विश्रम्य श्वोभूते मातुलालयमुपसरिष्यामः । उदाहरन्ति च जरन्तः—

'प्रथमा वसतिः स्वल्पसंचारा चेत्सुखावहा ।
यदस्यां पीतमशितं तत्सर्वत्रोपतिष्ठते' ॥ ५० ॥

वृन्दावनदिदृक्षा चास्मानुत्तेजयति निशि निवस्तुम् । तदद्य पुरःसरीभूय राज्ञेऽस्मदागमनमावेदयत्वार्यः । यावदेनमस्मदागमनोत्कण्ठा नोत्तरलयति ।

**अक्रूरः**—(सुदामोक्तमाकर्ण्य ।) यथाभिलषितमायुष्मते । (इति निष्क्रान्तः ।)

---

१. 'अपहृति' इति **ख**-पाठः. २. 'षटकर्णमेव' इति **क**-पाठः.

**कृष्णः**—(प्राचीमवलोक्य ।) कथमुपनत एव सायंतनः समयः । तथा हि ।

कासारे कलहायिता इव मिथः सद्यः परागाननाः[1]
स्वैरं चक्रचकोरपङ्कमुदव्राताश्चिरादासते ।
प्रत्यक्सिन्धुनिमज्जदुष्णकिरणालातोत्थधूमैरिव
प्रध्मातोदरमेतदम्बरमितो ध्वान्तैः पराभूयते ॥ ९१ ॥

**सुदामा**—आयुष्मन्, एवमेतत् ।

प्राचीं कैरविणीगणाः परिणमच्छीतांशुगर्भामिव
स्वैरं स्मेरमुखाः पुरः प्रसविनीं[2] व्याख्यान्ति भृङ्गारवैः ।
किं चोदञ्चितचञ्चु चन्द्रमभितो मार्जन्ति जिह्वाञ्चलैः
सद्यः स्यूत[3]जरायुवत्करकणव्रातं चकोराङ्गनाः ॥ ९२ ॥

**कृष्णः**—तदिदमनर्थान्तरम् । तथा हि ।

एष प्रोषितभर्तृकाकुलमिलत्प्राणप्रयाणे पुरः
प्रत्यूहप्रतिघातपूर्णकलशश्चन्द्रः समुज्जृम्भते ।
तत्कालप्रतिबुद्धकैरववनीसंभ्रान्तभृङ्गाङ्गना-
भेरीभूरिरवाः[4] स्फुरन्ति मदनप्रस्थानसौवस्तिकाः ॥ ९३ ॥

अपि च ।

विशदकरवरत्रानद्धगोत्राद्रिकीलं
शिबिरपटकुटीरं चान्द्रमुच्चैर्वितत्य ।
रतिपतिरतिरोषात्तारकापुष्पबाणै-
स्तुदति युवमनांसि ध्वान्तदन्तावलाढ्यः ॥ ९४ ॥

तदेहि । शशधरकरनिकरपरितप्यमानमात्मानं वृन्दावनतरुतिरस्करिणीनिरस्तचन्द्रिकासंपर्कं परित्रास्यामहे ।

**सुदामा**—यथाभिरुचितमायुष्मते ।

(इति वृन्दावनप्रवेशं नाटयन्ति ।)

इति कंसवधे चतुर्थोऽङ्कः ।

---

१. पराङ्मुखा इत्यर्थः. २. 'सुखप्रसविनीं' इति ख-पाठः. ३. 'सूत' इति ख-पाठः. ४. 'भृङ्गरवाः' इति ख-पाठः.

पञ्चमोऽङ्कः ।

(ततः प्रविशति सुनन्दनामा गोपालः ।)

**सुनन्दः**—आदिष्टोऽस्मि तत्रभवता घोषवृद्धेन नन्दगोपेन, यत्किलाक्रूरागमनगौरवेण रणरणकोपजातदाक्षिण्यसाध्वसावेशाविवशतयाविमृश्यकारिणा रामकृष्णौ प्रस्थापयता मया नोदर्कशुद्धमालोचितमिति परितप्यते मे चेतः । यतः ।

क्रूराशये कुटिलनीतिनिविष्टबुद्धौ[1]
वैरानुबन्धपरिशङ्कितचित्तवृत्तौ ।
व्रीडाविवेकविधुरे मधुरे हितेऽपि
कंसे न विश्वसिति मे हृदयं नृशंसे ॥ १ ॥

तद्यावदेनं नानाविधोपायनपाणिभिर्घोषवासिभिः सबालदारैः शिथिलीकृतानुशयं करोमि, तावद्वत्साभ्यां[2] वृन्दावनविहारकौतुकव्याजेन कियच्चिरं विलम्ब्यास्मदनुयाताभ्यां महाराजो द्रष्टव्य इति । तदनुसरामि तावत् । क्वेदानीं रामकृष्णौ द्रक्ष्यामि । (इति परिक्रम्यावलोक्य च ।) अये, कथमयं सुदामा तयोः सहचर इत एवाभिवर्तते । तदस्मात्प्रवृत्तिमुपलप्स्ये । (प्रविश्य ।) सुदामन्, क्व प्रस्थितोऽसि ।

**सुदामा**—

'रासोत्सवपरिश्रान्तं कान्ताजनकदम्बकम् ।
निवेश्य गोकुले पित्रोः प्रवृत्तिं समुपाहर' ॥ २ ॥

इति प्रेषितोऽस्मि तत्रभवद्भ्यामार्याभ्याम् ।

**सुनन्दः**—तदलं गोकुलगमनावेशेन ।

**सुदामा**—कथमिव ।

**सुनन्दः**—निर्जनमिदानीं गोकुलम् ।

**सुदामा**—(ससाध्वसम् ।) स्पष्टं तावत्कथय ।

**सुनन्दः**—किं न श्रुतवानसि । प्रस्थितयो रामकृष्णयोरनु तन्मा-

---

१. 'निविष्टतुष्टौ' इति ख-पाठः. २. 'तावद्वत्साभ्यां महाराजो न द्रष्टव्यः' इति क-पाठः.

नसौ नन्दगोपः सुहृद्भिः सह संमन्त्र्य विशदचन्द्रचन्द्रिकाधवलायां रजन्यां ससुहृत्समाजः शकटाधिरोपितविविधोपढौकनिकसहस्रसनाथीकृतगोधनगोपगोपीप्रधानं शिबिरं वृन्दावनराजधान्योरन्तराले निवेशितवान् । स्वयं चेदानीं राजकरमुपाहर्तुं नगरमुपागमत् ।

**सुदामा**—कथय तावत्, किमस्याकूतम् ।

**सुनन्दः**—किं कथ्यताम् । ननु तेनैव व्यक्तमुक्तम्—('क्रूराशये' इत्यादि पठति ।)

**सुदामा**—यद्येवं तत्किमिव तत्प्रतिविहितं[1] मन्यते गोपवृद्धः ।

**सुनन्दः**—बाढमयं हि तस्याशयः ।

सान्ना दानेन भेदेन चेदयं नोपशाम्यति ।
ततः पुरःसरीभूय नियोत्स्ये वत्सयोरहम् ॥ ३ ॥

**सुदामा**—उचितमेवैतत्पुत्रिणां पुत्रवात्सल्यस्य ।

यदपरविषयेभ्यः प्रीतिपात्रं स्वगात्रं
　गुरुतरममुतोऽपि प्राणिनां प्राणमात्रम्[2] ।
प्रियतममिह तस्मादप्यपत्यं न कृत्यं
　परमिह मनुजानामस्त्यतः[3] पुत्रलाभात् ॥ ४ ॥

किं तु ।

अनपेक्षितात्मशक्ति प्रतिपक्षे रक्षसां पक्षे ।
व्यवसितमिदमेतस्य क्षेमाय न किं तु चित्तखेदाय ॥ ५ ॥

**सुनन्दः**—आः, कथमेवमुच्यते । यतः ।

को वेद दैवचरितं येन ब्रह्माण्डकोटयः सृष्टाः ।
निमिषार्धेन क्षपिता दशाननब्रह्मरुद्रेन्द्राः ॥ ६ ॥

**सुदामा**—अलमिदानीमुक्तिप्रत्युक्तिभिः कालातिपातेन शिबिरसंनिवेश एव स्त्रैणं निवेश्य रामकृष्णावनुसरामि ।

**सुनन्दः**—क्व पुनरिदानीमिमौ द्रष्टव्यौ । यदहमपि नन्दगोपस्य निदेशादेतौ सहसा राजधानीप्रवेशाद्विरमयितुं त्वरया प्रस्थितोऽस्मि ।

---

१. 'तावत्प्रतिविहितं' इति क-पाठः. २. 'तत्कलत्रम्' इति ख-पाठः. ३. 'ननु जाने नास्त्यतः' इति क-पाठः.

**सुदामा**—(विहस्य।) रे मुग्धाशयोऽसि।

यन्मातुलालयविलोकनकौतुकेन
प्रातस्तरामनुगतौ सवयोभिरेतौ।
संप्रस्थितौ किल कलिन्दसुतातितुङ्ग-
रिङ्गत्तरङ्गसुभगेन पथा विहर्तुम्॥ ७॥

**सुनन्दः**—(सविषादम्।) अहह, कथमविमृश्यकारितया नन्दादेश-प्रतीपमेवाचरितमाभ्याम्। हन्त भोः,

न तादृशः कोऽपि सखा न वृद्धो न गोपिता नापि पिता न माता।
बाल्यादिमौ यच्चपलौ निरुध्यात्तदत्र दैवं शरणं प्रतीमः॥ ८॥

(प्रकाशम्।) तदागच्छ। आवामपि तपनतनयातीरपरिसरविहरणशीलावे-तावनुसरावः।

(इति निष्क्रान्तौ।)

प्रस्तावना।

---

(ततः प्रविशतो रामकृष्णौ।)

**रामः**—अहो रमयतितरां प्राभातिकी तरणितनयातीरशोभा अचिरो-षिताभिर्वर्षाभिः कृतोपद्रवापि पुनः प्रकृतिमापन्ना। तथा हि।

भग्नास्तीरमहीरुहः सहचराः प्रोत्सारिताः पक्षिणः
कालुष्यं हृदये कृतं सहभुवस्त्यक्ताः प्रसादादयः।
स्रोतोभिर्जलदप्रमुक्तसलिलैरासाद्य वृद्धिं क्षणा-
त्किं किं नापकृतं बलाद्विकुरुते लक्ष्मीमदः क्षुद्रकान्॥ ९॥

**कृष्णः**—एवमेतत्। संप्रति तु सुविहितं शरदा। तथा हि।

व्योमापध्वस्तमेघावरणमपसरत्पङ्कशङ्काकलङ्कः
पन्था निस्तन्द्रचन्द्रा रजनिरपि सरिद्राजहंसावतंसा।
फुल्लद्राजीवराजीबहलपरिमलोद्गारधीरः समीरः
क्ष्मापालांश्चित्तवृत्तिश्चपलयति चिराज्जैत्रयात्रोत्सवाय॥ १०॥

---

१. 'मुग्धाशय मुग्धाशयोऽसि' इति ख-पाठः. २. 'यात्रोद्यमाय' इति ख-पाठः.

**रामः**—(पुरो निरूप्य सहर्षम् ।)

कालिन्दी मन्दमन्दानिलचलदमलालोलकल्लोलमाला-
दोलाखेलन्मरालैरविरलकमलालंकृतेवावभाति ।
मज्जन्मातङ्गगण्डस्थलगलितमदामोदलोभाद्भ्रमद्भि-
र्भृङ्गैर्नीरन्ध्रितोर्ध्वं कुवलयवलया द्वैतमाविष्करोति ॥ ११ ॥

**कृष्णः**—(स्पर्शसुखमभिनीय सहर्षम् ।)

एते पाटीरवाटीनवविटपनटीलास्यशिक्षातिदक्षा
दोलाखेलत्पुरंध्रीश्रमजलकणिकाजालपानातिपीनाः ।
सौरभ्यादापतद्भिर्मधुकरपटलैः पृष्ठतोऽनुप्रयाताः
कामाग्नेर्वान्ति धाय्याः पथिककुलवधूबद्धवैराः समीराः ॥१२॥

**रामः**—आयुष्मन्, कथं विविधकलाकलनकौतुकाक्रान्तचित्ततयानधिगताध्वसंचारखेदा न चिरादेव राजधानीमुपगताः स्मः । तथा हि ।

उपवनतरुखण्डहिण्डमानाण्डजकुलकाकलिकाकुलीकृताशाः ।
परिनदितशिखण्डमण्डलीका ददति सुखं मथुरोपशल्यदेशाः ॥ १३ ॥

अपि च ।

वाताधूतमधूकपूगनिवहैर्जम्बीरजम्बूचयै-
र्वन्यैश्चापि कदम्बनिम्बकुटजैः कम्भारिरम्भाभरैः ।
यद्वाटी वटपर्कटीचलदलश्रीदाडिमश्रीफलैः
खर्जूरीपनसादिभिर्विजयते नारङ्गरङ्गस्थली ॥ १४ ॥

(पुनः साश्चर्यम् ।)

माकन्दा मकरन्दबिन्दुनिवहैरानन्दितेन्दिन्दिराः
किं वामन्दमरन्दकुन्दनिचया मन्दानिलान्दोलिताः ।
सौराज्येऽप्यधुना भवन्ति न यदा ते वाटपाटच्चराः
पान्थानां किमतःपरं परिचितास्ते चम्पकाः कम्पकाः ॥ १५ ॥

---

१. अग्निसमिन्धनऋक.

(नेपथ्ये कलकलः।)

(उभौ ससंभ्रममाकर्णयतः।)

(पुनर्नेपथ्ये)

हद्धि हद्धि। अणीसोह्मि दाणिं संवुत्तो। अअं जणो पसुमारं मारिज्जइ। ता पलित्ताअध महाणुभाआ। (क)

**उभौ**—आः, कोऽयमन्यैः परिबाध्यमानोऽशरणोऽस्मासु पूत्करोति।

(प्रविश्य संभ्रान्तः पुरुषः।)

**पुरुषः**—आयुष्मन्तौ, युष्मत्पादपद्मोपजीवी कुब्जको नाम रामानुचरः।

**उभौ**—अथ किं तस्य।

**पुरुषः**—स राज्ञश्चैलनिर्णेजकेन व्यापाद्यमानो मयानुनीय कथं कथमप्यनुमोचितो नाद्यापि प्रत्यवस्थानाद्विरमति।

**कृष्णः**—तदागच्छ तावत्। प्रत्यनन्तरीभूय तस्यापराधकारणं निभृतमवगच्छामः।

(इति नेपथ्यान्तरितौ तिष्ठतः।)

(ततः प्रविशति कुब्जको रजकश्च।)

**कुब्जकः**—अले अले लजअआ, देहि अह्माणं सामिणं लाअपुलप्पवेशजोग्गाइं वशणाइं निवशिदुम्। (ख)

**रजकः**—अले दासीए पुत्तआ, को तुमं, के उण तुझ सामीओ। (ग)

**कुब्जकः**—हग्गे णन्दगोअकुमालाणं लामकण्हाणं पलिचालए चेलधाअए। (घ)

---

(क) हा धिक् हा धिक्। अनीशोऽस्मीदानीं संवृत्तः। अयं जनः पशुमारं मार्यते। तत्परित्रायेथां महानुभावौ।

(ख) अरे अरे रजकक, देह्यस्माकं स्वामिनो राजपुरप्रवेशयोग्यानि वसनानि निवसितुम्।

(ग) अरे दास्याः पुत्रक, कस्त्वम्। कौ पुनस्तव स्वामिनौ।

(घ) अहं नन्दगोपकुमारयो रामकृष्णयोः परिचारकश्चेलधावकः।

**कोष्ठपालः**—एवमस्तु ।

(इति निष्क्रान्तौ ।)

प्रवेशकः[1] ।

(ततः प्रविशतो रामकृष्णौ चाणूरमुष्टिकाभ्यां प्रत्यवतिष्ठमानौ ।)

**कृष्णः**—

रे रे द्वारावरोधं जहिहि वितर नो रङ्गवाटे प्रवेशं

**चाणूरः**—

शूरा एव प्रवेश्या न तदितर इति क्ष्मापतिर्नः प्रशास्ति ।

**कृष्णः**—(विहस्य ।)

शूरं मां वेत्ति कंसो न किमिह

**चाणूरः**—

कुलतो वेत्ति नो कर्मतस्तत्

**कृष्णः**—

मैवं वादीरपार्थं न दधति कुलजा मामका नामधेयम् ॥ १६ ॥

**मुष्टिकः**—चाणूर, सत्यमेतदाह कृष्णः । यतः श्रुतपूर्वमस्माभिर्महाराजेन च, यत्किल गोकुले महाबलैर्गोपालैः सह मल्ललीलाविनोदमनुभवन्तौ निःशेषितानेकवीरवर्गौ निसर्गदुर्मदोत्सिक्तौ मथुरामण्डलं मण्डयत इति । एतदेव चोपश्रुत्य वीरसमरदिदृक्षाकुतूहलिना महाराजेन सबहुमानमानायितावेतौ । प्रवर्तितश्च रङ्गप्रसङ्ग एतयोः प्ररोचनार्थम् । तदेताभ्यामप्यस्य राज्ञो मनोरथः संपादयितुमुचित एव । (कृष्णमुद्दिश्य ।)

राजाज्ञानिवर्तनं हि परमो धर्मः प्रजानामयं
लाभख्यातिमहत्त्वसंपदपरो दोर्दण्डकण्डूमृजा ।
तन्मे दर्शय युद्धकौशलकलां मत्प्रत्ययादेव हि
प्रीयेत प्रभुरन्यथा तु भवतोः प्रत्यागतिर्दुःशका[2] ॥ १७ ॥

**कृष्णः**—

नो युक्ता युद्धचर्चा समरविजयिभिर्वीरगोष्ठीगरिष्ठै-
र्युष्माभिर्बल्लवानां वनभुवि वसतां राजदण्डोचितानाम् ।

---

१. 'प्रवेशकः' इति पुस्तकद्वयेऽपि नास्ति. २. 'दुर्लभा' इति ख-पाठः.

नो चेत्त्वामन्तरेण प्रतिहतगतयः शक्नुमो हन्त गन्तुं

तद्यूयं युद्धशिक्षां वितरत कृपया सिद्धविद्याप्रदानात् ॥ १८ ॥

**चाणूरमुष्टिकौ**—(सहर्षम् ।) अनुमतमेतत् । तद्बध्यतां परिकरः ।

**रामकृष्णौ**—(तथा कृत्वा उभौ प्रति ।)

यथासंख्येन[1] युवयोरस्त्वाचार्यकमावयोः[2] ।

कृतहस्तौ यथा शीघ्रं तोषयामोऽद्य मातुलम् ॥ १९ ॥

**चाणूरः**—साधु मन्त्रितम् । मुष्टिक, त्वं तावदेनं बालशिक्षया दीक्षय । अहमप्येनम् ।

(इत्यन्योन्यं पाणी परामृशतः ।)

**रामकृष्णौ**—आचार्य,

बालौ च बालिशौ चावां न विद्मो युद्धकौशलम् ।

किं तु

भवच्चेष्टानुकरणं करिष्यामः कियच्चिरम् ॥ २० ॥

**चाणूरमुष्टिकौ**—(स्वगतं सहर्षम् ।) अहो महाभाग्यं महाराजकंसस्य । महांश्चासौ बुद्ध्यतिशयः । यदशक्यप्रतीकारावप्यनेनोपायेन सुनिग्रहाविति विचिन्त्य तथा संविधानं व्यधत्त । अस्मद्भाग्यवशाच्चेतावप्यत्यन्तानभिज्ञौ[3] दैवेन पशूकृत्योपहृतौ । तदेतावकृच्छ्रेणैव करतलेन मत्कुणाविव संमृद्य राज्ञः पारितोषिकमाहरिष्यामः । (प्रकाशम् ।) रामकृष्णौ, साधु मन्त्रयेथे ।

आदावावां यद्यदङ्गमभिहन्मो यथा यथा ।

तथा तथानुवर्तेथां शिक्षायामेष हि क्रमः ॥ २१ ॥

**रामकृष्णौ**—यथादिशतमाचार्यौ । (इति द्वन्द्वयुद्धमनुकुरुतः ।) तथा हि ।

अंसेनांसं मुष्टिना मुष्टिमूरू हत्वोरुभ्यां वक्षसा चापि वक्षः ।

शीर्षं शीर्ष्णा चाथ पादौ पदाभ्यां दोर्भ्यां दोषौ जघ्नतुस्तौ यथेष्टम् ॥ २२ ॥

**चाणूरमुष्टिकौ**—(स्वगतम् ।) अहो बालयोरप्येतयोर्घनघात्यान्यति-

1. 'यथासंख्यं न' इति ख-पाठः. 2. 'आर्ययोः' इति ख-पाठः. 3. 'भागधेयवशात्' इति ख-पाठः.

कठोरतराण्यङ्गानि । येषां प्रहारो वज्रादप्यतिदुःसहोऽस्माकं मर्माणि पीडयतितराम् । (पुनर्निर्वर्ण्य ।) कथमस्य वीररसरभसोत्सेकतुङ्गान्यङ्गानि प्रतिक्षणमुपचीयमानप्रभावातिशयदुष्प्रेक्षणीयानि लक्ष्यन्ते । तथा हि ।

ऐन्द्रो वज्रः किमथ दहनो वाडवः कालकूटः
　किं वा कूटः प्रलयजलदः पुष्करावर्तकः किम् ।
किंस्वित्पुञ्जः प्रलयतडितां द्वादशार्कोदयः किं
　यस्यालोके भवति नितरामिन्द्रियाणां प्रमोषः ॥ २३ ॥

तदस्माकं नास्ति जीवन्मुक्तिप्रत्याशा । परममुक्तिमेव तु निर्विवादं निश्चिनुमहे । तथापि न युद्धादुपरमामः । यतः ।

दैवाधीनः समिति विजयश्चेदुपस्थास्यतेऽस्मां-
　स्तद्भर्तुः प्रथितयशसो वल्लभाः स्याम नूनम् ।
मृत्युर्वा चेत्त्रिदशतरुणीचामरव्यग्रहस्त-
　प्रेङ्खद्भूषारणितसुभगं स्वर्गराज्यं भजेम ॥ २४ ॥

(प्रकाशम् ।) रे रे गोपालबाल दुर्ललित, नेदानीं भविष्यासि ।

**कृष्णः**—(विहस्य ।) सत्यमात्थ । ननु रे, नहि नित्यभूतः पुनर्भवति ।

(नेपथ्ये ।)

जङ्घाबन्धभ्रमणपतनस्थानकश्येनपात-
　ग्रीवास्कन्दप्लुतनिलयनैर्मेषयुद्धप्रचारैः ।
उत्क्षिप्योच्चैः क्षितिमधिजवात्पातितः केशवेन
　क्षीणप्राणः शिव शिव लुठत्येष चाणूरमल्लः ॥ २५ ॥

**वेत्रधरः**—(सावेगम् ।) कथमसौ निहत एव । तथा हि ।

उद्भिन्नोदरकंदरोद्गिरदसृग्धाराकरालाननः
　क्रोधाध्मानविघूर्णमानतरलक्रूराक्षितारोत्करः ।
नासारोकपरीक्ष्यमाणकृपणप्राणप्रयाणक्षणो
　नष्टाशेषविचेष्टितो गिरिरिवाध्यास्ते क्षितिं कम्पयन् ॥ २६ ॥

**कोष्ठपालः**—हा धिक् कष्टं भोः ।

---

१. नासारन्ध्र.

मुष्टिभिर्मुष्टिकोऽप्येष प्रलम्बरिपुणा हतः ।
कृतोऽद्य कृतहस्तोऽपि कृतान्तसदनातिथिः ॥ २७ ॥

**वेत्रधरः**—अहह, असमञ्जसमसमञ्जसम् ।

निर्दोषाविव [1]दोषौ जयश्रियो राज्यमण्डपस्तम्भौ ।
चरणौ नीतेर्नयने सिद्धेरिव यद्धतावेतौ ॥ २८ ॥

तदिदानीं दुरवस्था जयास्था ।

(पुनर्नेपथ्ये कलकलः ।)

हन्त भोः,

हत्वा दौवारिकाणां नियुतमसिभृतां मुष्टिनैकेन पिष्ट्वा
कूटं कूटप्रवीणं शलमपि कुशलं संगरे तोशलं च ।
भित्त्वा द्वारावरोधं दलितकुवलयापीडदन्तैकशस्त्रौ
मध्ये रङ्गं प्रविष्टौ मदकलकलभोद्भासिनौ रामकृष्णौ ॥ २९ ॥

**वेत्रधरकोष्ठपालौ**—(आकर्ण्य सातङ्कम् ।) [2]तदिदमिदानीमनर्गलं कंसस्य [3]स्वशरीरमात्रचिकित्सनीयमत्याहितमुपस्थितम् । न पुनरत्र कंचित्प्रतीकारं पर्यालोचयावः । भवतु तावदिमं पूर्ववृत्तं वृत्तान्तं महाराजाय निवेद्याव-हितौ प्रत्यनन्तरीभूय प्राणव्ययेनापि स्वामिभक्तिव्रतमनुवर्तावहे । (इति निष्क्रान्तौ ।)

(ततः प्रविशतो रामकृष्णौ ।)

**कृष्णः**—(सर्वतो निरूप्य सहर्षम् ।) अहो रमणीयता [4]रङ्गवाटस्य । यतः ।

प्राकारा मणिकुट्टिमैरुपचिताः स्थूलेन्द्रनीलोपल-
प्रायाः प्राङ्गणभूमयः सितशिलासंदर्भगर्भोज्ज्वलाः ।
मुक्ताहीरकतारहारतरलस्रग्गन्धदीपाम्बर-
[5]प्रोद्भूतागुरुसारधूमशबलाश्चास्थानिका मण्डपाः ॥ ३० ॥

**रामः**—(निर्वर्ण्य साश्चर्यम् ।) अये, विश्वविलक्षणैवैषा सृष्टिः । तथा हि ।

न स्रष्टा सृष्टिमेतां विरचयितुमलं विश्वकर्मापि नैत-
त्कर्माभिज्ञो न सुज्ञः प्रतिहतवि[6]बुधाशेषमायो मयोऽपि ।

---

१. भुजौ. २. 'तदिदानीं' इति ख-पाठः. ३. 'स्वशरीरमात्रं' इति क-पाठः. ४. 'यज्ञ-वाटस्य' इति ख-पाठः. ५. 'प्रोद्धूता' इति क-पाठः. ६. 'विविधाशेष' इति क-पाठः.

नायं लोको बलारेर्न च बलिनिलयो नापि वैकुण्ठपीठी
नाप्यन्यस्यानुबिम्बः किमयमुदयते दृष्टिबन्धः प्रबन्धः ॥३१॥

(उच्चैर्मञ्चान्निरूप्य ।) अये, कथममी स्वस्वकाष्ठामधिष्ठिता नानादिगन्तागता दिक्पाला इव भूपालाः सदा रङ्गमण्डलं मण्डयन्ति । तथा हि ।

लीलादोलायमानोन्नमदमलशिरःशेखरश्रेणिरोह-
द्रोचिर्वीचिप्रपञ्चच्छलवलदमितोद्दान्तकान्तप्रतापाः ।
एते राजन्यगोष्ठीव्यतिकररभसोत्सर्पिदर्पप्ररोह-
प्राग्भारस्फारवक्षस्तटविकटलुठल्लोलमाला नृपालाः ॥ ३२ ॥

(अत्युच्चैरवलोक्य कृष्णं प्रति ।) आयुष्मन्, कथमयं सप्तभूमिप्रासादशिखरशेखरीभूतां क्रीडाभवनवलभीमस्मद्दिदृक्षोत्कलिकाकुलो मातुलोऽलंकरोति । तदस्याकुण्ठोत्कण्ठोपशमाय सत्वरमुपसर्पामः ।

(इति सोपानारोहणं नाटयतः ।)

**कंसः**—(दूरादवलोक्य सोद्वेगं ससंभ्रमं च सहसोत्थाय ।) रे रे सामन्ताः सदस्याः,

निःसार्यतामिमौ पापौ कुलाङ्गारौ मदोद्धतौ ।
मच्चक्षुःसंनिपाताग्नौ यावन्न शलभायितौ ॥ ३३ ॥

**सभ्याः**—(सर्वे समाकर्ण्य सादरमवलोक्य सानन्दम् ।) अयमयं भोः,

मल्लक्रीडाश्रमजलकणाकीर्णमुग्धाननश्रीः
पीतस्फीताम्बरपरिकरो बर्हपिच्छावतंसः ।
कण्ठोल्लुण्ठत्कमलवलयामृष्टवक्षोङ्गरागः
स्कन्धासक्तद्विरददशनः साग्रजोऽग्रेऽभ्युपैति ॥ ३४ ॥

(पुनः परिभाव्य सानुक्रोशहर्षम् ।) अहह, कथमिमौ सुकुमारतराकृती नन्दगोपकुमारौ निरीक्षमाणानामस्माकमन्तरात्मा प्रशान्तपावनत्वमवगाहते । तथा हि ।

राकासुधाकरमुधाकरचारुवक्त्र-
मिन्दीवरोदरसहोदरमेदुराङ्गम् ।

१. 'दृष्टिबन्धप्रबन्धः' इति क-पाठः. २. 'सानुक्रोशं सहर्षम्' इति क-पाठः.

कृष्णं बलं च घनसारपरागगौरं
दृष्ट्वा सुधाम्बुधिनिमज्जनमेति चेतः ॥ ३५ ॥

(पुनः सानुक्रोशम् ।) हन्त भोः, कथमयं महाराजस्य महान्धर्मव्यतिक्रम उपस्थितः । यतः ।

बालस्वभावचपलावज्ञातगुणदूषणौ ।
नयनानन्दनिःष्यन्दौ कूटयुद्धैर्जिघांसति ॥ ३६ ॥

अपि च । न केवलमिह महाराज एवापराध्यति, अपि तु तद्दाक्षिण्यादनिवारयन्तः सदस्या अपि । यदुदाहरन्ति—

न योध्याः स्त्रीबालस्थविरकृशषण्ढासमबला
न मत्तोन्मत्तार्ता न कृपणगिरो नापि विमुखाः ।
अतिक्रामन्नेतत्पतति नृपतिस्तस्य सचिवा-
न्ससभ्यानभ्येति द्विगुणितमधर्मोऽनुसरतः ॥ ३७ ॥

अपि च ।

न वारणो यस्य निवारणाय न वा रणो दोर्मदवारणाय ।
अलं बभूवास्य निरोधनाय कथं भवेमाद्य विरोधनाय ॥ ३८ ॥

तदेतत्सराजकं राष्ट्रं प्रहीणप्रायमपि परिहातुमस्माकमुचितम् ।

(पुनर्नेपथ्ये ।)

अरे रे, कथमिमावतिक्रम्यास्मच्छासनमकुतोभयाविवत एवाभिवर्तेते । तदेतौ राजद्रोहिदण्डरीत्या आततायिवधेन च नातिदूरेण निग्रहीतव्यौ । (पुनः सरोषम् ।) हंहो, किमतः परमपि दाक्षिण्यसंरक्षणेन ।

वध्यन्तां व्रजवासिनः सतनया नन्दादयः सत्वरं
हन्तव्यः प्रतिपक्षतामनुसरन्किं चोग्रसेनः पिता ।
बन्धव्यौ निगडैर्दृढैश्च भगिनीभामौ निकारोचितौ
निग्राह्यौ नितरां चिराय विविधैर्दण्डाभिघातोद्यमैः ॥ ३९ ॥

**रामः**—(कृष्णं प्रति ।) आयुष्मन्, किमद्यापि प्रतीक्ष्यते । ननु पश्य ।

रोषावेशप्रदष्टाधरमलिकतटभ्रूकुटीभङ्गभीमः
क्षुभ्यत्तारारुणाक्षः स्मयविधुतशिरःशेखरस्रस्तकेशः ।

कुक्षेराक्षिप्य कौक्षेयकमलघुललत्कालजिह्वाकरालं
देवारिर्योद्धुमस्मानयमतिरभसादासनादुज्जिहीते ॥ ४० ॥

**कृष्णः**—(विहस्य ।) आर्य,

रजसान्धमनात्मज्ञं स्वजनं मातुलं नृपम् ।
हन्तुं मनो न वलते कारुण्यप्रवणं मम ॥ ४१ ॥

**रामः**—(सरोषम् ।)

आः क्षत्रियातनय नैष विमर्षकालः
क्षत्रस्य संगरमुपेयुष एष धर्मः ।
विश्वद्रुहः किल खलानखिलान्निहन्तुं
विश्वाश्रयस्य भवतो भवतोऽवतारः ॥ ४२ ॥

**कृष्णः**—(सविचिकित्सम् ।) अनतिक्रमणीय आर्यादेशः । (इति सत्वरमुपसर्पति ।

(नेपथ्ये कलकलः ।)

हन्त भोः,

क्रोधोद्धूतासिधेनूद्धतपरिघगदापट्टिशप्रासकुन्त-
प्रोद्यच्चर्मासिचक्राक्रमजघनघनक्काणघोरीकृताशम् ।
क्षिप्त्वा योधावरोधं हरिरिव कलभं रक्षिलक्षस्य कुक्षे-
र्मञ्चादुच्चैरुदञ्चन्करकलितकचः कंसमाकर्षति क्ष्माम् ॥ ४३ ॥

अपि च ।

अगणितपरपक्षः श्येनपातं पतित्वा
चटकमिव गृहीत्वा कंसमुच्चैः कचेषु ।
अनुपतति शिलायां पोथितं पातयित्वा
व्यसुमपि गुरुवैराद्धन्त मृद्गाति पद्भ्याम् ॥ ४४ ॥

(सर्वे सातङ्कमाकर्णयन्ति ।)

**कृष्णः**—(निपुणं निरूप्य साश्चर्यम् ।) अहो, महदद्भुतमेतत् ।

शृण्वानस्याद्वितीयं निरवधिसहजानन्दसंवित्स्वरूपं
मन्वानस्यातिचित्राकृतिकृतिधिषणाशक्तिरूपोपपत्त्या ।

विश्वं कृष्णाद्द्वितीयं भयचकितधिया ध्यायतश्चान्तकाले
ज्योतिर्ज्योतिःस्वरूपे भगवति विशति ब्रह्मरन्ध्रं विभिद्य ॥४५॥

(रामः सत्वरमुपसृत्य कृष्णमालिङ्ग्य मूर्धानमाजिघ्रति । कृष्णो विमना इवाधोमुखस्तिष्ठति ।)

**रामः**—आयुष्मन्, न युक्तं हर्षस्थाने वैमनस्यम् । पश्य तावत्स्वर्वासिनामप्युत्सवम् । यतः ।

उच्चैर्दुन्दुभयो नदन्ति परितो नृत्यन्ति वाराङ्गनाः
पाथोदाः पथि सेचनाय मधुरं वर्षन्ति गर्जन्ति च ।
सद्यो दैत्यवधप्रहृष्टहृदया देवाश्च गन्धोद्धुरं
स्वर्नारीकरलूनपुष्पनिकरं मुञ्चन्ति भृङ्गीरुतैः ॥ ४६ ॥

**कृष्णः**—(सस्मितम् ।) आर्य, स्वजनघातपातकक्लिन्नमात्मानं नाभिनन्दामि । गुरुलज्जाभराक्रान्तमाननं च नोन्नमयितुमीशे । तदत्राविमर्षकृतसाहसात्परितप्यते मे चेतः ।

**रामः**—आः, कथमतिमुग्धोऽसि । न खलु समरविहारिणो वीरान्हत्वा हिंसादोषेण लिप्यन्ते । विशेषतस्त्वाततायिवधे । यत्स्मरन्ति—

'आततायिनमायान्तमपि वेदान्तपारगम् ।
जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ ४७ ॥' इति ।

तदेहि । राजापायविरहशोकावेशविवशं राजावरोधं परिसान्त्वयितुमन्तःपुरं प्रविशामः ।

**कृष्णः**—एवमस्तु ।

(इति निष्क्रान्ताः सर्वे ।)

इति कंसवधे षष्ठोऽङ्कः ।

---

सप्तमोऽङ्कः ।

(ततः प्रविशति विश्वकर्मा ।)

**विश्वकर्मा**—आदिष्टोऽस्मि तत्रभवता वासुदेवेन भगवता । यथा किल ।

निःशल्या निरमायि यद्यपि मही संहृत्य दैत्याधमान्भोजानां कुलमुज्ज्वलं विरचितं भिन्नाश्च कारागृहाः ।

---

१. 'विशिष्य त्वाततायि' इति क-पाठः. २. 'भित्त्वा च कारागृहान्' इति ख-पाठः.

स्वर्बन्धः प्रतिमोचितः क्रतुभुजश्चासन्कृतार्थास्तथा-
प्येतद्राष्ट्रमराजकं न हृदयस्वास्थ्याय कल्पिष्यते ॥ १ ॥

तदद्य तदीये पदे तत्पितरमुग्रसेनमस्मन्मातामहमभिषेक्तुमिच्छामि । तदत्र सबहुमानमाहूयन्तां तस्य पापीयसो भिया पलायिता अस्मदनुरागिणः पौराः । संनिपात्यन्तां च भोजवृष्ण्यन्धककुरुप्रभृतयो[1] राजानश्च । निर्मीयन्तां च पुराट्टालगोपुरप्रासादपरिसरोद्यानविहारभूमयः । प्रसाध्यन्तां च राजपथनगरवीथीद्वारतोरणसौधशिखरप्राकारप्रकराः[2] । प्रवर्त्यन्तां च मङ्गलाचारगीततूर्यरवाः । उद्घोष्यन्तां च सौवस्तिकब्राह्मणमन्त्रघोषाः । प्रनर्त्यन्तां[3] च स्ववासिवाराङ्गनासहस्राणि । संभ्रियन्तां च राजाभिषेकोचिताः संभाराः । आघोष्यन्तां[4] च डिण्डीरवाः । यत्किल

रच्यन्तां राजमार्गाः प्रशमितरजसः स्वर्गवाटीपटीरै-
र्बध्यन्तां तोरणानि त्रिदशपतिधनुर्मण्डलोड्डामराणि ।
उच्छ्रीयन्तां पताकाः सुरपुरतरुणीस्वेदविच्छेददक्षाः
सृज्यन्तां भूरिभेरीमुखरवमुखरा भूर्भुवःस्वर्गलोकाः॥२॥'इति ।

तदिह तावदपरं सर्वं मयैव सुविहितम् । अभिषेकसंभारसंभरणं तु ब्राह्मणैर्विधेयम् । तदत्रभवन्तं कुलाचार्यं शाण्डिल्यनामानमन्वेषयामि यावत् । (इति पुरः सर्पति ।)

(प्रविश्य ।)

**शाण्डिल्यः**—आयुष्मन्विश्वकर्मन्, क्व प्रस्थितोऽसि ।

**विश्वकर्मा**—आर्य, भवन्तमेवान्वेष्टुम् ।

**शाण्डिल्यः**—तदुच्यतां प्रयोजनम् ।

**विश्वकर्मा**—

कंसं निहत्य दनुजाननुजांश्च सप्त
निष्कण्टकां भुजबलेन विजित्य पृथ्वीम् ।

---

१. 'कुकुरप्रभृतयो' इति ख-पाठः. २. 'प्रासादप्रकराः' इति ख-पाठः. ३. 'प्रनृत्यन्तां' इति क-पाठः. ४. 'आघोष्यतां च डिण्डीरवः' इति क-पाठः.

मातामहाय भगवान्विनिवेद्य तस्य
राज्येऽभिषेक्तुमेमुमिच्छति विश्वगुप्त्यै ॥ ३ ॥

**शाण्डिल्यः**—विश्वकर्मन्, कुतः पुनरयं भगवानात्मतन्त्रे जगति निजभुजबलार्जितमपि प्राज्यं राज्यमन्यस्मै प्रतिपादयति । न पुनः स्वयमेवाभिपद्यते[2] ।

**विश्वकर्मा**—अये, बालिशोऽसि । यतः ।

स्वाराज्यादिसुखानि यस्य सहजानन्दाम्बुधेर्विप्रुषो
ब्रह्माण्डानि वसन्ति यस्य कुहरे रोम्णः परार्धात्परम् ।
लीलाबालतनोश्चराचरगुरोराश्चर्यचिन्तामणे-
र्विक्षेपाय न चेतसः प्रभवति क्षुद्रेद्दगर्थैषणा ॥ ४ ॥

**शाण्डिल्यः**—ननु भणामि ।

षट्पञ्चाशत्कोटयो यादवानां व्याप्याशेषं विश्वमध्यावसन्ति ।
तेष्वेवैकः कोऽपि किं नाभिषिक्तो भक्तः शक्तो जातु नार्हत्युपेक्षाम् ॥ ५ ॥

**विश्वकर्मा**—अस्त्यत्र किंचिन्निगूढं बीजम् ।

**शाण्डिल्यः**—तन्निभृतं कथय ।

**विश्वकर्मा**—ययातिदत्तो यदोः शापः । न तद्वंश्या राज्यभाजनं भवन्तीति महतीयं कथा पुराणेषु गीयते । अपि च ।

निहते सहजे कंसे देवकी विमनीभवेत्[3] ।
इति तत्परितोषाय तत्तातमभिषिञ्चति ॥ ६ ॥

तदास्तामप्रस्तुतमेतत् । प्रकृतमनुवर्त्यताम् ।

**शाण्डिल्यः**—क्व पुनरिदानीं भगवान् ।

**विश्वकर्मा**—मामस्मिन्कर्मणि नियुज्य स्वयं देवकीवसुदेवयोर्निगडभेदनाय कारागारं सहाग्रजेन प्रविष्टः ।

**शाण्डिल्यः**—तर्हि तत्रैवैनमनुसरामि ।

(इति निष्क्रान्तौ ।)

प्रवेशकः[4] ।

---

१. 'अभिवाञ्छति' इति ख-पाठः. २. 'अभिषिच्यते' इति क-पाठः. ३. 'विमना भवेत्' इति ख-पाठः. ४. 'प्रवेशकः' इति पुस्तकद्वयेऽपि नास्ति.

(ततः प्रविशतो रामकृष्णौ देवकीवसुदेवौ च ।)

**देवकीवसुदेवौ**—(पुत्रावालिङ्ग्य मूर्धन्यवघ्राय च सास्रम् ।) हा वत्सौ,

अद्याभूतां भवन्तौ वयमपि तदिमे जीवलोकं प्रविष्टा
व्युष्टा[1] शोकत्रियामा समजनि सुचिरात्प्रेत्यभावो[2]ऽस्मदक्ष्णोः ।
संसारोऽभूत्ससारः समुदितमहिमज्योतिषाद्यैव दिष्ट्या
यद्दृष्ट्या[3]लम्भि युष्मद्वदनशशिसुधापूरदूरावगाहः ॥ ७ ॥

**देवकी**—

नोत्सङ्गे परिशायितौ न च कराङ्गुल्यापि संचारितौ
न स्तन्यं परिपायितौ न मधुरैर्गीतैश्च संलालितौ[4] ।
सस्नेहं न निरीक्षितौ स्खलितया वाचापि नोल्लापितौ
वन्ध्याया इव वासरा मम गता लब्ध्वा भवन्तौ सुतौ ॥ ८ ॥

**रामकृष्णौ**—

आ जन्म प्रतिवासरं बहुविधेनास्मत्कृतेनागसा
दैत्येन्द्रेण विबाधितौ किल युवां नानाविधैर्बन्धनैः ।
नावाभ्यां तनयोचितं विरचितं किंचित्कदाचित्ततो
वात्सल्यादपराध्यतोरविनयं[5] क्षन्तुं युवामर्हथः ॥ ९ ॥

(इति साष्टाङ्गपातं पादयोः पततः । पितरावुत्थाप्य चिरमालिङ्गतः ।)

**कृष्णः**—(सभयमञ्जलिं बद्ध्वा ।)

मातस्ते निहतो भ्राता दुरात्मा कुलदूषणः ।
मन्तुमेनं न मे मन्तुं परं तु क्षन्तुमर्हसि ॥ १० ॥

**देवकी**—वत्स, मैवं वादीः ।

उपभुङ्क्ते निजं कर्म शुभं वा यदि वाशुभम् ।
इहामुत्र च सर्वोऽपि न तत्रान्योऽपराध्यति ॥ ११ ॥

**कृष्णः**—(सानन्दम् ।) उज्जीवितोऽस्मीदानीं शापशङ्कातङ्कसंतापात् ।

---

१. शोकरूपा रात्रिः प्रभातेत्यर्थः. २. प्रेत्यभावः पुनरुत्पत्तिः. ३. 'यद्दृष्ट्वा' इति **ख**-पाठः ४. 'संलापितौ' इति **ख**-पाठः. ५. अपराधम्.

(पुनः साञ्जलिबन्धम्।) जनकौ, यद्यनुगृहीतोऽस्मि तत्किंचिद्विज्ञापयामि। यत्किल दैवकृतात्प्रामादिकाद्वापराधात्संप्रत्यराजकं जगदिदमास्ते। न चाराजकं राष्ट्रमिष्टानिष्टप्राप्तिपरिहारयोः प्रभवति। यदुदाहरन्ति—

'अनायका विनश्यन्ति नश्यन्ति बहुनायकाः।
स्त्रीनायका विनश्यन्ति नश्यन्ति शिशुनायकाः॥ १२॥' इति।

तन्नास्मदभिजनेषु बहुषु संनिहितेष्वप्यस्मन्मातामह उग्रसेन एव तदास्पदेऽभिषेक्तव्य इति जायते मे मनोरथः। यदि पितरावनुमन्येते।

**देवकीवसुदेवौ**—प्रथमः कल्पः। अनुमतमेतदावयोरपि।

**कृष्णः**—यद्येवं तर्हि भवत्पुरःसरा मातामहाभिषेकमहोत्सवमनुवर्तामहे।

**रामः**—तदिह सर्व एव वयं कृतस्नानप्रसाधनादिमङ्गलाः श्रममपनीयाभिषेकमण्डपपरिसरमध्यास्य कृताकृतमवेक्षमाणाः समाजकौतुकमनुभवामः।

**सर्वे**—एवमस्तु। (इति मन्यन्ते।)

**कृष्णः**—(रामं प्रति।) आर्य, यावत्पितरौ कृतप्रसाधनौ राजद्वारमुपसीदतस्तावदावां कृताभिषेकं [1]महाराजमुपासीनौ पित्रोरागमन[2]मावेदयावः।

**रामः**—यथाभिरुचितमायुष्मते।

(इति निष्क्रान्तौ।)

(ततः प्रविशत्युग्रसेनो रामकृष्णौ च।)

**[3]रामकृष्णौ**—महाराज, देवकीवसुदेवौ भवन्तं द्रष्टुकामौ प्रतीहारभूमिमुपासाते।

**राजा**—(ससंभ्रमम्।) आः, किमत्रावेदनविलम्बेन। अहमेव गत्वा तौ प्रवेशयामि। (इति सहसोत्थातुमिच्छति।)

**रामकृष्णौ**—महाराज, न युक्तमिदानीमभिषिक्तस्य सर्वेश्वरपदे प्रतिष्ठितस्य स्वविधेयासु प्रजासु प्राकृतस्येव बाह्योपचाराचरणम्। तदावामेव महाराजानुज्ञया प्रवेशयावः।

---

१. 'राजानं' इति ख-पाठः. २. 'निवेदयामः' इति ख-पाठः. ३. 'रामकृष्णौ' इति पुस्तकद्वयेऽपि नास्ति.

**राजा**—नात्र किमप्युत्तरं प्रतिभाति। अतिमानार्हौ खल्वेतौ न विलम्बमर्हतः प्रियसमागमस्य।

(रामो निष्क्रम्य पितृभ्यां सह प्रविशति।)

**देवकीवसुदेवौ**—(पुरो निरूप्य।) अये, कथमयमुग्रसेनोऽत्युग्रोत्कण्ठापूर्णकण्ठस्तूर्णोपकल्पितानल्पार्हणोपकरणोऽतिरभसचलितेनान्तःकरणेनोत्तिष्ठमानोऽपि परिसरोपसन्नसेवागतानेकराजलोकोपदिष्टाभिषिक्ताचारविरोधनिरुद्ध इवास्ते। (निपुणं निरूप्य।)

अयमुदयमहीभृत्तुङ्गशृङ्गाग्रसङ्गी
दिनमणिरिव दीव्यत्युच्चसिंहासनस्थः।
कलितकनकवेत्रेणाच्युतेनाग्रभूमौ
सविनयमतिदूरं वारितामात्यभूपः॥ १३॥

तदुपसर्पावस्तावत्।

**कृष्णः**—महाराज, एतौ देवकीवसुदेवौ भवन्तमभिवादयेते।

**राजा**—आः, कथं देवकीवसुदेवौ। दिष्ट्या जीवलोकं प्रविष्टोऽस्मि। (इति सरभसमुपसृत्यालिङ्गति। सास्रम्।) हन्त भोः,

बाष्पोत्पीडः स्थगयति दृशौ गद्गदः कण्ठपीठं
शोकावेगो दहति हृदयं चेतनामुच्छिनत्ति।
कृच्छ्रान्मुक्तौ कथमपि चिरात्संगतौ वां न चेशे
वाचा संभावयितुमिह हा चक्षुषा चेतसा वा॥ १४॥

**देवकीवसुदेवौ**—देव, दैवायत्ते साधारणे च विषये नार्हस्यात्मानं विषादयितुम्। (इत्यन्योन्यमश्रूणि परिमृजन्ति।)

**राजा**—इत आस्यताम्। (इत्यर्धासने समुपवेशयितुमाकर्षति।)

**देवकी**—नोचितमस्मद्विधैरिदमीदृशमासनमध्यासितुम्।

**राजा**—(विहस्य।) अये, कथमहं रामकृष्णाभ्यामीदृशे कर्मणि नियुञ्जानाभ्यां स्वजनव्यवहारबाह्यः कृतोऽस्मि। (इति स्वसंनिहित आसने समुपवेशयति।)

---

१. 'वलितेन' इति क-पाठः. २. 'उपपन्न' इति ख-पाठः. ३. 'शोचे' इति ख-पाठः. ४. 'समामृजन्ति' इति ख-पाठः.

**देवकी**—महाराज, यदीदानीमपि ज्ञातेयमनुरुध्यते तर्हि वत्सयो रामकृष्णयोः कृतागसोर्दुर्ललितयोरपि परेभ्यो महाराजेन भक्तावनुरक्तावनुचरौ ज्ञाती इति वा संरक्षणं करणीयम्।

**राजा**—किमुच्यते संरक्षणमिति। यतः।

विश्वाधीशस्त्रिभुवनगुरुः सर्वगः सर्वशक्तिः
साक्षी साक्षान्निरवधिपरानन्दसंदोहकन्दः।
लीलाबालः परमपुरुषः क्लेशकोषाद्यपेतः
कुक्षौ यस्य त्रिभुवनमिदं को नु तं त्रातुमीष्टे॥ १५॥

अपि च।

एष क्रीडनकैः स्वयं विरचितैरस्मादृशैः क्रीडति
प्रज्ञाया निधिरैन्द्रजालिक इव व्यालादिभिर्मायिकैः।
आत्मानं लघुवत्परांश्च गुरुवत्संदर्शयँल्लीलया
पुत्रभ्रातृसुहृत्सखिव्यतिभिदाभ्रान्त्याभितो भासते॥ १६॥

**देवकी**—देव, स एष प्रेमोद्गारः। तथा हि।

जडोऽपि क्षीणोऽपि प्रकृतिकुटिलोऽपि प्रविगल-
त्कलोऽपि द्राग्दोषाकरवपुरपीशेन विधृतः।
मृगाङ्कश्चेन्मौलौ द्विजपतिधिया तद्भवमहो
महोदाराः प्रायो लघुमपि नयन्त्येव गुरुताम्॥ १७॥

**कृष्णः**—(प्रविश्य सप्रश्रयावनामम्।) महाराज,

एतच्छीतरुचेर्मरीचिनिचयं स्रोतः सुरस्रोतसः
स्फूर्जद्बालमृणालजालकमिभाधीशस्य दन्तद्युति।
निर्मोकं भुजगेश्वरस्य विशदं प्रालेयधारागृहं
पार्श्वस्थो विधुनोति चामरयुगं श्रीसिंहलाधीश्वरः॥ १८॥

**रामः**—महाराज,

अम्भोजं विजयश्रियो निलयनं शीतांशुबिम्बं दिवः
सेवायै प्रणतं स्वतोऽत्रभवतो मूर्तं यशोमण्डलम्।

स्फारस्फाटिकसौधमेतदमलं युष्मत्प्रतापार्चिषः
　श्वेतच्छत्रमयं बिभर्ति निभृतं श्रीकामरूपेश्वरः ॥ १९ ॥

अपि च ।

आस्ते कलिङ्गाधिपतिर्गजानां कोटीः प्रदाय प्रवहन्मदान्धाः ।
गौडेश्वरोऽपि प्रतिपाद्य सर्वं संसेवते संप्रति संप्रतीतः ॥ २० ॥

**कृष्णः**—कथं वा प्रतिपुरुषं निवेदयामः । [1]संक्षेपतोऽवधार्यताम् ।

त्वङ्गत्तुङ्गतुरंगपुंगवगलद्दानद्विपद्वीपजो-
　दञ्चच्चारुपदार्थसार्थरमणीचञ्चन्मणीनां गणैः ।
क्षोणीपाः समुपासते परिजनान्विज्ञापयन्तो बहि-
　र्द्वारे कोऽप्यधिका नतेरवसरं लब्धुं दिगन्तागताः ॥ २१ ॥

**राजा**—(सहर्षम् ।) वासुदेव, भवदनुगृहीतानां भवत्सहायानां कियदेतत् । तथा हि ।

येषां त्वं दयसे हरे कियदिदं तेषां कृपायाः फलं
　राज्यप्राज्यगजादिसंपदियती खद्योतविद्योतिका ।
ब्रह्मेन्द्रादिपदानि यस्य करुणालेशानुषक्तेः फलं
　यस्याः सर्वपुमर्थमस्तकमणेर्विघ्नाय सिद्ध्यष्टकम् ॥ २२ ॥

अपि च ।

शीतं चन्दनचन्द्रिकापरिचयात्स्फीतं नभोमण्डला-
　द्गीतं किंनरकामिनीपरिषदाधीतं सुधाम्भोधिना ।
उन्नीतं सकलोपकारकरणाद्भीतं परीवादतः
　श्रीदामोदर किं भणामि भवतः सौजन्यजन्यं यशः ॥ २३ ॥

तद्भवानेव सर्वानेतान्समागतान्यथोचिताचारचतुरवचनादिभिः स्वयमेव संभावयतु । किमत्रान्यैरुपदेष्टव्यम् ।

**कृष्णः**—यदादिशति महाराजः । (इति बहिर्निष्क्रम्य तोरणपरिसरे स्थित्वा दक्षिणं बाहुमुद्यम्योच्चैःस्वरम् ।) भो भो नानादिगन्तागताः ससामन्ताः सकलभूपालाः, सजानपदाः पौरजनाश्च, सावधानाः समाकर्णयत महाराजस्य श्रीमत उग्रसेनस्य शासनम् । यत्किल

1. 'अन्यदप्यवधार्यताम्' इति ख-पाठः.

स्वेषु स्वेषु पदेषु तिष्ठत चिरान्नित्योत्सवैर्नन्दत
व्यावर्तध्वमनध्वनः परहितैर्मोदध्वमाध्वं पथि ।
राज्ञः शासनमाद्रियध्वमुचितं दद्ध्वं पृथिव्याः करं
सेवध्वं विविधोपदाभिरनघं यद्यात्मनोऽभीप्सथ ॥ २४ ॥

(पुनः प्रविश्य ।) महाराज, यथादिष्टमनुष्ठितम् । आघोषितं च राजानुशासनं पुरनगरजनपदेषु । अनुकूलिताश्च प्रसाददानादिभिर्लोकपालाः, किं पुनर्भूपालाः । अधिकृताश्च पदे स्वामिहितैषिणो लोकाः । परितोषिताश्च सकलजनपदाः । किं ते भूयः प्रियमुपकरोमि ।

**राजा**—वासुदेव, किमतःपरमपि कर्तव्यमवशिष्यते । यतः ।

उत्पत्तिप्रभृतिक्रमेण दितिजाः सर्वेऽपि निःशेषिताः
स्वर्बन्धः पितरौ वयं च निगडे बद्धाश्चिरान्मोचिताः ।
त्रातं गोकुलमिन्द्रतः प्रकुपितादुद्धृत्य गोवर्धनं
प्राज्यं राज्यमकण्टकं भुजबलेनावर्ज्य मय्यर्पितम् ॥ २५ ॥

तथापीदमस्तु—

भूपालाः परिपालयन्तु विधिवद्धर्मेण वर्णाश्रमा-
न्पृथ्वी कामफला भवत्वविरतं वर्षन्तु काले घनाः ।
ईर्ष्यामुज्झतु दुर्जनः परगुणेष्वासज्जतां सज्जनः
सत्काव्यामृतवर्षिणी कविमुखे वाणी चिरं नन्दतु ॥ २६ ॥

अपि च ।

साहित्यामृतसिन्धुसान्द्रलहरीनिर्व्याजमज्जन्मनो
मज्जानः परिशीलितामलकलामोदेन मेदस्विनः ।
उद्यत्काव्यकथाप्रबन्धमधुरद्राक्षासदृक्षाक्षराः
स्वैरं कंसवधं बुधाश्चिरतरं गायन्तु कृष्णानुगाः ॥ २७ ॥

**कृष्णः**—एवमस्तु ।

(इति निष्क्रान्ताः सर्वे ।)

इति कंसवधे सप्तमोऽङ्कः ।

**समाप्तोऽयं ग्रन्थः ।**

KÂVYAMÂLÂ. 10.

THE

# SAMAYAMÂTṚIKÂ.

OF

# KSHEMENDRA.

EDITED BY

PANDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂṆDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1888.

*Price 8 Annas.*

*( Registered according to act XXV of 1867.)*

*( All rights reserved by the publisher. )*

·काव्यमाला. १०.

महाकविश्रीक्षेमेन्द्रविरचिता

# समयमातृका ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधिता ।

सा च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीता ।

१८८८

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यं रूप्यकार्धः ।

# काव्यमाला।

## महाकविश्रीक्षेमेन्द्रकृता
## समयमातृका।

प्रथमः समयः।

अनङ्गवातलास्त्रेण जिता येन जगत्रयी।
विचित्रशक्तये तस्मै नमः कुसुमधन्वने ॥ १ ॥

यस्या दुर्धरघोरवक्त्रकुहरे विश्वक्षये लक्ष्यते
क्षुब्धाब्धाविव लोलबालशफरी कुत्रापि लोकत्रयी।
तामज्ञातविशालकालकलनां तैस्तैः पुराणैरपि
प्रौढां देहिसमूहमोहनमयीं कालीं करालां नुमः ॥ २ ॥

क्षेमेन्द्रेण रहस्यार्थमन्त्रतन्त्रोपयोगिनी।
क्रियते वाररामाणामियं समयमातृका ॥ ३ ॥

अस्ति स्वस्तिमतां विलासवसतेः संभोगभङ्गीभुवः
केलिप्राङ्गणमङ्गनाकुलगुरोर्देवस्य शृङ्गारिणः।
कश्मीरेषु पुरं परं प्रवरतालब्धाभिधाविश्रुतं
सौभाग्याभरणं महीवरतनोः संकेतसद्म श्रियः ॥ ४ ॥

यत्र त्रिनेत्रनेत्राग्नित्रस्तस्त्यक्त्वा जगत्रयीम्।
पौरस्त्रीत्रिवलीकूले वसत्यसमसायकः ॥ ५ ॥

तत्राभूदभिभूतेन्दुद्युतिः कंदर्पदर्पभूः।
कान्ता कलावतीनाम वेश्या वश्याञ्जनं दृशोः ॥ ६ ॥

कुचयोः कठिनत्वेन कुटिलत्वेन या भ्रुवोः।
नेत्रयोः श्यामलत्वेन वेश्यावृत्तमदर्शयत् ॥ ७ ॥

---

१. प्रवरपुरनाम्ना प्रसिद्धम्.

सा हर्म्यशिखरारूढा कदाचिद्गणिकागुरुम् ।
कामिनां नर्मसुहृदं ददर्श पथि नापितम् ॥ ८ ॥

श्मश्रुराशीचितमुखं काचकाचरलोचनम् ।
पीवरं तीरमण्डूकैर्मार्जारमिव शारदम् ॥ ९ ॥

विटानां केलिपटहं तप्तताम्रघटोपमम् ।
दधानं रोममालान्तं स्थूलखल्वाटकर्परम् ॥ १० ॥

ताम्बूलष्ठीवनत्रासादुपरि क्षिप्तचक्षुषम् ।
आनिनाय तमाहूय सा नेत्राञ्चलसंज्ञया ॥ ११ ॥

स समभ्येत्य तां दृष्ट्वा चिन्तानिश्चललोचनाम् ।
पप्रच्छ विस्मितः कृत्वा नर्मप्रणयसंवृतिम् ॥ १२ ॥

ध्यानालम्बनमाननं करतले व्यालम्बमानालकं
लुप्तव्यञ्जनमञ्जनं नयनयोर्निःश्वासतान्तोऽधरः ।
मौनक्लीबनिलीनकेलिविहगं निद्रायमाणं गृहे (?)
वेषः प्रोषितयोषितां समुचितः कस्मादकस्मात्तव ॥ १३ ॥

किं मेखला मदनबन्दिवधूर्नितम्बे
सुश्रोणि नैव बत गायति मङ्गलानि ।
अङ्गं कृशाङ्गि किमनङ्गयशःप्रभेण
कर्पूरचन्दनरसेन न लिप्तमेतत् ॥ १४ ॥

प्राप्तं पुरः प्रचुरलाभमसंस्पृशन्ती
भाविप्रभूतविभवाय कृताभियोगा ।
किं केनचित्सुचिरसेवननिष्फलेन
मिथ्योपचारवचनेन न वञ्चितासि ॥ १५ ॥

लोभाद्गृहीतमविभाव्य भयं भवत्या
दर्पात्प्रदर्शितमशङ्कितया सखीभिः ।
दत्तं तवाप्रतिममाभरणं नृपार्हं
चौरेण किं प्रलपितं नगराधिपाग्रे ॥ १६ ॥

दानोद्यतेन धनिकेन विशेषसङ्गा-
त्सक्तोऽयमित्यथ शनैरवसायितेन ।
लब्धान्तरस्वजनमित्रविरोधितेन
किं त्वन्निकारकुपितेन कृतो विवाहः ॥ १७ ॥

दत्त्वा सकृत्तनुविभूषणमंशुकं वा
यद्रागानुबन्धविरलीकृतकामुकेन ।
यक्षेण सर्वजनतासुखभूः प्रपेव
तीक्ष्णेन भीरु किमु केनचिदावृतासि ॥ १८ ॥

वित्तप्रदानविफलेन पलायमाना
कौटिल्यचारुचटुला शफरीव तोये ।
गूढं वशीकरणचूर्णमुचा कचेषु
किं केनचिन्न कुहकेन वशीकृतासि ॥ १९ ॥

निष्कासितुं हृदयसंचिततीव्रवैरे
संदर्शितप्रकटकूटधनोपचारे ।
लोभात्त्वयानपचयैः पुनरावृतेव (?)
प्राप्तः किमु प्रसभमर्थवशादनर्थः ॥ २० ॥

कैर्नित्यसंभवनिजं वणिजं त्यजन्त्या
यान्त्या तृणज्वलनदीप्तिनियोगलक्ष्मीम् ।
नष्टे ····वस्त्रविभवे विरते पुराणे
जातस्तव स्तबकितोभयलाभभङ्गः (?) ॥ २१ ॥

सिद्धः प्रयत्नविभवैः परितोषितस्य
दातुं समुद्यतमतिः स्वयमर्थशास्त्रम् ।
नीतस्तव प्रचुरमत्सरयान्यया किं
गेहान्निधिर्बहुधनः स्वसखीमुखेन ॥ २२ ॥

किं वावसादपदवीमतिवाह्य कष्टां
लब्धाविकारविभवेन विवर्जितासि ।

किं मूर्च्छितासि विरतासि सुखोज्झितासि
ध्यानावधानबधिरासि निमीलितासि ॥ २३ ॥
अप्युद्दामव्यसनसरणैः संगमे कामुकानां
भद्रं भद्रे भुवनजयिनस्त्वत्कलाकौशलस्य ।
अप्युत्साहप्रचुरसुहृदः कामकेलीनिवासाः
प्रौढोत्साहास्तव सुवदने स्वस्तिमन्तो विलासाः ॥ २४ ॥
इत्यादि तेन हितसंनिहितेन पृष्टा
स्पष्टा भृशं विभवभङ्गभयोद्भवेन ।
सा तं जगाद सुखदुःखसहायभूतं
चिन्ताविशेषविवशा बहुशः श्वसन्ती ॥ २५ ॥
शृणु कङ्क ममानन्तां चिन्तां संतापकारिणीम् ।
ययाहमवसीदामि ग्रीष्मग्लानेव मञ्जरी ॥ २६ ॥
सा सखे करभग्रीवा मातुर्माता स्थिरस्थितिः ।
व्याली गृहनिधानस्य हता वैद्याधमेन मे ॥ २७ ॥
योऽसाववद्यविद्याविद्वैद्यः सद्यः क्षयोद्यतः ।
दर्पादातुरवित्तेन वृद्धोऽपि तरुणायते ॥ २८ ॥
तेन रोगधराख्येन दत्ता रसवती मम ।
त्रिभागशेषतां नीता लौल्यलोभोद्भवात्तया ॥ २९ ॥
प्रपञ्चवञ्चनावैरात्सातेनातुरतां गता ।
काञ्चन्या पञ्चतां नीता पश्यन्ती काञ्चनं जगत् ॥ ३० ॥
हिरण्यवर्णां वसुधां तस्मिन्नन्तक्षणेऽपि सा ।
दृष्ट्वा मामब्रवीद्वत्से गृह्यतां गृह्यतामिति ॥ ३१ ॥
ततस्तस्यामतीतायां गृहं मे शून्यतां गतम् ।
पराभवास्पदीभूतं कामुकैः स्वेच्छया वृतम् ॥ ३२ ॥
रिक्तः शक्तो न निर्याति नाप्नोत्यवसरं धनी ।
शून्यशालेव पथिकैर्निरुद्धा कामुकैरहम् ॥ ३३ ॥

तस्माद्विदेशं गच्छामि नेच्छाम्युच्छृङ्खलां स्थितिम् ।
कथं रक्तविरक्तानां तुल्या स्वायत्ततां सहे ॥ ३४ ॥
इत्युद्बाष्पदृशस्तस्याः प्रलापं वृद्धनापितः ।
आकर्ण्य तां समाश्वास्य सोच्छ्वासं प्रत्यभाषत ॥ ३५ ॥
भवत्या वित्तलोभेन निर्विचारतया परम् ।
भिषग्दुष्टभुजंगोऽसौ स्वयमेव प्रवेशितः ॥ ३६ ॥
जनन्यो हि हतास्तेन वेश्यानां पथ्ययुक्तिभिः ।
किं कुट्टनीकृतान्तोऽसौ वैद्यो न विदितस्तव ॥ ३७ ॥
स रोगिमृगवर्गाणां मृगयानिर्गतः पथि ।
इत्यादिभिः स्तुतिपदैर्विटचेटैः प्रणम्यते ॥ ३८ ॥
'यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वप्राणहराय च ॥ ३९ ॥'
अधुना दुःखमुत्सृज्य मनः स्थित्यै विधीयताम् ।
कृत्रिमः क्रियतां गेहे रक्षायै जननीजनः ॥ ४० ॥
व्याघ्रीव कुट्टनी यत्र रक्तपानामिषैषिणी ।
नास्ते तत्र प्रगल्भन्ते जम्बुका इव कामुकाः ॥ ४१ ॥
यत्र तत्र निमग्नानां वेश्यानां जननीं विना ।
संध्ययोर्दिवसस्यापि मुहूर्तार्धस्य न क्षणः ॥ ४२ ॥
न भवत्येव धूर्तस्य वेश्यावेश्मन्यमातृके ।
चुल्लीसुप्तस्य हेमन्ते मार्जारस्येव निर्गमः ॥ ४३ ॥
प्रविष्टा कुट्टनीहीनगृहं क्षीणपटा विटाः ।
गाथाः पठन्ति गायन्ति व्ययद्रविणमर्थिताः ॥ ४४ ॥
अकण्टका पुष्पमही वेशयोषिदमातृका ।
मन्त्रिहीना च राज्यश्रीर्भुज्यते विटचेटकैः ॥ ४५ ॥
अयं पीनस्तनाभोगसौभाग्यविभवोचितः ।
द्रविणोपार्जनस्यैव कालः कुवलयेक्षणे ॥ ४६ ॥

खला इवातिचपलाः कृतालिङ्गनसंगमाः ।
न गताः पुनरायान्ति बाले यौवनवासराः ॥ ४७ ॥
प्रथम································ ।
················नां पुष्पवतीनां लतानां च ॥ ४८ ॥

तस्मान्मानिनि कापि हेमकुसुमारामोच्चयाय त्वया
माता तावदनेककूटकुटिला काचित्समन्विष्यताम् ।
एताः सुभ्रु भवन्ति यौवनभरारम्भे विजृम्भाभुवो
वेश्यानां हि नियोगिनामिव शरत्काले घनाः संपदः ॥ ४९ ॥

अस्त्येव सा बहुतराङ्कवती तुलेव
कालस्य सर्वजनपण्यपरिग्रहेषु ।
क्षिप्रप्रकृष्टपलकल्पनया ययासौ
भागी कृतः परिमितत्वमुपैति मेरुः ॥ ५० ॥

यासौ रामामलयजलतागाढसंरोधलीला
निर्यन्त्राणां नियमजननी भोगिनां मन्त्रमुद्रा ।
विश्वं यस्याः फलकलनया लक्ष्यतामेति पाणौ
तस्या जन्मक्रमपरिगतं श्रूयतां वृत्तमेतत् ॥ ५१ ॥

तद्वृत्तमात्रश्रवणेन कोऽपि संजायते बुद्धिविशेषलाभः ।
तयोपदेशे स्वयमेव दत्ते भवत्यसौ हस्तगता त्रिलोकी ॥ ५२ ॥

इति श्रीव्यासदासापराख्यक्षेमेन्द्रनिर्मितायां समयमातृकायां चिन्तापरिप्रश्नो नाम प्रथमः समयः ।

---

## द्वितीयः समयः ।

अथ दत्तावधानायां कलावत्यां यथाविधि ।
कथामकथयत्कङ्कः कुट्टन्याः कपटाश्रयाम् ॥ १ ॥
सर्वभक्षां नमस्कृत्य तामेव भवभैरवीम् ।
वदामि चरितं तस्याः कुक्षौ यस्या जगत्त्रयी ॥ २ ॥
परिहासपुरे पूर्वं पान्थावसथपालिका ।
बभूव भूमिका नाम······················ ॥ ३ ॥

.......................... कन्यका ।
जाता घरट्टमालायामर्घवर्घटिकाभिधा ॥ ४ ॥
सा वर्धमाना सुमुखी पौरैः पर्वसु पूजिता ।
तद्गृहेष्वकरोच्चौरी पूजाभाजनसंक्षयम् ॥ ५ ॥
सप्तवर्षैव सा लोभाद्दाक्प्रौढा हट्टतोरणे ।
जनन्या पण्यतां नीता लोके जालवधाभिधाम् ॥ ६ ॥
सुवृत्तशङ्खलतिका सकूटकुचकञ्चुका ।
कामुकाराधनं चक्रे चुम्बनालिङ्गनेन सा ॥ ७ ॥
कुङ्कुमार्थी वणिक्सूनुरथ तेनाययौ युवा ।
सुन्दरः पूर्णिको नाम पूर्णवर्णसुवर्णवान् ॥ ८ ॥
सभायां नेत्रवलनालोलभ्रूलास्यविभ्रमैः ।
कृष्टः कौतुकवान्भेजे चपलासंगमं निशि ॥ ९ ॥
सा तस्य क्षैब्यसुप्तस्य निशि कण्ठावलम्बिनी ।
निगीर्य शनकैः सर्वं कर्णाभरणकाञ्चनम् ॥ १० ॥
अङ्गुलीभ्यः समाकृष्य हेमवालकवालिकाः ।
चौरग्रस्तेव चुक्रोश हा हतास्मीति सस्वनम् ॥ ११ ॥
प्रतिबुद्धोऽथ सहसा स तया मुषितो वणिक् ।
वाससाच्छादितशिरा ययौ स्वजनलज्जितः ॥ १२ ॥
ततः सा यौवनवती रुचिराभरणाम्बरा ।
उवास शंकरपुरे मह्णेति कृताभिधा ॥ १३ ॥
भूरिभाग्यभरैः सक्ता सा कामिकुसुमोच्चये ।
*लेभे संभोगविश्रान्ति न रजन्यां न वासरे ॥ १४ ॥*
निर्गच्छतां प्रविशतां प्रतिपालयतां बहिः ।
बभूव तद्गृहे संख्या न शुनामिव कामिनाम् ॥ १५ ॥
कूपे प्रपायामुद्याने सूदपौष्पिकवेश्मसु ।
सखीगृहे च तुल्यास्तान्सा सिषेवेऽह्नि कामुकान् ॥ १६ ॥

क्षपारम्भे क्षीबं शिशुकमिव निक्षिप्य शयने
जगामान्यं तस्मिन्सुरतघननिद्रापरमपि ।
निशाशेषे शूलाकुलनिजसखीवेश्मगमना-
पदेशेनान्यं सा सततमगमत्स्वक्रयभरे ॥ १७ ॥
नानावहारकुपितैः सान्विष्टा सुभगैर्भृशम् ।
पलायमाना गुप्तेषु तस्थौ कामुकवेश्मसु ॥ १८ ॥
ततः प्रासादपालेन नन्दिसोमेन सा निशि ।
गौरीगर्भगृहं रात्रौ रागान्धेन प्रवेशिता ॥ १९ ॥
निःश्वासनिद्रया तस्मिन्प्रयाते काष्ठभूतताम् ।
देवालंकरणं सर्वं सा गृहीत्वा ययौ जवात् ॥ २० ॥
ततः समरसिंहस्य डामरस्यावरुद्धिका ।
भूत्वा नागरिकानाम प्रतापपुरवासिनः ॥ २१ ॥
प्रभूतपिशिताहारसंभारैः स्थूलतां गता ।
सा तस्य भीमसेनस्य हिडिम्बेवाभवत्प्रिया ॥ २२ ॥
सर्वस्वस्वामिभावं सा संप्राप्ता तस्य रागिणः ।
प्रेरणं बन्धुयुद्धेषु विदधे निधनैषिणी ॥ २३ ॥
हते पितृव्रजे तस्मिन्बद्धमूला परं गृहे ।
साभूदपरपुत्रस्य श्रीसिंहस्यावरुद्धिका ॥ २४ ॥
विगलद्यौवना यूनः सा सपत्नीजिगीषया ।
चकार तस्य स्वीकारं वशीकरणमूलकैः ॥ २५ ॥
मत्स्ययूषघृतक्षीरपलाण्डुलशुनादिभिः ।
प्रत्यायन[1]प्रसक्ताभूद्यौवनस्य प्रियस्य सा ॥ २६ ॥
अथ भूपभयात्तस्य प्रत्यासत्तेऽथ भूतपे(?) ।
भूरि द्रविणमादाय साविशन्नगरान्तरम् ॥ २७ ॥
ततस्तनुतरस्वच्छवसना विनतानना ।
रण्डा मृगवती नाम साभूत्स्पर्शस्पृहामही ॥ २८ ॥

---

१. 'आराधन' इति पाठान्तरम्.

सदा सुरेश्वरीं गत्वा शतधारातटे चिरम् ।
तिलवालुकदर्भाङ्का सा चक्रे पितृतर्पणम् ॥ २९ ॥
तत्र बन्धुरसाराख्यमश्वारोहं महाधनम् ।
तीर्थस्थिता सा जग्राह मत्स्यं बकवधूरिव ॥ ३० ॥
गृहं मुष्ट्या गृहीत्वेव चित्तग्रहणकोविदा ।
सर्वायव्ययकार्येषु सैव तस्याभवद्विभुः ॥ ३१ ॥
मासेन सा गते तस्मिन्पञ्चतां बहुसंचये ।
तस्थौ पादाववष्टभ्य तस्यानुगमनोद्यता ॥ ३२ ॥
तद्बान्धवैर्वार्यमाणा मिथ्यैवारब्धदुर्ग्रहा ।
धैर्यावष्टम्भगम्भीरमुवाचार्याङ्गनेव सा ॥ ३३ ॥
कुले महति वैधव्यं वैधव्ये शीलविप्लवः ।
शीलभ्रंशे वियोगोऽयं वह्निना मम यास्यति ॥ ३४ ॥
इत्युक्त्वा तीव्रसंकल्पनिश्चलाश्ममयीव सा ।
तद्वित्तावाप्तहर्षेण सत्त्वव्यक्तिमिवावहत् ॥ ३५ ॥
ततस्तद्द्रविणस्वाम्यं राजादेशादवाप्य सा ।
प्रार्थिता राजपुरुषैस्तस्थौ लीलावलम्बिनी ॥ ३६ ॥
अथाश्वशालादिविरं स्वीकृत्य रतिवाडवम् ।
सा चक्रे जीवलोकस्य स्वनामपरिवर्तनम् ॥ ३७ ॥
तल्लाभसेवया नित्यं सा तस्य स्नानकोष्ठके ।
विलासस्खलितालापैर्दिविरस्याहरन्मनः ॥ ३८ ॥

कृत्वा लुण्ठि दिवसमखिलं भूरिभूर्जप्रयोगै-
भुक्त्वा पीत्वा निशि बहुतरं कुम्भकर्णायमानः ।
प्रातः स्नानव्यतिकरकलादम्भसंभावनाभू-
र्माद्यं दाहं नयति दिविरः शान्तिमन्तर्जलेन ॥ ३९ ॥

प्रवृद्धापरपुत्राथ दिविराराधनव्रता ।
निखिलं जीवलोकं सा विक्रीय धनमाददे ॥ ४० ॥

---

१. माद्यं मद्यभवम्.

सा वेश्मविक्रयादाने पुत्रैराकृष्य वारिते ।
गत्वाधिकरणं चक्रे मठिभट्टोपसेवनम् ॥ ४१ ॥
उत्कोचारब्धसंघट्टैर्भट्टैः कूटरथादिभिः ।
सादिष्टाभीष्टसंपत्तिर्जग्राह जयपट्टकम् ॥ ४२ ॥
गृहं विक्रीय सर्वस्वं गृहीत्वा पुत्रशङ्किनी ।
सा चित्रवेषप्रच्छन्ना ययौ शाक्तमठाश्रयम् ॥ ४३ ॥
कृष्णीकृतश्वेतकचा रङ्गाभ्यङ्गेन भूयसा ।
........जलेव सा तत्र नवपण्याङ्गनाभवत् ॥ ४४ ॥
चलित्वाभ्यागता................ वणिग्वधूः ।
इति तस्याः प्रवादेन बभूवाधिकविक्रयः ॥ ४५ ॥
सत्यासत्यकथातत्त्वमविचार्यैव धावति ।
गतानुगतिकत्वेन प्रवादप्रणयी[1] जनः ॥ ४६ ॥
क्षीणजिह्वाधरकरा कोषपानेन कामिनाम् ।
छिन्नाङ्गुलिः सा जग्राह[2] रागवेलां पुनः पुनः ॥ ४७ ॥
सा चौरद्रविणादानाद्गृहीता शठचेटकैः ।
प्रत्यक्षापह्नववती सुबद्धा बन्धने धृता ॥ ४८ ॥
तत्र बन्धनपालेन भुजंगाख्येन संगता ।
निर्विकल्पसुखा चक्रे मत्स्यापूपमधुक्षयम् ॥ ४९ ॥
साथ बन्धनपालस्य गाढालिङ्गनसंगमे ।
क्षीबस्य चुम्बनासक्ता जिह्वां चिच्छेद मुक्तये ॥ ५० ॥
सा जिह्वाछेदनिःसंज्ञं तमाक्रन्दविवर्जितम् ।
स्त्रीवेषं स्वांशुकैः कृत्वा जगामोत्क्षिप्तशृङ्खला ॥ ५१ ॥
सा भग्ननिगडा प्राप्य रजन्यां विजयेश्वरम् ।
महामात्यसुतास्मीति जगादानुपमाभिधाम्[3] ॥ ५२ ॥

---

१. 'प्रत्ययी' इति पाठः. २. 'जगृहे' इति पाठः. ३. 'जगादानसँमाभिधाम्' इति पाठः.

सा तत्र भोगमिश्रस्य प्रीत्या रत्नैरवाकिरत्।
*पुराणचित्ररूपस्य यौवनस्याल्पशेषताम्* ॥ ५३ ॥
यत्नोत्क्षिप्तकुचा कचायततया ……………करे
बद्धापाटलपट्टकेन सरलस्थूलाञ्जनव्यञ्जना।
नासार्धावधि वाससा च वदनं संछाद्य विद्याधरी
केयं नूतननिर्गतेति विदधे सा मुग्धसंमोहनम् ॥ ५४ ॥
तामेकवारं दृष्ट्वैव नग्नां प्रथमकौतुकात्।
पथापि तेन वैरस्यान्न कश्चित्पुनराययौ ॥ ५५ ॥
शीतशालेव शिशिरे दीपमालेव वासरे।
जीर्णा निर्माल्यमालेव वेश्या कस्योपयुज्यते ॥ ५६ ॥
सा तत्र ग्राहकाभावान्मृ[1]ष्यन्ती पथिकांश्चलान्।
संध्यायामञ्चलाकर्षैः स्वल्पभाटीमयाचत ॥ ५७ ॥
तपस्विनी शिखाख्या सा सङ्गं चक्रे तपस्विना।
तत्र भैरवसोमेन भिक्षाभक्तार्धदायिना ॥ ५८ ॥
भस्मस्मेरशरीरसंचितरुचिर्दत्ताक्षिजीवाञ्जना
बिभ्राणा स्फटिकाक्षसूत्रममलं वैचित्र्यमित्रं गले।
निःसंकोचनिलीनकञ्चुककचत्सुस्तब्धबाहुस्तनी
साभूत्क्षोभविधायिनी हतधियां भिक्षाक्षणे निर्गता ॥ ५९ ॥
जाते तत्राथ दुर्भिक्षे भिक्षाभक्तेऽतिदुर्लभे।
सा रात्रौ देवमात्रादि ययौ हृत्वा तपस्विनः ॥ ६० ॥
सा कृत्याश्रमकं गत्वा विहारं हारितस्थितिः।
भिक्षुकी वज्रघण्टाख्या बभूव ध्याननिश्चला ॥ ६१ ॥
पात्रं तत्र गुणोचितं करतले कृत्वाथ भिक्षास्पदं
जीर्णं कामुककूटरागसदृशं काषायमादाय सा।
चक्रे मुण्डनमण्डनं परिणमत्कूष्माण्डखण्डोपमं
पिण्डाप्त्यै विटटक्कनापरिचयश्रेणीविहारं शिरः ॥ ६२ ॥

---

१. 'दृश्यते' इति पाठः.

पट्टी मण्डलशिक्षायै प्रणतानां सदैव सा ।
गृहे गृहे कुलस्त्रीणां ददौ दौःशील्यदेशनाम् ॥ ६३ ॥
वश्यप्रयोगैर्वेश्यानां वणिजामृद्धिवर्धनैः ।
मन्त्रवादेन मूर्खाणां सा परं पूज्यतां ययौ ॥ ६४ ॥
तत्रोपासकदासेन मङ्गलाख्येन संगता ।
सा गर्भं दम्भभोगानां मूर्तं विघ्नमिवादधे ॥ ६५ ॥
विच्छिन्ने पिण्डपाते सा लम्बमानमहोदरी ।
प्रसूता गर्भमुत्सृज्य जगाम नगरं पुनः ॥ ६६ ॥
कूटकेशवती तत्र चित्रसेनस्य मन्त्रिणः ।
पुत्रजन्मनि सा पुण्यैः पत्न्या धात्री प्रवेशिता ॥ ६७ ॥
सार्धक्षीराभिधा धात्री सिंहपादवृसीस्थिता ।
बालोत्सङ्गा गृहं सर्वं ग्रासीकर्तुमिवैक्षत ॥ ६८ ॥
क्षीरसंक्षयरक्षायै संप्राप्तसरसाशना ।
सा मन्त्रिभवने धात्रा धात्री पात्रीकृता श्रियः ॥ ६९ ॥

कण्ठे विद्रुममालिका श्रवणयोस्ताडीयुगं राजतं
[1]स्थूलस्थूलविभक्तिसक्तवटकप्रा[2]ग्भारभाजौ भुजौ ।
गुल्फास्फालविलम्बिकम्बलघनारम्भा नितम्बस्थली
धात्र्याः संभृतभोजनैरभिनवीभूतं पुराणं वपुः ॥ ७० ॥

ततस्तदपचारेण शिशौ जातज्वरे व्यधात् ।
वैद्यदत्तोपवासा सा मत्स्यसूपपरिक्षयम् ॥ ७१ ॥

पानीयं विनिवारणीयमहितं भक्तस्य वार्तैव का
द्वित्राण्येव दिनानि धा[3]त्रिदयया धात्रीरसः पीयताम् ।
जीवत्वेष शिशुर्भजस्व विविधैरस्योत्सवैः संपदं
वैद्येनेति निवेद्यमानमकरोत्सा सर्वमेवाश्रुतम् ॥ ७२ ॥

दृष्ट्वा तत्रातुरं बालं तृणवत्सुतरागिणी ।
सा ययौ निर्दया रात्रौ गृहीत्वा हेमसूतिकाम् ॥ ७३ ॥

१. 'स्थालस्थूल' इति पाठः. २. 'प्राग्भाव' इति पाठः. ३ 'धातृदयया' इति पाठः.

ततः प्रत्यन्तविषये प्रभूतच्छागगोचरा ।
ख्याता धनवती नाम स्फीतां चक्रे गृहस्थितिम् ॥ ७४ ॥
साथ मेघापघातेन तस्मिन्पशुधने वने ।
स्वकाय इव सापाये याते चर्मावशेषताम् ॥ ७५ ॥
गृहीत्वा पशुपालस्य स्थूलं निक्षेपकम्बलम् ।
गत्वावन्तिपुरं चक्रे ताराख्यापूपविक्रयम् ॥ ७६ ॥
क्रीत्वा गणेशनैवेद्यमण्डकानां करण्डकम् ।
पुनः पाकोष्मणा नित्यमकरोद्विक्रयं पथि ॥ ७७ ॥
[१]साभुङ्क्त गृहनारीणां [२]प्रभूतोज्जामतण्डुलम् ।
प्रभूतलाभलुब्धानां मूलस्यापि परिक्षयः ॥ ७८ ॥
पान्थकन्यां घृताभ्यक्तां कृत्वा [३]कुशलिकाभिधा ।
मिथ्यासन्नविवाहार्थमयाचत गृहे गृहे ॥ ७९ ॥
ततः सा [४]पञ्जिका नाम द्यूतशालापुरःस्थिता ।
कपटाक्षशलाकानामकरोद्गूढविक्रयम् ॥ ८० ॥
सा पौष्पिकी मुकुलिका कृत्वा निर्माल्यविक्रयम् ।
देवप्रासादपालानां मूल्यं भुक्त्वा ययौ निशि ॥ ८१ ॥
ग्रामयात्रासु सा [५]वारिसत्रदात्री हिमाभिधा ।
रङ्गप्रेक्षणबालानां निनाय वलयादिकम् ॥ ८२ ॥
सा नक्षत्रपरावृत्तिं कृत्वा षट्काष्टकेष्वपि ।
विवाहेष्वकरोद्यत्नं वर्णाख्या कूटवर्णनैः ॥ ८३ ॥
गणविज्ञानिका मुग्धप्रत्ययैः ख्यातिमाययौ ।
नामाभिज्ञानमात्रज्ञा न तु चौरान्विवेद सा ॥ ८४ ॥
भावसिद्ध्यभिधाना सा देवतावेशधारिणी ।
उपहारान्प्रयच्छेति वदन्ती नावदत्परम् ॥ ८५ ॥

---

१. 'सा भुक्त्वा' इति पाठः. २. 'प्रभूतो ज्ञानमण्डलम्' इति पाठः. ३. 'कलशिकाभिधा' इति पाठः. ४. 'पेचिका' इति पाठः. ५. 'वारिसत्त्वधात्री' इति पाठः.

तत उन्मत्तिका भूत्वा सा नग्नालिङ्गिता श्वभिः[1]।
कुम्भादेवीति विख्याता प्राप पूजापरम्पराम् ॥ ८६ ॥
क्षिप्रोपदेशलुब्धेन कुलदासेन मन्त्रिणा।
सार्चिता प्रययौ हृत्वा पूजाराजतभाजनम् ॥ ८७ ॥
साथ तक्षकयात्रायां चलद्दण्ठा दिनत्रयम्।
कल्पपाली कलानाम विदधे मद्यविक्रयम् ॥ ८८ ॥
कटिघण्टाभिधानस्य सा क्षीबस्य तपस्विनः।
रात्रौ तत्र प्रसुप्तस्य घण्टाः सप्त समाददे ॥ ८९ ॥
ततः सा भूरिधत्तूरमधुना नष्टचेतसाम्।
पान्थानां सर्वमादाय निशि शूरपुरं ययौ ॥ ९० ॥
एवं कृत्वा लवणसरणौ भारिकं भर्तृसंज्ञं
तस्मिन्निद्रावशमुपगते रात्रिमन्यैः क्षिपन्ती।
प्रातर्बद्ध्वा पृथुकटितटं संकटे दीर्घदाम्ना
मूर्ध्ना भारं दिवसमखिलं सा विलासैरुवाह ॥ ९१ ॥
निःशुष्कैरतटैर्महाहिमपथैरुल्लङ्घ्य घोरान्गिरी-
न्बम्बानाम दिनावसानसमये मौन्याङ्गनारूपिणी[2]।
हेमन्ते वसनावगुण्ठितमुखी पञ्चालधारामठे
शीतार्ता घनलम्बकम्बलवती चक्रे स्पृहां कातरा[3] ॥ ९२ ॥
साथ सत्यवती नाम वृद्धा ब्राह्मण्यवादिनी।
बभ्राम सागरद्वीपरशनाभरणां भुवम् ॥ ९३ ॥
क्वचिद्योगकथाभिज्ञा क्वचिन्मासोपवासिनी।
क्वचित्तीर्थार्थिनी मिथ्या सा परं पूज्यतां ययौ ॥ ९४ ॥
वेधर्धूनन[4]धूपेन मूर्खश्रद्धाविधायिनी।
महतीं प्रतिपत्तिं सा लेभे भूपतिवेश्मसु ॥ ९५ ॥

---

१. 'शुभिः' इति पाठः. २. 'सत्याङ्गना' इति पाठः. ३. 'स्पृहाकारता' इति पाठः.
४. 'धूपन' इति पाठः.

सेनास्तम्भं करिष्यामि राज्ञां कृत्वेति वर्णनम्।
भुक्त्वा हेम ययौ रात्रौ प्रत्यासन्ने रणोद्यमे ॥ ९६ ॥
केदाराम्बुगयाश्राद्धगङ्गास्नानादिवादिनी।
तत्फलं बन्धमाधाय[1] सार्थेभ्यः साग्रहीद्धनम् ॥ ९७ ॥
नष्टच्छायोपदेशार्थं सार्थिता पथि दस्युभिः।
रूढा शिबिकया वर्षं प्रपलाय्य ययौ ततः ॥ ९८ ॥
चीनानकानाम[2]ण्डानि साथ रुद्राक्षसंज्ञया।
ददौ मूल्येन शिष्याणां रुद्राक्षाधिक्यवादिनी ॥ ९९ ॥
बिलसिद्धिधृतश्रद्धागृहीताभरणाम्बरान्।
सा चिक्षेपान्धकूपेषु पाताललल‍नोत्सुकान् ॥ १०० ॥
अङ्गविद्धविषास्मीति सुस्निग्धविषगण्डकैः।
सा बबन्ध गले मालां विषजाङ्गुलिकाभिधा ॥ १०१ ॥
शुल्कस्थानेषु सर्वेषु शौल्किकेभ्यः स्वभावतः।
[3]मुहूर्तमोहनं पुष्पं सा दत्त्वा स्वेच्छया ययौ ॥ १०२ ॥

वर्षाणां मे सहस्रं गतमधिकतरं वेद्म्यहं धातुवादं
सिद्धो मे वाक्प्रपञ्चः करतलकलितं त्रैपुरं कामतत्त्वम्।
उर्वर्यां [4]गर्वखर्वीकृतसकलगुरुग्रामभक्त्या तयास्या-
मित्याख्यानेन नीताश्चरणतललिहष्ठक्कुराः कुक्कुरत्वम् ॥ १०३ ॥

पूजासज्जा भजन्ते जयनुतिषु नतिं दिक्षु [5]काम्बोजभोजाः
सेवाशुष्कास्तुरुष्काः परिचरणरसे किं च [6]चीनाः प्रलीनाः।
उत्कण्ठार्तास्त्रिगर्ताः परिचरणविधौ पीडयन्त्येव गौडा
दम्भारम्भेण तस्या विदधति कुसुमोत्सङ्गतामङ्गवङ्गाः ॥ १०४ ॥

भ्रान्त्वा महीं जलनिधिप्रथितामशेषां
मायाविनीतिविदिताविरतोन्नतिः सा।

---

१. 'आदाय' इति पाठः. २ 'दीनानकानां' इति पाठः. ३. 'मूहूर्ते योहरं' इति पाठः. ४. 'शर्वखर्वी–' इति पाठः. ५. 'भिक्षुकाम्भोजभोगाः' इति पाठः. ६. 'मीनाः' इति पाठः.

प्राप्ता पुनर्निजपदं तनुवीरशेषा
क्षीणोऽपि देहमिव कस्त्यजति स्वदेशम् ॥ १०५ ॥
सा सर्वदेशपरिशीलितवेषभाषा
प्रभ्रष्टभूपतिसुताहमिति ब्रुवाणा ।
छिन्नाङ्गुलिर्दशनखण्डितनासिकाग्रा
लालाटनीलतिलकैर्विदिता ममैव ॥ १०६ ॥
सा चेत्प्रकीर्णधनगेहनिधानसर्पी
गृह्णाति लोभजननी जननीपदं ते ।
तत्कामिलोकसकलार्थसमृद्धिमेतां
यत्नाद्विना सुतनु हस्तगतामवेहि ॥ १०७ ॥
तस्मात्तामहमेव कूटकुटिलां गत्वा स्वयं त्वत्कृते
सर्वज्ञां सकलार्थसार्थसरणेः सिद्ध्यै समभ्यर्थये ।
किं किं वा कथयामि सैव जगतीं जानाति जेतुं धिया
नास्त्यन्या गतिरित्युदीर्य हितकृत्तूर्णं ययौ नापितः ॥१०८॥

इति श्रीव्यासदासापराख्यक्षेमेन्द्रनिर्मितायां समयमातृकायां चरितोपन्यासो नाम द्वितीयः समयः ।

---

तृतीयः समयः ।

अथ सर्वार्थजननीं जननीं[1] वेशयोषिताम् ।
मित्रे स्वभावमलिनामानेतुं गन्तुमुद्यते ॥ १ ॥
संकोचक्लेशसंजातां शूरतामिव रागिणाम् ।
आसन्नश्रीवियोगानां स्वापग्लानिरजायत ॥ २ ॥
शनैर्दिनधने क्षीणे स्वल्पशेषाम्बरः परम् ।
अलम्बत क्षणं रागी संध्याधाम्नि दिनेश्वरः ॥ ३ ॥
संध्यया क्षिप्ररागिण्या निरस्तः परितापवान् ।
नीरागः[2] सागरजले चिक्षेप तपनस्तनुम् ॥ ४ ॥

---

१. 'रजनीं' इति पाठः. २. 'निरागः' इति पाठः.

ततस्तिमिरसंभारैर्वाररामाप्रसाधने ।
कृष्णागुरुभरोद्भूतधूपधूमोद्गमायितम् ॥ ५ ॥
यामिनीकामिनीकीर्णकेशपाशोपमं तमः ।
दीपचम्पकमालाभिर्विश्रान्तिनियमं ययौ ॥ ६ ॥
अथ स्ववेंशवनितासापत्न्यकलहच्युतम् ।
अदृश्यत शशाङ्कार्धं दन्तपत्रमिवाम्बरे ॥ ७ ॥
रजनीरमणीकान्ते दिनान्ते तुहिनत्विषि ।
उदिते मुदिते लोके बभूव मदनोत्सवः ॥ ८ ॥

भुक्त्वा सहस्रकरसंपदमम्बरश्रीः
*कृत्वा जनस्मरणमात्रदशावशेषाम् ।*
वेश्येव काममनपेक्षितपक्षपाता
क्षिप्रं शशाङ्कविभवाभरणा बभूव ॥ ९ ॥

ततः कर्तुं प्रवृत्तेषु वेश्यावेश्माग्रवर्त्मसु ।
विटेषु मधुलुब्धेषु निर्व्यापारं गतागतम् ॥ १० ॥
द्वाराग्रदत्तकर्णासु ग्रहणग्रहणेप्सया ।
कुट्टनीषु तृणापातेऽप्युन्मुखीषु मुहुर्मुहुः ॥ ११ ॥
दिनकामुकनिर्माल्यमाल्यताम्बूलिनीं भुवम् ।
संमृज्य सज्जशय्यासु वेश्यास्वन्यप्रतीक्षया ॥ १२ ॥
आस्तीर्यमाणखट्वान्तः किङ्किणीक्काणसंज्ञया ।
पारावतेषु विरुतैर्व्रजत्सु स्मरबन्दिताम् ॥ १३ ॥
गृहीतस्योपरि कथं गृह्यते ग्रहणं पुनः ।
पूर्वं किं नागतोऽसीति वदन्तीष्वपरासु च ॥ १४ ॥
उदराबद्धवसनैर्जटाग्रन्थिनिपीडनम् ।
कुर्वाणैर्वारकलहे प्रारब्धे शठदेशिकैः[1] ॥ १५ ॥
स्वयं मात्रा च युगपद्गृहीते ग्रहणद्वये ।
वारे प्राप्ते तृतीये च यान्तीष्वन्यास्वदर्शनम् ॥ १६ ॥

---

१. 'मठदेशिकैः' इति पाठः.

अनायाते परिचिते प्रत्याख्याते नवागते ।
उभयभ्रंशशोकेन सीदन्तीष्वपरासु च ॥ १७ ॥
भुक्तोज्झितानामन्यासु पुनः प्राप्तार्थसंपदाम् ।
जननीं दुर्जनीकृत्य कुर्वाणासु प्रसादनम् ॥ १८ ॥
यदि त्वां सा सुजननी न जानीयात्सुधामयम् ।
अभविष्यदुपायो मे तत्कोऽसौ प्राणधारणे ॥ १९ ॥
नित्यावहारकुपितं सर्वार्थैरुपकारिणम् ।
[1]ऋजुमावर्जयन्तीषु विदग्धा[2]सुतवैरिषु(?) ॥ २० ॥
अन्यनाम्ना प्रविष्टानां कलहे कूटकामिनाम् ।
कुट्टनीषु रटन्तीषु घण्टारणरणोत्कटम् ॥ २१ ॥
प्रसुप्तकटकक्षीबक्षीणक्षुद्रा[3]भृते गृहे ।
सखीभवनमन्यासु यान्तीष्वादाय कामुकम् ॥ २२ ॥
बालमार्जारिकाह्वानव्याजेनान्यासु वर्त्मनि ।
कटाक्षैः कलयन्तीषु दूरात्कामुकमामिषम् ॥ २३ ॥
एकः स्थितोऽन्तः प्राप्तोऽन्यः परस्याद्यैव दुर्ग्रहः ।
किं करोमीति जननीं पृच्छन्तीष्वपरासु च ॥ २४ ॥
निशा दीर्घा नवः कामी तनयेयं कनीयसी ।
[4]व्यत्येति कालहाराय वृद्धावर्गे कथोद्यते ॥ २५ ॥
नाज्ञाताद्गृह्यते भाटी चरन्ति म्लेच्छगायनाः ।
इत्यन्यासु वदन्तीषु शून्यशय्यासु लज्जया ॥ २६ ॥
आयाते वार्यमाणेऽपि निर्माने क्षीणकामुके ।
व्याजकुक्षिशिरःशूलाक्रन्दिनीषु परासु च ॥ २७ ॥
मुग्धकामुकमित्राणां स्वेच्छया व्ययकारिणाम् ।
प्रस्तुते स्थिरलाभाय कुट्टनीभिर्गुणस्तवे ॥ २८ ॥

---

१. 'दण्डं' इति पाठः. २. 'स्वास्तवैरिषु' इति पाठः. ३. 'हृते', 'भृते' इति पाठौ.
४. 'व्यप्रेति' इति पाठः.

लज्जामहे वयं स्वल्पधनेनेति विभाविनि ।
गण्यमाने दशगुणे धूर्तैः प्रथमकामिनाम् ॥ २९ ॥
प्रवाससक्तेरधिकारिसूनोः स्थितावरुद्धा तनया ममेति ।
काचिद्वदन्ती विजने विगूह्य जग्राह भाटीं त्रिगुणां समृद्धात् ॥ ३० ॥
अल्पं ममैतद्दुहितुर्न योग्यं न च क्षणोऽस्ति त्वमदृष्टपूर्वः ।
इति ब्रुवाणापि विटं पटान्ते गाढं गृहीत्वा न मुमोच काचित् ॥ ३१ ॥
अमात्यपुत्रेण सुताद्य नीता क्षमस्व रात्रिं प्रणयान्ममैकाम् ।
उक्त्वेति काचिज्जरती चकार रिक्तस्य सक्तस्य च विप्रलम्भम् ॥ ३२ ॥
दातव्यं न ददाति वारविरहे टक्कोऽद्य लब्धस्थलः
क्रूरः सैन्यपतिः प्रयाति रिपुतां सद्यैव वारं विना ।
वृत्तिर्देवगृहात्कथं नु दिविरे वारोज्झिते लभ्यते
वाटीपेटकवारतां गतवती प्रोवाच काचित्सखीम् ॥ ३३ ॥
अन्यास्ताः सखि कूटपाशनिचयैराकृष्टमुग्धश्रियः
कुर्मः किं वयमेव वञ्चनकलां जात्या न जानीमहे ।
सद्भावे सततं स्वभावविमुखः सर्वाभिशङ्की जनो
वाक्यैः काचिदिति प्रकाशमकरोत्सक्तार्जवावर्जनम् ॥ ३४ ॥
........सकलैव सा रसवती नीता क्षणेन क्षपा
पापेन क्षपितं दिनं निशि तया शय्यावहारः कृतः ।
इत्युद्वेगपरिग्रहग्लपितधीः पृष्टः सहासैर्विटै-
र्व्याचष्टे कटुकुट्टनीकुटिलतामाक्लिष्टकूटां विटः ॥ ३५ ॥
नास्मद्गेहप्रवेशः सगुणजनकथाकेलिमात्रोपचारै-
र्व्यापारारम्भसारप्रवसदवसरे वासरे कामुकानाम् ।
वृत्तिर्वृत्तानुरोधात्कथमपि विदिताद्गृह्यते यामवत्या
इत्युच्चैः काचिदूचे बहुगतगणिकावर्गगर्वोपशान्त्यै ॥ ३६ ॥
कुरु तरलिके हारं कण्ठे गृहाण मनोहरे
वलययुगलं लीले लोलां विलोकय मेखलाम् ।

१. 'विभाविने' इति पाठः. २. 'उपचारे' इति पाठः. ३. 'पर्वोपशान्त्यै' इति पाठः.

भज मलयजं चित्रे रात्रिः प्रयाति कठोरता-
मिति चतुरताचार्यस्तासां बभूव सखीजनः ॥ ३७ ॥

इति श्रीव्यासदासापराख्यक्षेमेन्द्रनिर्मितायां समयमातृकायां प्रदोषवेश्यालापवर्णनं तृतीयः समयः ।

---

चतुर्थः समयः ।

अस्मिन्नवसरे धूर्तवार्तालीना सुकुट्टनी ।
नापिताख्येन तमसा रजनीव सहाययौ ॥ १ ॥
अस्थियन्त्रशिरातन्त्री लीनान्त्रोदरकृत्तिका ।
शुष्ककायकरङ्काङ्कावृतेव कटपूतना ॥ २ ॥
वहन्ती सुबहुच्छिद्रं शरीरं चर्मबन्धनम् ।
अन्तर्गतजगद्व्याजशिक्षाशकुनिपञ्जरम् ॥ ३ ॥
सर्वस्वग्रहणेनापि लम्बमानमुखी सदा ।
तुलेवाङ्कसहस्राङ्का त्रैलोक्यतुलने कलेः ॥ ४ ॥
समा समधने पापे सपापाधमगाधमे ।
धात्रा कृत्रिमरागस्य स्वरमालेव निर्मिता ॥ ५ ॥
सुस्पष्टदृष्टदीर्घोग्रदशना भीषणाकृतिः ।
प्रसवक्रूरकोपेन संस्थितास्थिरता शुनी ॥ ६ ॥
उलूकवदना काकग्रीवा मार्जारलोचना ।
निर्मिता प्राणिनामङ्गैरिव नित्यविरोधिनाम् ॥ ७ ॥
वेश्यावनैकपालिन्या यया रागमहाव्रते ।
कृता कामुकलोकस्य खट्वाङ्गशरणा तनुः ॥ ८ ॥
सक्ताश्रुपातजननीं तां विलोक्य कलावती ।
अभिचारहुतस्याग्नेः कालीं धूमशिखामिव ॥ ९ ॥
ससंभ्रमोत्थिता तस्याः कृत्वा चरणवन्दनम् ।
दत्त्वा निजासनं चक्रे स्तुतिं पूजापुरःसराम् ॥ १० ॥

---

१. 'शाखाशकुनि' इति पाठः. २. 'चापि' इति पाठः. ३. 'समदने' इति पाठः.

वेश्योपदेशविषये चतुराननत्वा-
न्मायाप्रपञ्चनिचयेन जनार्दनत्वात् ।
रिक्तप्रसक्तकलहैरतिभैरवत्वा-
त्सर्गस्थितिक्षयविधातृगुणा त्वमेव ॥ ११ ॥
उद्भिन्नयौवनमनोहररूपशोभा-
संभाविताभिनवभोगमनोभवानाम् ।
एणीदृशां त्वदुपदेशविवर्जितानां
मातर्भवन्ति नहि नाम समीहितार्थाः ॥ १२ ॥
तस्माद्भजस्व परिकल्पितपुत्रिकां मां
भक्तामनन्यशरणां शरणां प्रपन्नाम् ।
आत्मार्पणप्रणयिनां नवदर्शनेऽपि
जात्यैव पेशलधियः सदया भवन्ति ॥ १३ ॥

इत्यर्थिता कलावत्याः प्रत्यासन्नसुखस्थितिः ।
मनुष्यामिषकङ्काली[1] कङ्काली तामभाषत ॥ १४ ॥
संक्रान्तहृदयस्नेहा निःशूलप्रसवोद्भवा[2] ।
गर्भभारं विना पुत्रि त्वं सुताभिमता मम ॥ १५ ॥
कङ्केन जन्मसुहृदा त्वदर्थमहमर्थिता ।
स्यूतेयं मे विटच्छिन्ना नासा येन पुनः पुनः ॥ १६ ॥
पात्रं मदुपदेशस्य त्वमेव त्रिदशोचिता ।
सद्भित्तिलिखितं चित्रं चित्रतामेति नेत्रयोः ॥ १७ ॥
श्रूयतां प्रथमं पुत्रि भूत्यै यत्कथयाम्यहम् ।
कलाकोषं तु कालेन नित्याभ्यासादवाप्स्यसि ॥ १८ ॥
न कुलेन न शीलेन न रूपेण न विद्यया ।
जीविताभ्यधिकं बुद्धिलभ्यं धनमवाप्यते ॥ १९ ॥
प्रायेण जगति प्रज्ञा नाना·······स्ति कस्यचित् ।
इयतीं जगतीं वेद्मि पूर्णामूर्णायुभिर्जडैः[3] ॥ २० ॥

---

१. 'संतुष्टा' इति पाठः. २. 'उत्सवा' इति पाठः. ३. 'जनैः' इति पाठः.

अज्ञातकालोचितकर्मयोगा रोगा इवाहर्निशपच्यमानाः ।
जगत्त्रये देवमनुष्यनागाः प्रज्ञादरिद्राः खलु सर्व एव ॥ २१ ॥
ज्येष्ठेन तावत्परमेष्ठिनैव विचारशून्येन कृतं किमेतत् ।
यत्कामिनीपीनपयोधराणां विद्युद्विलोला किल यौवनश्रीः ॥२२॥

का नाम बुद्धिहीनस्य विधेरस्ति विदग्धता ।
कूष्माण्डानां न यश्चक्रे तैलमूर्णां च दन्तिनाम् ॥ २३ ॥

रत्नार्थिना जलनिधौ मधुसूदनेन
क्लेशः किलाद्रिवलनप्रभवोऽनुभूतः ।
किं सैव पूर्वमखिलार्थविलुण्ठनाय
कान्ताकृतिः कपटकाममयी न सृष्टा ॥ २४ ॥

निद्रा महीभारपरिग्रहश्च श्रीसंश्रयत्वं परयाचनं च ।
अत्युन्नतत्वं गुणहीनता च किं युक्तमेतत्पुरुषोत्तमस्य ॥ २५ ॥

कृशः शशी गणा नग्ना भार्या वस्त्रार्धहारिणी ।
शंभोर्धनपतिप्रीतिर्न विद्मः क्वोपयुज्यते ॥ २६ ॥

भस्माङ्गः प्रकटं बिभर्ति ललनां योऽङ्के स किं युक्तकृ-
न्निःसङ्गः सततं गणेषु रमते यः किं स सत्यव्रतः ।
यः सक्तः परमेश्वरोऽपि वृषभृद्वर्गे स किं नीतिमा-
न्गोप्यां यः कुटिलां कलां स्फुटतया धत्ते स किं धीधनः ॥ २७ ॥

किं कामिनीप्रणयिना दिननायकेन
संशातितं भ्रमकृता कृतिना स्वतेजः ।
अर्थेन किं न विहिताभिमुखा मृगाक्षी
वित्तेन तीक्ष्णतरमप्यबला सहेत ॥ २८ ॥

चन्द्रस्येश्वरसेवया कृशतनोः क्षैण्यं न निर्मूलितं
मानी मूर्ध्नि जडः स्थितः कथमिव प्राप्नोति संपूर्णताम् ।
वृद्ध्यर्थी यदि किं करोति चरणोपान्ते न तस्यास्पदं
हन्त्येव स्वसमीहितं गुणमदादुच्चैः स्थितिः सेवकः ॥ २९ ॥

यातः प्रतारयितुमीश्वरमङ्गनायां
मारः पुरा किमिति कार्मुकबाणपाणिः ।
नाग्रे ततान वनितागुणवर्णनानां
यत्सौ····तेन नियतं विननाश मूर्खः ॥ ३० ॥

रक्तोऽप्यशोकविटपी परपुष्टबन्धोः
प्राप्नोति यस्य विभवे चरणप्रहारम् ।
तस्मै समृद्धिसचिवैर्मधुपैर्निपत्य
धूर्तैर्निपीतमधवे मधवे नमोऽस्तु ॥ ३१ ॥

स्वाम्यं सर्वजगत्सु दिव्यमुनयस्तत्रोचिता मन्त्रिणो
राष्ट्रं स्वर्गमही महामणिगुरुः कोषः सुधाम्भोनिधिः ।
दुर्गं मेरुशिरः स्वसैन्यममराः श्रीमान्मुरारिः सुहृ-
त्सा बुद्धिर्विबुधाधिपस्य तु यया व्याप्तं भगाङ्कैर्वपुः ॥ ३२ ॥

लुब्धस्याफलकालकूटकटुकक्रोधस्य निस्तेजसः
सर्वाक्रान्तिनिपीडितस्य जलधेर्दातुं प्रवृत्तस्य ते ।
संख्यातीतसमस्तरत्नवसतेर्मूर्खाः किमेतावता
मोहादेकगजाश्वपादपसुरामात्रेण तुष्टाः सुराः ॥ ३३ ॥

रामेण हेमहरिणाहरणोत्सुकेन
कूटाक्षकेलिसरणेन युधिष्ठिरेण ।
ईर्ष्यारुषा द्विजरुषा जनमेजयेन
दत्तः परं मनुजवर्त्मनि मौग्ध्यसेतुः ॥ ३४ ॥

नागैस्तार्क्ष्यसमर्पितं तदमृतं यत्नश्रमैर्दुर्लभं
नो पीतं न विलोकितं न पिहितं मोहात्परं हारितम् ।
तस्मान्नास्ति जगत्त्रयेऽपि विमलः प्रज्ञाकणः कस्यचि-
त्सर्वः प्राक्तनजन्मकर्म····वशादर्थोद्यमे धावति ॥ ३५ ॥

एवं जडेषु लोकेषु स्त्रीषु मुग्धासु का कथा ।
बुद्धिहीनप्रसादेन जीवामः केवलं वयम् ॥ ३६ ॥

मुग्धः प्रत्ययमायाति प्रत्यक्षेऽप्यन्यथा कृते ।
मायाप्रपञ्चसारश्च वेश्यानां विभवोद्भवः ॥ ३७ ॥
पुरा [1]मठरकाख्यस्य मया पाणौ द्विजन्मनः ।
ताम्बूलकल्ककलितं ष्ठीवितं हास्यलीलया ॥ ३८ ॥
मुग्धस्[2]ततोऽवमानेन सोऽभिजातोऽभिमानवान् ।
जनसंसदि जज्वाल क्रोधादात्मवधोद्यतः ॥ ३९ ॥
साधो धातुप्रकोपेन मिथ्या पश्यसि विभ्रमम् ।
न मया ष्ठीवितं किंचिद्धिक्तौ पाणिः प्रमृज्यताम् ॥ ४० ॥
जात्या चर्ममयं चक्षुस्तस्मिन्कः प्रत्ययस्तव ।
मम सद्भावशीलायाः प्रमाणं वचनं न किम् ॥ ४१ ॥
इत्युक्त्वा तीव्रशपथैर्गलहस्तादिवादनैः ।
स मया प्रकृतिं नीतस्तथेति प्रत्ययं ययौ ॥ ४२ ॥
पदे पदे जगत्यस्मिन्निधिर्दैवेन निर्मितः ।
विटचारणवेश्यानां बुद्धिहीनावलम्बनम् ॥ ४३ ॥
नवयौवनकाले मे गृहं विप्रसुतः पुरा ।
विवेश रात्रिभोगाय नाम्ना शंकरवाहनः ॥ ४४ ॥
शाण्ड्यादिवातिकठिनं पीनं प्रथमयौवनम् ।
तं ब्रह्मचारिणं दृष्ट्वा सोद्वेगाहमचिन्तयम् ॥ ४५ ॥
कठिनोऽयं निशा दीर्घा क्षपिता कामुकैरहम् ।
तस्माद्रोगावहारोऽस्य मया कार्यः प्रयत्नतः ॥ ४६ ॥
इति संचिन्त्य सुचिरं मया तैस्तैः कथाक्रमैः ।
आसन्नशय्यावसरे यामः पूर्वोऽतिवाहितः ॥ ४७ ॥
आस्तां किमन्यद्वक्तव्यं श्रुतमेतादितस्ततः ।
पतिता नेत्रयोर्निद्रेत्युवाच स पुनः पुनः ॥ ४८ ॥
कथाबन्धेऽथ विरते तत्संगमनिवृत्तये ।
शूलापदेशेन मया कृतः कृतकनिःस्वनः ॥ ४९ ॥

---

१. 'मधुरकाख्यस्य' इति पाठः. २. 'तेन' इति पाठः.

सोऽथ मुग्धः प्रकृत्यैव सत्यप्रत्ययमोहितः ।
चक्रे[1] शूलोपशान्त्यै मे चक्रे सर्वाङ्गमर्दनम् ॥ ९० ॥
सादरं मृद्यमानेषु तेनाङ्गेषु शनैः शनैः ।
प्रययौ सोपरोधेव क्षणदा क्षणवन्मम ॥ ९१ ॥
ततः प्रभाते तद्भोगवञ्चने चिन्तितं मया ।
पशुबुद्धिर्वराकोऽयं मया शूलेन वाहितः ॥ ९२ ॥
अनेन मेषमुग्धेन दत्ता भाटी चतुर्गुणा ।
भोगावहारन्यायेन ध्रुवं तामनुयाचते ॥ ९३ ॥
तस्मादेषे[2] रतिस्पृष्टीकार्यस्तावद्यथा तथा ।
न्यायाय सुरतोच्छिष्टः कथं समुपसर्पति ॥ ९४ ॥
इति ध्यात्वाहमारब्धरतिभोगा क्षपाक्षये ।
प्रीत्येवाकरवं तस्य पण्यानृण्याय चुम्बनम् ॥ ९५ ॥
आरूढरतियन्त्रो मे शूलक्लेशकृपाकुलः ।
अलं मत्संगमेनेति सानुरोधोऽवदत्स माम् ॥ ९६ ॥
आवर्जनाय तस्याथ निर्व्याजार्जवचेतसः ।
मया मिथ्या प्रियालापैर्विहितो रञ्जनक्रमः ॥ ९७ ॥
अहो बतामृतस्पर्शस्तवाङ्गेषु विभाव्यते ।
अधुनैव मया दृष्टं यस्य प्रत्यक्षलक्षणम् ॥ ९८ ॥
गूढाङ्गेन त्वया स्पृष्टे ममास्मिन्रमणस्थले ।
न जाने क्व गतं शूलं मत्पुण्यैस्त्वमिहागतः ॥ ९९ ॥
इति श्रुत्वैव मद्वाक्यं सहसा साश्रुलोचनः ।
रत्यर्धविरतः शोकात्सोऽन्तः सानुशयः परम् ॥ ६० ॥
निजं वक्षो ललाटं च ताडयित्वा स पाणिना ।
हा कष्टं हा हतोऽस्मीति वदन्मामिदमब्रवीत् ॥ ६१ ॥
पूर्वं नैतन्मया ज्ञातं यन्मदङ्गसमागमः ।
शूलं हरति नारीणां मणिमन्त्रौषधादिवत् ॥ ६२ ॥

1. 'जज्ञे' इति पाठः. २. 'ईषद्रतिस्पष्टीकार्यः' इति पाठः.

मन्दपुण्यस्य जननी वात्सल्यजननी मम ।
सुचिरस्थायिना भद्रे शूलेन निधनं गता ॥ ६३ ॥
विदितोऽयं प्रकारश्चेदभविष्यदसंशयः ।
तज्जनन्या वियोगो मे नाभविष्यद्विचेतसः ॥ ६४ ॥
इत्युक्त्वा वञ्चितोऽस्मीति स रुदित्वा विनिर्ययौ ।
पुरुषाकारसंदिग्धनिर्विषाणवृषोपमः ॥ ६५ ॥

नित्यं भोजनमैथुनप्रणयिनस्त्यक्तान्यकार्याः परं
लोकेऽस्मिन्गलगर्तमात्रसुखिनः सन्त्येव शून्याशयाः ।
ये मेषप्रतिमाः क्षयोद्यतमतेः सर्वस्वहर्तुः क्षणा-
दाप्तस्येव विनिक्षिपन्ति नितरां निःशङ्कमङ्के शिरः ॥ ६६ ॥

इत्यबुद्धिधनाधाननिधानैर्विविधोदयैः ।
कूटपण्यैरसामान्यैस्तारुण्यमतिवाह्यते ॥ ६७ ॥
असत्येनैव जीवन्ति वेश्याः सत्यविवर्जिताः ।
एताः सत्येन नश्यन्ति मद्येनेव कुलाङ्गनाः ॥ ६८ ॥

सत्यं विनाशाय पराङ्गनानामसत्यसारा गणिकागणश्रीः ।
सत्येन वेश्या किल दृष्टसारा दरिद्रशाला इव कस्य सेव्याः ॥ ६९

दानेन नश्यति वणिङ्नश्यति सत्येन सर्वथा वेश्या ।
नश्यति विनयेन गुरुर्नश्यति कृपया च कायस्थः ॥ ७० ॥

वेश्याजनस्य कितवस्येव वञ्चनमायया ।
अहो वैदग्ध्यमित्युक्त्वा परोऽपि परितुष्यति ॥ ७१ ॥
पुराहं पृथिवीमेतां भ्रान्त्वा जलधिमेखलाम् ।
प्राप्ता वेश्यास्पदं लोभात्पुरं पाटलिपुत्रकम् ॥ ७२ ॥
कुट्टन्यस्तत्र सर्वज्ञा दृष्ट्वा मामल्पकौशलाम् ।
जहसुः सस्वनं येन व्रीताहं क्ष्मामिवाविशम् ॥ ७३ ॥
ततस्तेनावमानेन गणेशायतनाग्रतः ।
स्थिता कृतोपवासाहमहंकारविवर्जिता ॥ ७४ ॥

अथ स्वप्ने गणिनाहं पृष्टा शंकरसूनुना ।
उपवासाः कियन्तस्ते प्राप्ता इति पुनः पुनः ॥ ७५ ॥
स मयाभिहितः कूटकृतप्राणान्तचेष्टया ।
मासद्वयमतिक्रान्तं व्रतादनशनस्य मे ॥ ७६ ॥
तच्छ्रुत्वा स स्मितमुखः सर्वज्ञः प्राह मां गणः ।
अहो व्रतेऽपि स्वप्नेऽपि नासत्यादस्ति ते च्युतिः ॥ ७७ ॥
परितुष्टोऽस्मि ते भद्रे निश्चलासत्यनिश्चयात् ।
महामायामयकला लब्धभोगा भविष्यसि ॥ ७८ ॥
गणेशानुचरः पूर्वमिति मह्यं वरं ददौ ।
असत्येनैव वेश्यानां भवन्ति धनसंपदः ॥ ७९ ॥

धनप्रधानं जनजीवभूतं लोकेषु तत्रापि विशेषयोगात् ।
जनाभिसारप्रतिपत्तिभाजां महीभुजां वेशमृगीदृशां च ॥ ८० ॥

धनेन लभ्यते प्रज्ञा प्रज्ञया लभ्यते धनम् ।
प्रज्ञार्थौ जीवलोकेऽस्मिन्परस्परनिबन्धनौ ॥ ८१ ॥
ईश्वरः स जगत्पूज्यः स वाग्मी चतुराननः ।
यस्यास्ति द्रविणं लोके स एव पुरुषोत्तमः ॥ ८२ ॥
स एवाहृदयो राहुरलसः स शनैश्चरः ।
वक्रः कुजन्मा सततं वित्तं यस्य न विद्यते ॥ ८३ ॥
सुजातस्य प्रयातस्य माङ्गल्यस्पृहणीयताम् ।
धनिकस्य विकारोऽपि क्षीबस्येव जनप्रियः ॥ ८४ ॥
धनिनश्चन्दनस्येव सच्छायस्य मनोमुषः ।
निष्फलस्यापि लोकोऽयं संपर्कं बहुमन्यते ॥ ८५ ॥
निस्त्रिंशा अपि सस्नेहा भवन्ति श्रीमतः परम् ।
स्वकेशा अपि निःस्वानां निःस्नेहा यान्ति रूक्षताम् ॥ ८६ ॥
सेव्यः कविबुधादीनां गुरुः शूरकलावताम् ।
गतिप्रदोऽर्थवानेव व्योममार्ग इवोन्नतः ॥ ८७ ॥

विक्रीय स्वगुणं निःस्वः स्वयं मांसमिव द्विजः ।
सद्यः पतति निःसत्त्वः पतितः केन पूज्यते ॥ ८८ ॥
गुणिनां चित्तवैकल्याद्गुणा निर्गुणवाञ्छया ।
हृदयेष्वेव सीदन्ति विधवानामिव स्तनाः ॥ ८९ ॥

विद्वद्भिः परिवारिताः सगुणतामायान्ति वित्तैर्नराः
शूरत्वं सुभटैः कुलोन्नततरैः प्रख्यातसद्वंशताम् ।
तस्माद्वित्तसमाश्रये गुणगणे वित्ते च नान्याश्रये
वित्तं वित्तमनन्यचित्तनियताः संपन्निमित्तं नुमः ॥ ९० ॥

अम्लानमाल्याभरणाम्बरस्य वराङ्गनानन्दनमन्दिरस्य ।
नित्यप्रकाशोत्सवसेवितस्य स्वर्गस्य वित्तस्य च को विशेषः ॥ ९१ ॥
अशेषदोषापगमप्रकाशमित्रागमोत्साहमहोत्सवार्हम् ।
विकासशोभां जनयत्यजस्रं धनं जनानां दिनमम्बुजानाम् ॥ ९२ ॥

वित्तेनाभिजनी गुणी परिजनी मानी प्रमाणीकृतः
सद्भिर्जन्तुरुपैति साधुपदवीं किं वा बहु ब्रूमहे ।
वित्तेन व्रततीर्थसार्थसरणक्लेशाभियोगं विना
तीर्यन्ते ततपातकव्यतिकरास्ते ब्रह्महत्यादयः ॥ ९३ ॥

श्रूयतां यत्पुरा वृत्तं वाराणस्यां स्वयं मया ।
श्रुतं विश्रुतसत्त्वस्य चरितं गृहमेधिनः ॥ ९४ ॥
तत्राभवद्गृहपतिर्धरातलधनाधिपः ।
द्विजन्मा श्रीधरो नाम महाब्धिरिव रत्नवान् ॥ ९५ ॥
अर्थिकल्पतरोस्तस्य राजार्हवरभोजनैः ।
अवारितमभूद्गेहे भोज्यसत्रं सदार्थिनाम् ॥ ९६ ॥
तस्य विप्रसहस्रेषु भुञ्जानेषु सदा गृहे ।
लोके युधिष्ठिरकथा श्लथादरकथां ययौ ॥ ९७ ॥
ततः कदाचिदाचारनिधेस्तस्य समाययौ ।
नियतात्मा यतिर्गेहं ज्ञानात्मा नाम दिव्यधीः ॥ ९८ ॥

स पूज्यः पूजितस्तेन श्रद्धयोपनिमन्त्रितः।
पाकशालां ययौ द्रष्टुं भक्ष्यराशिशतान्विताम् ॥ ९९ ॥
तत्रापश्यत्स सर्वान्नव्यञ्जनादिगणोपरि।
सितयज्ञोपवीताङ्कं लम्बमानतनुं शवम् ॥ १०० ॥
स्रवद्भिस्तस्य गात्रेभ्यः सूक्ष्मशोणितबिन्दुभिः।
अन्नं सर्वजनादृष्टैः सिच्यमानं ददर्श सः ॥ १०१ ॥
दृष्ट्वा तदतिबीभत्सं घृणासंकुचिताशयः।
संस्पृष्टकर्णः स ययौ ततस्तूर्णमलक्षितः ॥ १०२ ॥
अथ संवत्सरे याते पुनरभ्येत्य कौतुकात्।
सोऽपश्यन्मांसहीनं तत्स्नायुबद्धं कलेवरम् ॥ १०३ ॥
शिरामुखशतैस्तस्य क्लिन्नस्नेहकणैश्चितम्।
स दृष्ट्वा भोज्यमगमज्जुगुप्सामीलितेक्षणः ॥ १०४ ॥
वर्षेण पुनरायातः सोऽस्थिशेषशवस्रुतैः।
अन्नव्यञ्जनमद्राक्षीद्व्याप्तं द्वित्रैर्वसाकणैः ॥ १०५ ॥
कौतुकाद्वत्सरे याते सोऽपश्यत्पुनरागतः।
कपालशेषकलनादन्नोपरि रजश्च्युतम् ॥ १०६ ॥
षड्भिर्मासैरथायातः शुद्धं शवविवर्जितम्।
रम्यं महानसं दृष्ट्वा पुरोहितमुवाच सः ॥ १०७ ॥
अहो गृहपतेरस्य महासत्रेण पातकम्।
क्षीणमल्पेन कालेन लीढं याचककोटिभिः ॥ १०८ ॥
बभूव पूर्वपुरुषोपार्जितास्य गृहाश्रया।
ब्रह्महत्या शववती सात्र दानात्क्षयं गता ॥ १०९ ॥
यैस्तस्य भवने भुक्तं तैस्तत्पापं समाहृतम्।
पापमन्नाश्रयं पुंसां भोक्तारमुपसर्पति ॥ ११० ॥
ब्रह्महत्या भवस्यापि या बभूव भयप्रदा।
धनेन क्षपिता सेयमहोधनमहोधनम् ॥ १११ ॥

इत्युक्त्वा स शिलापट्टे लिखित्वा श्लोकमादरात् ।
पुरोहितेनार्च्यमानः प्रययौ ज्ञानलोचनः ॥ ११२ ॥
वाच्यमानः स विद्वद्भिः कस्तवाद्भुतवादिभिः (?) ।
श्लोकार्थगौरवरसान्मया तत्र स्वयं श्रुतः ॥ ११३ ॥
शमयति चितं पापं शापं विलुम्पति दुःसहं
कलयति कुलं कल्याणानां कलङ्ककणोज्झितम् ।
धनमकलुषं तीर्थं पुंसां तदेव महत्तपः
सुकृतनिधये श्रद्धाधाम्ने धनाय नमो नमः ॥ ११४ ॥
एतदाकर्ण्य युक्तार्थमर्थस्तुतिमयं मया ।
नीतं [द]शापदेशानां समये सारतन्त्रताम् ॥ ११५ ॥
कुरु चित्तार्जनं तूर्णं[1]·······भवति योषिताम् ।
न[2] यौवनसहायोऽयं तनये कायविक्रमः ॥ ११६ ॥
तनुवल्लीवसन्तश्रीर्वदनेन्दुशरन्निशा ।
पयोधरोद्गमप्रावृट् चपला यौवनद्युतिः ॥ ११७ ॥
तारुण्ये तरले सुभ्रूभ्रमभ्रूभङ्गविभ्रमे ।
स्त्रीणां पीनस्तनाभोगा भोगा द्वित्रिदिनोत्सवः ॥ ११८ ॥
अयं मुखसरोरुहभ्रमरविभ्रमः सुभ्रुवां
कुचस्थलकुरङ्गकः पृथुनितम्बलीलाशिखी ।
न यौवनमदोदयश्चरति चारुकान्तिच्छटा-
कुलत्रिवलिकूलिनीपुलिनराजहंसश्चिरम् ॥ ११९ ॥
आलानमुन्मूल्य सुखाभिधानं तारुण्यनागे गमनोद्यतेऽस्मिन् ।
पलायते कामिगणेऽङ्गनानां विमर्दभीत्येव कुचाः पतन्ति ॥ १२० ॥
युवतितटिनीप्रावृट्कालः सपीनपयोधरः
कृतमदभरारम्भः कामी विलासशिखण्डिनाम् ।
मदनपवनालोल ··································
·································· ॥ १२१ ॥

१ 'शतं' इति पाठः. २. 'नवयौवन—' इति पाठः.

क्रीडावल्लीकुसुमसमये रागपद्माकरार्के
　दर्पोद्याने वदनशशभृत्कौमुदीकार्तिकेऽस्मिन् ।
याते मुग्धद्रविणतुलया यौवने कामिमित्रे
　पण्यस्त्रीणां व्रजति सहसा दुर्दशाशेषतां श्रीः ॥ १२२ ॥

न तु यौवनमात्रेण लभन्ते ललनाः श्रियम् ।
भोगार्हा वृद्धकरिणी तरुणी हरिणी वने ॥ १२३ ॥

रूपवत्यद्भुतास्मीति कान्ते त्याज्यस्त्वया मदः ।
वने मयूराः शुष्यन्ति बलिमश्नन्ति वायसाः ॥ १२४ ॥

पूर्णा वक्रचला........................ ते जनाः ।
क्षीणोऽपि वृद्धिमायाति कुटिलैककलः शशी ॥ १२५ ॥

भ्रूयुग्मं कुसुमेषुकार्मुकलतालावण्यलीलाहरं
　वक्त्रं न्यक्कृतचन्द्रबिम्बमधरो बिम्बप्रभातस्करः ।
रूपं नेत्ररसायनं किमपरं सुश्रोणि तत्रापि ते ।
　शिक्षाहीनतया मदद्विरदवत्प्राप्नोति नार्थक्रियाम् ॥ १२६ ॥

तवेयं यौवनतरोश्छाया विस्मयकारिणी ।
यया कामुकलोकस्य स्मरतापः प्रवर्तते ॥ १२७ ॥

रागसागरसंजातविद्रुमद्रुमपल्लवैः ।
तवाधरे स्मितरुचिः करोति कुसुमभ्रमम् ॥ १२८ ॥

भाति सचन्दनतिलकं कालागुरुकुटिलपल्लवाभरणम् ।
वदनं नन्दनमेतद्भ्रूलतिकालास्यललितं ते ॥ १२९ ॥

यातः सुन्दरि सुतरां स्तनभारपरिश्रमः शनकैः ।
प्रोषितशैशवशोकादिव मध्यः कृशतरत्वं ते ॥ १३० ॥

तथाप्युपायशून्येन रूपेणानेन सुन्दरि ।
न प्राप्यन्ते प्रकृष्टेन प्रयत्नेनेव संपदः ॥ १३१ ॥

गुणवती ललितापि न शोभते तनुतरार्थकदर्थनयान्विता ।
सुकविसूक्तिरिवार्थवती परं व्रजति वेशवधूः स्पृहणीयताम् ॥ १३२ ॥

संसक्तेषु सुरामयी धनगुणाधानेषु लक्ष्मीमयी
स्फीतार्थेषु सुधामयी विषमयी निष्क्रान्तवित्तेषु च ।
वेश्या शङ्कमयी नितान्तकुटिला सद्भावलीनेषु या
देवानामपि सुभ्रु मोहजननी क्षीरोदवेलेव सा ॥ १३३ ॥

इति तया वचनामृतमर्पितं श्रवणपेयमवाप्य कलावती ।
जननि मे द्रविणाधिगमोचितं परिचयं कथयेति जगाद ताम् ॥१३४॥

इति श्रीक्षेमेन्द्रविरचितायां समयमातृकायां पूजाधरोपन्यासो(?)नाम चतुर्थः समयः ।

---

पञ्चमः समयः ।

अथ मन्मथमत्तानां करिणामिव कामिनाम् ।
बन्धाय बन्धकीशिक्षामाचचक्षे जरच्छिखा ॥ १ ॥
श्रूयतां पुत्रि सर्वत्र विचित्रोपायवृत्तये ।
मया दुहितृवात्सल्यादर्थ्यं किंचित्तदुच्यते ॥ २ ॥
पूर्वं भावपरीक्षैव कार्या यत्नेन कामिनाम् ।
ज्ञातरागविभागानां कर्तव्यौ त्यागसंग्रहौ ॥ ३ ॥
कुसुम्भरागः सिन्दूररागः कुङ्कुमरागवान् ।
लाक्षारागोऽथ माञ्जिष्ठो रागः काषायरागभृत् ॥ ४ ॥
हारिद्रो नीलरागश्चेत्यष्टौ वर्णानुकारिणः ।
सुवर्णरागस्ताम्राख्यो रीतिरागस्तथापरः ॥ ५ ॥
रागः सीसकसंज्ञश्च लौहो मणिसमुद्भवः ।
काचरागस्तथा शैलो ह्यष्टौ धात्वनुकारिणः ॥ ६ ॥
सांध्यरागस्तथा चान्द्रस्तथेन्द्रायुध एव च ।
वैद्युताङ्गारकेत्वाख्यरविरागास्तथैव च ॥ ७ ॥
राहुरागोऽष्टमश्चेति रागा गगनसङ्गिनः ।
श्रोत्ररागोऽक्षिरागश्च रसनासंश्रयस्तथा ॥ ८ ॥

त्वग्रागो घ्राणरागश्च मानसो बुद्धिसंभवः ।
अहंकाराभिधानश्चेत्यष्टाविन्द्रियसंज्ञकाः ॥ ९ ॥
वृषरागोऽश्वरागश्च कृकलासाह्वयस्तथा ।
मेषरागः श्वरागश्च खररागस्तथापरः ॥ १० ॥
मार्जाररागो हस्त्याख्यश्चेत्यष्टौ प्राणिभेदजाः ।
शुकरागो हंसरागस्तथा पारावताभिधः ॥ ११ ॥
मायूरश्चटकाख्यश्च कृकवाकुसमुद्भवः ।
कोकिलो जीवजीवाख्यश्चेत्यष्टौ पक्षिजातयः ॥ १२ ॥
केशरागोऽस्थिरागश्च नखाख्यः पाणिसंगतः ।
दन्तरागस्तथा पादरागस्तिलकरागवान् ॥ १३ ॥
कर्णपूराभिधानश्चेत्यष्टावङ्गविभाविनः ।
छायारागस्तथा भूतरागोऽपस्मारवानपि ॥ १४ ॥
ग्रहरागोऽथ गान्धर्वो यक्षाख्यः क्षोभरागभृत् ।
पिशाचराग इत्यष्टौ महारागाः प्रकीर्तिताः ॥ १५ ॥
कौसुमः कुम्भरागश्च नारङ्गाङ्कोऽथ[1] दाडिमः ।
मद्यरागः कुष्ठरागो विसर्पाख्यश्चिताभिधः ॥ १६ ॥
भ्रामरोऽप्यथ पातङ्गो वृश्चिकाख्यो ज्वराभिधः ।
भ्रमाख्यः स्मृतिजन्मा च रतिरागो ग्रहाभिधः ॥ १७ ॥
रागो रुधिरसंज्ञश्च षोडशैते प्रकीर्णकाः ।
संक्षिप्तं लक्षणं तेषां क्रमेण श्रूयतामिदम् ॥ १८ ॥
कौसुम्भो रक्षितः स्थायी क्षणान्नश्यत्युपेक्षितः ।
स्वभावरूक्षः सैन्दूरः स्नेहश्लेषेण धार्यते ॥ १९ ॥
अल्पलीनः सुखायैव घनो दुःखाय कौङ्कुमः ।
तप्तः श्लिष्यति लाक्षाङ्कः श्लेषं नायाति शीतलः ॥ २० ॥
तप्तः शीतश्च माञ्जिष्ठो स्थिरभोगक्षमः समः ।
स्थिरो रौक्ष्येण काषायः स्नेहयोगेन नश्यति ॥ २१ ॥

१. 'नारङ्गकोऽथ' इति पाठः.

सुरक्षितोऽपि हारिद्रः क्षणेनैव विरज्यते।
नीलो देहक्षयस्थायी वार्यमाणोऽपि निश्चलः॥ २२॥
सौवर्णश्छेदनिर्घर्षतापैस्तुल्यरुचिः सदा।
मृज्यमानस्य वैमल्यं ताम्रसंज्ञस्य नान्यथा॥ २३॥
रीतिनाम्नस्तु मालिन्यं स्नेहेनाप्युपजायते।
सैसस्यादौ च मध्ये च क्षये च मलिना रुचिः॥ २४॥
तीक्ष्णस्वभावाल्लोहस्य काठिन्याच्च न नम्रता।
मणिनामा च निर्व्याजः सहजस्वच्छनिश्चलः॥ २५॥
स्वभावभिदुरः काचसंज्ञश्छलनिरीक्षकः।
शैलोऽपि गौरवस्थायी हृदयाभावनीरसः॥ २६॥
सांध्यश्चलश्च नित्यश्च कल्पदोषो दशाश्रयः।
चन्द्ररागः प्रशान्तार्तिशीतलः क्षयवृद्धिभाक्॥ २७॥
ऐन्द्रायुधो बहुरुचिर्वक्रमायाविलासभूः।
वैद्युतस्तरलारम्भदृष्टनष्टविकारकृत्॥ २८॥
अङ्गारः स्त्रीजनावज्ञाज्वलितो लोहिताननः।
केतुसंज्ञः स्फुटानर्थकारी बन्धवधादिभिः॥ २९॥
आर्कस्तीक्ष्णतया नित्यसंतापः सततोदयः।
मित्रक्षयैषी विषमो राहुरागो महाग्रहः॥ ३०॥
श्रौत्रः कर्णसुखाभ्यासाद्गुणाकर्णनतत्परः।
अक्षिजन्मा परं रूपमात्रे परिणतस्पृहः॥ ३१॥
रासनो विविधास्वादभोज्यसंहारलौल्यवान्।
त्वङ्मयः सर्वमुत्सृज्य सर्वाङ्गालिङ्गनोत्सुकः॥ ३२॥
घ्राणाख्यः पुष्पधूपादिभूरिसौरभलोभभृत्।
मानसः सतताभ्यस्तस्पृहामात्रमनोरथः॥ ३३॥
बुद्ध्याख्यो गुणवत्कान्तासक्तिव्यसनवर्जितः।
अहंकाराभिधः श्लाघ्यसंगमोन्नतिलक्षणः॥ ३४॥

वृषसंज्ञश्च तारुण्यात्कायदर्पबलोद्भवः ।
अश्वस्तु रतमात्रार्थी तत्कालोद्यतकातरः ॥ ३५ ॥
कृकलासाभिधानश्च स्त्रैणदर्शनचञ्चलः ।
मेषाख्यः शष्पकवलाभ्यासतुल्यरतिस्पृहः ॥ ३६ ॥
श्वाख्यो रत्यन्तविमुखः स्त्रीरहस्यप्रकाशकः ।
गार्दभः क्रूरसंमर्दतृप्तिमात्रपरायणः ॥ ३७ ॥
मार्जारजन्मा सातत्यादत्यन्तनिकटास्थितिः ।
कौञ्जरः क्लेशबन्धादिनिरपेक्षसमागमः ॥ ३८ ॥
शुकाभिधोऽन्तर्निःस्नेहः कामं मुखसुखस्थितिः ।
हंससंज्ञः सुखस्थित्या गुणदोषविभागकृत् ॥ ३९ ॥
पारावताख्यः सस्नेहरतिसर्वस्वलक्षणः ।
मायूरः स्ववपुः स्फीतरूपप्रमदनृत्तवान् ॥ ४० ॥
बहुशः सुरतासङ्गमात्रार्थी चटकाभिधः ।
कृकवाकुभवः कान्ताक्लेशलेशविभागवान् ॥ ४१ ॥
कोकिलो मधुरालापः प्रभूतप्रसरत्कथः ।
जीवजीवकसंज्ञश्च परिचुम्बननिश्चलः ॥ ४२ ॥
केशाख्यः सप्तदिवसस्थायी कृच्छ्रानुरञ्जकः ।
अस्थिसंस्थोऽन्तरस्थश्च प्रच्छन्नस्नेहजीवितः ॥ ४३ ॥
नखाभिख्यो मासमात्रस्थायी याति शनैः शनैः ।
पाणिनामा प्रबुद्धोऽपि बद्धमुष्टेर्न लक्ष्यते ॥ ४४ ॥
दन्ताभिधो यस्ताम्बूललीलामात्ररुचिः सदा ।
पादाख्यश्चरणालीनः प्रणामैरेव केवलम् ॥ ४५ ॥
तिलकप्रतिमो नीचस्योत्तमस्त्रीसमागमः ।
कर्णपूरश्च कौटिल्यात्कर्णलग्नोऽतिकत्थनः ॥ ४६ ॥
*सर्वत्रानुचरः शोषकारी छायाग्रहाभिधः ।*
अज्ञातचित्तः स्तब्धाख्यो भूतसंज्ञो विचेतनः ॥ ४७ ॥

अपस्माराभिधः क्रूरकोपाक्षेपः क्षणे क्षणे ।
ग्रहो वस्त्राञ्चलग्राही सजने विजने पथि ॥ ४८ ॥
गान्धर्वो गीतनृत्तादिरससंसक्तमानसः ।
यक्षः क्षिप्तो न निर्याति गृहावृत्तिविचक्षणः ॥ ४९ ॥
यत्तत्प्रलापमुखरः क्षोभाख्यस्त्यक्तयन्त्रणः ।
पैशाचश्चाशुचिरतस्तीव्रक्षतविदारणः ॥ ५० ॥
कौसुमः क्षणिकोदारः पूजामात्रपरिग्रहः ।
भग्नोऽपि कौम्भः शकलश्लेषे श्लिष्ट इवेक्ष्यते ॥ ५१ ॥
नारङ्गः सरसोऽप्यन्तर्बहिस्तीक्ष्णः कटुः परम् ।
बहुगर्भतया रूढो हृदये दाडिमाभिधः ॥ ५२ ॥
क्षणक्षैब्योपमो माद्यः स्वस्थो वैलक्ष्यलक्षणः ।
बीभत्साचारवैरस्यात्कुष्ठाख्योऽतिजुगुप्सितः ॥ ५३ ॥
वैरूप्यं च समायाति च्छेदेनेवाङ्ग मर्मणाम् ।
चिताभिधानः सर्वाङ्गदाही वश्यप्रयोगजः ॥ ५४ ॥
भ्रामरः कौतुकास्वादमात्रो नवनवोन्मुखः ।
पातङ्गः कामिनीदीप्तिरसिकः क्षयनिर्भरः ॥ ५५ ॥
वृश्चिकाख्यो व्यथादायी द्वेष्योऽप्यत्यन्तनिश्चलः ।
त्यक्ताहारोऽतिसंतापनष्टच्छायो ज्वराभिधः ॥ ५६ ॥
भ्रमनामा मतिभ्रंशाच्चक्रारूढ इवाकुलः ।
स्मरणाख्यः प्रियस्मृत्या कृतान्यस्त्रीसमागमः ॥ ५७ ॥
रतिग्रहः सदा स्वप्ने संप्राप्तसुरतोत्सवः ।
रौधिरः कलहे रक्तपातैर्नीचस्य वर्धते ॥ ५८ ॥
इत्यशीतिः समासेन रागभेदाः प्रकीर्तिताः ।
विस्तरेण पुनस्तेषां कः सख्यां कर्तुमर्हति ॥ ५९ ॥
सुहृज्जनार्जनं कुर्यात्पूर्वं वारविलासिनी ।
वेश्यानां पद्मिनीनां च मित्रायत्ता विभूतयः ॥ ६० ॥

सुहृद्भिरेव जानाति कामुकानां धनं गुणम् ।
हृदयग्रहणोपायं शीलं रक्तापरक्तताम् ॥ ६१ ॥
महाधनस्य सुहृदां कामिनां प्रेमशालिनाम् ।
प्रच्छन्नसुरतेनापि कुर्यादाराधनं सदा ॥ ६२ ॥
एको वित्तवतः सूनुः पितृहीनः सुयौवने ।
मुग्धे भूभुजि कायस्थः कामिस्पर्धी वणिक्सुतः ॥ ६३ ॥
नित्यातुरामात्यवैद्यप्रसिद्धस्य गुरोः सुतः ।
················प्रच्छन्नकामो जाड्य[1] धनः ॥ ६४ ॥
नपुंसकप्रवादस्य प्रशमार्थी फलाशनः ।
मत्तो धूर्तसहायश्च राजसूनुर्निरङ्कुशः ॥ ६५ ॥
ग्राम्यो धातृद्विजसुतः प्राप्तलाभश्च गायनः ।
सद्यः सार्थपतिः प्राप्तः श्रीमान्दैवपरायणः ॥ ६६ ॥
गतानुगतिको मूर्खः शास्त्रोन्मादश्च पण्डितः ।
नित्यक्षीबश्च वेश्यानां जङ्गमाः कल्पपादपाः ॥ ६७ ॥
प्रथमं प्रार्थिता वेश्या न क्षणोऽस्तीत्युदाहरेत् ।
जनस्यायं स्वभावो हि सुलभामवमन्यते ॥ ६८ ॥
शिरःशूलादिकं व्याधिमनित्यमजुगुप्सितम् ।
अवहारोपयोगाय पूर्वमेव समादिशेत् ॥ ६९ ॥

पत्नीव कुर्यादनुवृत्तिपूर्वं पूर्वं महार्थस्य वरोपचारम् ।
द्रव्यैस्त्वया मन्त्रजपादिभिर्वा वशीकृतास्मीति वदेच्च सर्वम् ॥ ७० ॥
स्वयं प्रदत्तेऽपि नखक्षते च शङ्केत तद्भक्तिविवादशीलम् ।
निन्देत्प्रकामं जननीं विरुद्धां गच्छेत्स्वयं वेश्म च कामुकस्य ॥ ७१ ॥
विदेशयात्रामपि मन्त्रयेत तेनैव सार्धं विहितानुबन्धा ।
सुप्तस्य कुर्यात्परिचुम्बनं च गुणस्तुतिं चार्धविबोधभाजः ॥ ७२ ॥
स्वप्ने सदैव प्रलपेत्सरागं सर्वं च तन्नामनिबद्धमेव ।
न चास्य तृप्तिं सुरतेषु गच्छेद्द्वयस्य कुर्याच्च मुहुर्निषेधम् ॥ ७३ ॥

---
१. 'जटाधरः' इति पाठः.

तस्माच्च पुत्रार्थमनोरथा स्यात्प्राणात्ययं तद्विरहे वदेच्च।
इत्यादिभिः स्वीकरणाद्युपायैर्निबद्धबुद्धेर्द्रविणं लभेत॥ ७४॥
तावच्च तूर्णं धनमाहरेत यावत्स रागेण विनष्टसंज्ञः।
प्रशान्तरागानलशीतलस्तु स लोहपिण्डीकठिनत्वमेति॥ ७५॥
याचेत सर्वं सुरतार्त्तिकाले तमूरुबन्धेन निरुद्धकायम्।
प्रायेण तृप्ताय न रोचते हि विनम्रशाखापरिपक्वमाम्रम्॥ ७६॥
संधारयेत्तं च विशेषवित्तं यावन्न निःशेषधनत्वमेति।
पुनः पुनः स्नेहलवार्द्रवक्त्रा दीपं यथा दीपकदीपवर्तिः॥ ७७॥
निष्पीतसारं विरतोपकारं क्षुण्णेक्षुशल्कप्रतिमं त्यजेत्तम्।
लब्धाधिवासक्षयकारिशुष्कं पुष्पं त्यजत्येव हि केशपाशः॥ ७८॥
हेमन्तमार्जार इवातिलीनः स चेन्न निर्याति निरस्यमानः।
तदेष कार्यस्तनुमर्मभेदी प्रवर्धमानः परुषोपचारः॥ ७९॥
शय्यावहारैर्वचनप्रहारैः कोपप्रकारैर्जननीविकारैः।
कौटिल्यसारैर्विविधापसारैर्विपद्विचारैर्गणितापचारैः॥ ८०॥
याच्ञाविवादैरधनापवादैर्दत्तानुवादैः परसाधुवादैः।
निन्दाजवादैः परुषप्रवादैर्विटप्रवादैः कथितावसादैः॥ ८१॥
मुहुः प्रवासैः कलहोपवासैर्मायानिवासैः कटुकाधिवासैः।
सभ्रूविलासैर्व्यसनीपवासैर्निष्कासनीयः स पृथुप्रवासैः॥ ८२॥
स चेत्पुना रागजतुप्रसक्तस्तीव्रावमानैरपि न प्रयाति।
तदा तमुत्क्षिप्तभुजान्यवक्त्रा दासी वदेद्वित्तवियोगदीनम्॥ ८३॥
यत्राभवत्कामुकलोकयात्रा विचित्ररूपा सततं विभूतिः।
गृहे चतुर्थे दिनमद्य तस्मिन्दृष्टस्य दृष्टस्य वधूत्सवस्य॥ ८४॥
क्लीबस्य यस्यास्ति न भोगसंपत्स किं भुजिष्याभवने करोति।
न यस्य हस्ते तरमूल्यमस्ति स किं समारोहति नावमग्रे॥ ८५॥
प्रक्षीणवित्तेन निरुद्यमेन किं रूपयुक्तेन करोति वेश्या।
विच्छिन्नदुग्धा न पुनः सगर्भा सा कस्य गौश्चारुतयोपयुक्ता॥ ८६॥

मिथ्यैव रिक्तः कुरुते जडानामावर्जनैः प्रेममयैर्वचोभिः ।
क्षीरक्षये चुम्बनलालनेन बालस्य वृद्धिं विदधाति धात्री ॥ ८७ ॥

इत्यादिभिस्तद्वचनावमानैस्तस्मिन्गते ग्रीष्मतुषारतुल्ये ।
क्षीणं निरस्तं पुनराप्तवित्तं भजेत यत्नाहृतवित्तमन्यम् ॥ ८८ ॥

प्राप्ते कान्ते कथमपि धनादानपात्रे च वित्ते
. त्वं मे सर्वं त्वमसि हृदयं जीवितं च त्वमेव ।
इत्युक्त्वा तं क्षपितविभवं कञ्चुकाभं भुजंगी
त्यक्त्वा गच्छेत्सधनमपरं वैशिकोऽयं समासः ॥ ८९ ॥

उद्देशलेशेन यदेतदुक्तं तत्कार्यकाले विविधप्रयोगम् ।
तस्मात्स्वबुद्ध्यैव विचार्य कार्यमुक्त्वेति तूष्णीं जरती चकार ॥ ९० ॥

इति श्रीक्षेमेन्द्रविरचितायां समयमातृकायां रागविभागोपन्यासो नाम पञ्चमः समयः ।

---

## षष्ठः समयः ।

अथ क्षणक्षीणधनायमाने शनैः शनैर्निष्प्रतिभे शशाङ्के ।
द्यौर्दोषयुक्तेव विलोकनेन सविह्वला मीलिततारकाभूत् ॥ १ ॥

इन्दौ प्रयाते कृतरात्रिभोगे प्रवेशकाले चिरकामुकस्य ।
वेश्येव संध्या गगनाङ्गनाग्रं निर्दिष्टताराकुसुमं चकार ॥ २ ॥

अथोदिते स्वस्थितिदानदक्षे बाले रवौ श्रीमति पङ्कजिन्याः ।
विकासकाले मधुपानकेलिरभूद्विटानामिव षट्पदानाम् ॥ ३ ॥

कलावती मौक्तिकभूषणाङ्का धम्मिल्लमाल्यप्रणयप्रसक्तैः ।
भृङ्गैर्वृता दर्पणमीक्षमाणा सतारका चन्द्रवती निशेव ॥ ४ ॥

स्मराङ्गनाकेलिशुकायमानकरस्थताम्बूलविलासपूर्णा ।
समातृका नापितदत्तहस्ता कान्तां तनुं पण्यदशां नयन्ती ॥ ५ ॥

सलीलमाक्रान्तिविलोलकाञ्चीरवेण पारावतदत्तसंज्ञा ।
अर्थार्थिनी राजपथप्रकारं हर्म्यं प्रियोत्सङ्गमिवारुरोह ॥ ६ ॥

तामब्रवीत्तत्परिभोगयोग्यं प्रातर्नवं कामुकमीक्षमाणः ।
विलोक्य कङ्कः शयनोत्थितानां पण्याङ्गनानां गणयन्विचेष्टाः ॥ ७ ॥
आसन्नमित्रागममुच्यमानसमागमे वासरवल्लभस्य ।
निर्यान्ति दीपा इव रात्रिभोग्या पश्य प्रभाते गणिकागृहेभ्यः ॥ ८ ।
एष प्रबुद्धः सहसा जटाभृल्लीलाशिवः कुक्कुटकूजितेन ।
गृहान्नलिन्याः परिहृत्य राजरथ्यां कुमार्गेण मठं प्रयाति ॥ ९ ॥
एते निधेर्निग्रहभट्टसूनोः घृष्टा विटा रात्रिसुखं प्रभाते ।
कर्तुं प्रवृत्ताः पृथुभोज्यभूरिव्ययाय भद्राभवने विभागम् ॥ १० ॥
प्राप्ते गृहद्वारमनङ्गसारे महाविटे पश्य वसन्तसेना ।
शून्यप्रसुप्तापि पुरः समेत्य निशीथभोगं कथयत्यसत्यम् ॥ ११ ॥
भग्नाङ्गदा त्रोटितकर्णपाली मतङ्गनाम्ना गणपालकेन ।
आत्मापराधं विनिगूहमाना विरौति रामा जननीजनाग्रे ॥ १२ ॥
निर्गच्छतो ग्रामनियोगिनोऽस्य ददाति गुप्तस्य समेत्य पश्चात् ।
इदं तथेदं च पुरः प्रहेयमित्यादि संदेशशतानि वृद्धा ॥ १३ ॥
संप्रस्थितेयं सह माधवेन कोशं ध्रुवं पातुमनङ्गलेखा ।
अग्रे यदस्या मधुकुम्भवाही मेषं विकर्षन्पुरुषः प्रयाति ॥ १४ ॥
टक्कस्य सा····च्चलितस्य········विप्राय यत्स्कन्दकदानकाले ।
प्रसाधनाय स्वयमेव गन्तुं समुद्यता पश्य शशाङ्कलेखा ॥ १५ ॥
उद्यानलीलागमने निशायां सुनिश्चिते मल्लिकयार्जुनस्य ।
कृतः प्रभाते नवचीनवस्त्रदानं विना पश्य मुहूर्तविघ्नः ॥ १६ ॥
मेषप्रदस्येन्द्रवसोर्द्विजस्य मुक्त्वा प्रभूतं निशि कालखण्डम् ।
विषूचिकार्ता विटहर्षहेतुर्वैद्यार्थिनी क्रन्दति कुट्टनीयम् ॥ १७ ॥
वैद्योऽप्यसौ मण्डलगुल्मनामा प्रभातचारी नगरार्जितानि ।
समुद्यतः पूगफलानि दातुं कुराङ्गिकायै निजमुष्टिपूरैः ॥ १८ ॥
कङ्कालनाम्ना निशि गायनेन वारावहारान्निशभग्नभाण्डा ।
गृह्णाति का नो चरणस्पृशोऽस्य वरांशुकं कुण्डघटादिमूल्यात् ॥ १९ ॥

प्राप्तस्य शंभोर्वणिजस्तु वारे सुप्तस्य शून्ये शयने निशायाम् ।
नन्दा समेत्यापरकामिगेहात्सविप्रलम्भं शपथं करोति ॥ २० ॥
पितुर्गृहाद्भूरिविभूषणानि प्राप्तं गृहीत्वा मदनं मृणाली ।
निगूह्य संदर्शयति स्वगेहं शून्यं तमन्विष्टुमुपागतानाम् ॥ २१ ॥
भोज्यं विना पाटलिका प्रविष्टं मुष्टिप्रदं श्रोत्रियमत्रिरात्रम् ।
शुष्कान्नदाता पितृकार्यमेतत्किं किं करोषीत्यसकृद्ब्रवीति ॥ २२ ॥
मार्जारजिह्वा जननी हरिण्याः पद्मस्य भोज्यं निशि लुण्ठितं यत् ।
तस्मिन्गते तद्विजने विशङ्का पश्य प्रभाते कवलीकरोति ॥ २३ ॥
*ईर्ष्याविशेषात्कृतकोपवादसंमूर्छितायां मलयं रमण्याम् ।*
विभूषणं तोषणमाशु किंचिदस्यै प्रयच्छेति वदन्ति सख्यः ॥ २४ ॥
रागेण कृष्णीकृतकेश एष वलीविशेषस्फुटवृद्धभावः ।
योगागृहं शम्बरसारनामा यागाय युग्येन गुरुः प्रयाति ॥ २५ ॥
अयं जनस्थानविनाशहेतुः केतुः खरक्रूरतया प्रसिद्धः ।
आस्थानभट्टश्चिटिवत्सनामा प्रयाति युग्येन विशीर्णवस्त्रः ॥ २६ ॥
उच्चैश्चिरात्सौधनिषक्तदृष्टिरश्वाधिरूढः कमलोऽधिकारी ।
कलावति त्वामयमीक्षमाणः शूलार्पिताकारतुलां बिभर्ति ॥ २७ ॥

श्रीखण्डोज्ज्वलमल्लिकातिलकवानक्षामहेमाङ्गद-
　　श्छिन्नश्लिष्टविनष्टनासिकतया प्रख्यातजारज्वरः ।
एष त्वामवलोक्य मालवपतेर्दूतः प्रपञ्चाभिधः
　　पश्योद्वेष्टविवेष्टनानि कुरुते भोगीव मन्त्राहतः ॥ २८ ॥

एष प्रख्यातकूटः कपटविटघटानर्मकर्मप्रगल्भः
　　श्रीगुप्तो नाम धूर्तः सकलकलिकलाकल्पनामूलदेवः ।
दृष्ट्वा दूरात्प्रसिद्धां तव नवजननीमञ्जलिश्लिष्टहस्तः
　　पश्याक्ष्णा दत्तसंज्ञः स्मितचलचिबुकः स्तोतुमेतां प्रवृत्तः ॥ २९ ॥

पातालोत्तालतालुप्रविततवदनस्पष्टदृष्टोग्रदंष्ट्रा
　　विश्वग्रासावहेलाकुलितशिखिशिखाविभ्रमोद्भ्रान्तजिह्वा ।

मेषाणां [1]चण्डमुण्डाहरणकटकटारावपिष्टास्थिसंस्था
सिद्धा शुष्कातिपूर्णा जयति भगवती कुट्टनी चण्डघण्टा ॥ ३० ॥
एष स्फीतधनस्य लोभवसतेः पापस्य मूर्तिस्थशः
शङ्खाख्यस्य महार्घहट्टवणिजः पङ्काभिधानः सुतः ।
आकृष्टः प्रतिवेश्म[2]निर्गतविटैः सारङ्गमुग्धः शिशुः
सुभ्रु त्वां तुषराशिलोलचटकाकारः समुद्वीक्षते ॥ ३१ ॥
एष निधिर्विधिना तव नूनं मेषमतिर्विहितः प्रहितो वा ।
स्थूलमुखः पृथुचूलकलापः स्कन्धयुगाञ्चितकर्णसुवर्णः ॥ ३२ ॥
इत्यादि कङ्केन वितर्क्यमाणं वणिक्सुतं दृक्पतितं विचार्य ।
मनोरथाभ्यर्थितलाभतुष्टा कङ्कालिका सस्मितमित्युवाच ॥ ३३ ॥
निर्यत्ताम्बूललालालवशबलवलद्ग्रीववक्रावलोकी
रक्तोपानद्युगोद्यत्सरसरमुखरप्रस्खलत्पादचारैः ।
एवंरूपोऽतिमुग्धः शिशुरखिलधनावाप्तये बन्धकीना-
मक्लेशाराधनार्हः स्वयमुपनमति प्रायशः पण्यपुण्यैः ॥ ३४ ॥
कलावति त्वन्मुखनिश्चलोऽयं महाविटश्चारणचक्रचारैः ।
निवेदितोऽग्रे तव देवतायाः शिशुः पशुर्भोगविभूतिकामैः ॥ ३५ ॥
पार्श्वे त्वमेषां व्रज कङ्क तूर्णं दूतं करिष्यन्ति भवन्तमेते ।
तथेति दत्तोचितशासनोऽसौ जगाम सौधादवरुह्य हृष्टः ॥ ३६ ॥

इति श्रीक्षेमेन्द्रविरचितायां समयमातृकायां षष्ठः समयः ।

## सप्तमः समयः ।

अथाययौ शनैः श्रीमान्नवोद्भूतमनोभवः ।
लतालिङ्गनकुद्दालः कालः कुसुमलाञ्छनः ॥ १ ॥
संभोगसुखसंपत्तिः पराधीनेव कामिनाम् ।
आलम्बे धनेशाशामितीवाकलयन्रविः ॥ २ ॥

१. 'चर्ममुण्ड' इति पाठः. २. 'निर्गुट' इति पाठः.

दक्षिणानिलसोच्छ्वासा लसत्कुसुमपाण्डुराः ।
जातजृम्भा ययुस्तन्व्यो लताः सोत्कण्ठतामिव ॥ ३ ॥

दग्धेऽन्धकद्विषा रोषात्पुराणे पञ्चसायके ।
नवं विनिर्ममे काममृतुराजप्रजापतिः ॥ ४ ॥

प्रस्खलत्कोकिलालापा गायन्त्यो भृङ्गशिञ्जितैः ।
वेश्या इव मधुक्षीबा विरेजुर्वनराजयः ॥ ५ ॥

नवकिसलयलेखापङ्क्तिसङ्गे लतानां
नखमुखलिपिलीलालोभिनीमाकलय्य ।
मधुमदपरिरम्भे भेजिरे लोहितत्वं
स्थलकमलवनानामीर्ष्ययेवाननानि ॥ ६ ॥

क्षैण्यक्षामं शिशिरसमयं वृद्धमुत्सृज्य दूरे
त्यक्त्वा शीतं तरुणमसकृद्गाढरागानुबन्धम् ।
उद्यानश्रीर्मधुमभिमतं बालमेवालिलिङ्ग
प्रायः स्त्रीणां वयसि नियतिर्नास्ति कार्यार्थिनीनाम् ॥ ७ ॥

अथ नापितदूतेन कृतद्वित्रगतागता ।
मिथ्या कृतनिषेधापि ग्रहणाग्रहणे शिशोः ॥ ८ ॥
कथंचिदभ्यर्थनया गृहीतार्था कलावती ।
संध्यायां मण्डनासक्ता ययौ वासकसज्जताम् ॥ ९ ॥ (युगलकम्)

कपोले कस्तूरीस्फुटकुटिलपत्राङ्कुरलिपि-
र्ललाटे कार्पूरं तिलकमलकालीपरिसरे ।
तनौ लीना हेमद्युतिपरिचिता कुङ्कुमरुचिः
स तस्याः कोऽप्यासील्ललितमधुरो मण्डनविधिः ॥ १० ॥

प्रौढकामुकसंभोगसाक्षिणी बालसंगमे ।
नोचितास्मीति तामूचे लज्जया नतमेखला ॥ ११ ॥

हारिणी सा तनुलता हारिणी च कुचस्थली ।
दृष्टिश्च हारिणी तस्या बभौ स्मरविहारिणी ॥ १२ ॥

अत्रान्तरे वणिक्सूनुर्विवेश गणिकागृहम् ।
आसन्नलाभाभिमुखैरावृतं क्षेत्रवासिभिः ॥ १३ ॥
कर्णसंसक्तमुक्ताङ्ककनकस्थूलवालकः ।
बहुहेमभराक्रान्तिसव्यथश्रवणद्वयः ॥ १४ ॥
कण्ठाभरणमध्यस्थहैमरक्षाचतुष्टयः ।
जननीहस्तविन्यस्तसर्षपाङ्कितचूलिकः ॥ १५ ॥
राजावर्तमणिस्थूलगुलिकाभ्यां विराजितम् ।
राजतं चरणालीनं बिभ्राणः कटकद्वयम् ॥ १६ ॥
मुहुर्दीर्घाञ्चलदशां स्वस्तां संकलयन्पटीम् ।
बहुचूर्णकताम्बूलदग्धास्यकृतसीत्कृतः ॥ १७ ॥
स प्रविश्य प्रकाशाशां ददर्शादर्शमादरात् ।
कलावतीं कलाकान्तललितामिव शर्वरीम् ॥ १८ ॥
कथं लालनयोग्योऽयं बालः संभोगभाग्भवेत् ।
इतीव तारहारेण सस्मितस्तनमण्डलात् ॥ १९ ॥
द्रविणक्षयदीक्षायां वैचक्षण्यकृतक्षणाः ।
ऋत्विजः सप्त विविशुः पुरस्तस्य महाविटाः ॥ २० ॥
निर्गुटः क्षीणसाराख्यो दिविरः कलमाकरः ।
रेचको भरताचार्यः क्षुण्णपाणिस्तुलाधरः ॥ २१ ॥
गणकः सिंहगुप्तश्च तिक्तनामा भिषक्सुतः ।
कटिः कुटिलकश्चेति भोगाम्भोरुहषट्पदाः ॥ २२ ॥
वेश्यासमागमे शैलीं शिक्षितः स विटैर्बहिः ।
प्रविश्य कामिनीपार्श्वे प्रौढवत्समुपाविशत् ॥ २३ ॥
वाससाच्छाद्य नासार्धमप्रस्तावकटूत्कटाम् ।
नर्मगोष्ठीं स विदधे शिक्षितां शुकपाठवत् २४ ॥
ततः प्रविश्य कङ्काली गृहीतोच्चतरासना ।
रञ्जनाय पुरश्चक्रे विटानां कपटस्तुतिम् ॥ २५ ॥

धन्योऽयं बालकः श्रीमान्भवद्भिर्यस्य संगतिः ।
युष्मत्परिचयः पुण्यपरिपाकेन लभ्यते ॥ २६ ॥
शिशुरप्ययमस्माकं कामुकोऽभिमतः परम् ।
बाल एव सहस्रांशुः कमलिन्या विकासकृत् ॥ २७ ॥
इत्यादिभिः स्तुतिपदैः कुट्टन्या विटमण्डले ।
स्वीकृते भूरभूत्क्षिप्रं ताम्बूलावेलपाटला ॥ २८ ॥
ततः काली कलावत्या धात्री वेतालिकाभिधा ।
ताम्बूलदानावसरप्रहर्षाकुलितावदत् ॥ २९ ॥
अत्यल्पः परिवारोऽयं ताम्बूलप्रणयी स्थितः ।
नास्माकमन्यवेश्यानामिवासंख्यः परिग्रहः ॥ ३० ॥
कङ्कः प्रथमपूज्योऽयं देवाकृतिरुदारधीः ।
यस्यानुरोधात्सुलभा दुर्लभापि कलावती ॥ ३१ ॥
जामाता गौरवार्होऽयं पूज्यः कन्यार्पणेन नः ।
शाङ्खिकः कमलो नाम संमानं पूर्वमर्हति ॥ ३२ ॥
अयं पितुः कलावत्याः प्रेतकार्यप्रतिग्रही ।
ह्यः पर्वदिवसावाप्त········शक्तिर्महाव्रती ॥ ३३ ॥
अयं स्थलपतेः सूनुः कपिलः कलशाभिधः ।
गुरुभ्राता कलावत्याः कल्पपालो मधुप्रदः ॥ ३४ ॥
मृदङ्गोदरनामायं कलावत्याः स्वसुः पतिः ।
मातुलः कलहो नाम बिन्दुसारः सहोदरः ॥ ३५ ॥
इयं दत्तकपुत्रस्य कलावत्याः कलायुषः ।
धात्री कलावती नाम रुग्णचन्द्रश्च तत्पतिः ॥ ३६ ॥
अयं भरतभाषाज्ञः काम्बो भागवतात्मजः ।
गायनः खरदासोऽयं महामात्यस्य वल्लभः ॥ ३७ ॥
निगिलः सूपकाराख्यः कुम्भकारश्च कर्परः ।
बकश्छत्रधरश्चायं खञ्जनो युग्यवाहनः ॥ ३८ ॥

रतिशर्मा द्विजन्मायं गणिकाग्रेहशान्तिकृत् ।
आरामिकः करालोऽयं कीलवर्तश्च नाविकः ॥ ३९ ॥

उद्यानपालः कन्दोऽयं मुकुलाख्यश्च पौष्पिकः ।
चर्मकृद्दमदत्तोऽयं मारच्छिद्रश्च धावकः ॥ ४० ॥

बहिरास्ते च चाण्डाली क्रोशन्ती घर्घराभिधा ।
डोम्बश्चण्डरवाख्यश्च कोष्ठागारप्रहारिकः ॥ ४१ ॥

ताम्बूलं देयमेतेभ्यः प्रहेयं प्रातरेव तु ।
सख्यै शम्बरमालायै गुरवे दम्भभूतये ॥ ४२ ॥

उक्त्वेति पूगफललुण्ठिनिविष्टचित्ता
वैतालिका विविधवेशवनीप्रविष्टाः ।
चक्रुः प्रभूतमधुपानविघूर्णमाना-
स्ताम्बूलदानबहुमानगतागतानि ॥ ४३ ॥

ततः क्षीबैरसंभाव्यं कत्थमानैर्विटैः परम् ।
उद्वेजितेव रजनी भूपव्याजेन निर्ययौ ॥ ४४ ॥

नृपस्य बाहुर्युधि दक्षिणोऽहं ममैव राज्यं कलमान्तरस्थम् ।
मयि स्थिते तिष्ठति नाव्यशास्त्रं सूते तुला वित्तपतिश्रियं मे ॥ ४५ ॥

त्रैलोक्यवृत्तं गणितेन वेद्मि मयैव भोजस्य कृता चिकित्सा ।
भुक्ता मया भूपतयः स्वसूक्तैरित्यूचिरे मद्यमदोद्धतास्ते ॥ ४६ ॥

विसृष्टास्ते कलावत्या ताम्बूलार्पणलीलया ।
निर्ययुः कलयन्तोऽन्तर्भाविनीं भोज्यसंपदम् ॥ ४७ ॥

अथ विततवितानं हंसशुभ्रोपधानं
शयनममलचीनप्रच्छदाच्छादिताग्रम् ।
अभजत हरिणाक्षी क्षीबमादाय बालं
निजपरिजननर्मस्मेरवक्त्राम्बुजश्रीः ॥ ४८ ॥

---

१. 'गेहशान्तिकृत्' इति पाठः.

शिशुतररमणेऽस्याः कौसुमामोदलुभ्य-
भ्रमरभरनिपातैर्घूर्णमानाः प्रकामम् ।
प्रसरदगुरुधूमश्यामलाग्रा बभूवु-
र्वलितविरतवक्त्रा लज्जयेव प्रदीपाः ॥ ४९ ॥

इति श्रीक्षेमेन्द्रविरचितायां समयमातृकायां कामुकसमागमो नाम सप्तमः समयः ।

---

अष्टमः समयः ।

अथ सितकिरणरतिश्रमखिन्नेव विनिद्रतारकारजनी ।
प्राभातिकसलिललवस्वेदवती क्षामतां प्रययौ ॥ १ ॥
गणिका ततः प्रभाते सकलनिशाजागरेण ताम्राक्षी ।
रात्रिसुखप्रश्नपरां प्रोवाच समेत्य कङ्कालीम् ॥ २ ॥
शृणु मातः शिशुवयसस्तस्य स्फुटतामकालपुष्टस्य ।
*यस्याल्पकस्य बहुलं मरिचकणस्येव तीक्ष्णत्वम् ॥ ३ ॥*
आरोपितः स चेत्या खट्वामत्युन्नतां शनैः शिशुकः ।
निश्चलतनुर्मुहूर्तं धूर्तः स च कृतकसुप्तोऽभूत् ॥ ४ ॥
ललनासुलभकुतूहलचपलतयालिङ्गितः स्वयं स मया ।
तत्क्षणनवसुरतान्ते सहसा निश्चेष्टतां प्रययौ ॥ ५ ॥
पूगफलमस्य लग्नं ज्ञात्वेति मया स शीतसलिलार्द्रम् ।
दत्त्वा वक्षसि हस्तं प्रलयभयाज्जृम्भितः संज्ञाम् ॥ ६ ॥
लब्धास्वादः स ततश्चटकरतिर्मां प्रजागरो मूर्तः ।
खेदक्लान्तामकरोद्गणनातीतैः समारोहैः ॥ ७ ॥
बालमुखं तरुणतरं रभसरसेन प्रबोधयन्त्या तम् ।
कष्टं मयैव कृष्टो ज्वलिताङ्गारः स्वहस्तेन ॥ ८ ॥
रोदिति शिशुरिति दयया यस्य न दशनक्षतं मया दत्तम् ।
तेन ममाधरबिम्बं पश्य शुकेनेव खण्डितं बहुशः ॥ ९ ॥
मुहुरारोहणहेलापरिरम्भैर्वामनीकृतं तेन ।
शिशुसंगमात्क्षणं मे लज्जितमिव नोन्ननाम कुचयुगलम् ॥ १० ॥

अहमस्थाननखक्षतविक्षततनुवल्लरी परं तेन।
गुप्तिं कथं करिष्ये विदग्धजनसंगमेऽङ्गानाम् ॥ ११ ॥
उक्त्वेति वाररमणी निखिलनिशीथप्रजागरोद्विग्ना।
क्षोणीं निरीक्षमाणा वैलक्ष्येण क्षणं तस्थौ ॥ १२ ॥

तामवदत्कङ्काली सस्मितवदना विटङ्कदंष्ट्राभिः।
भोगोद्भवे विटानां मनोरथं पाटयन्तीव ॥ १३ ॥
एवंविधैव मुग्धे परिशीलितहट्टचेटकटुकानाम्।
प्रौढिः कण्टकतीक्ष्णा भवति परं पण्यजीवनशिशूनाम् ॥ १४ ॥
पितृभवनहृतं नियतं हस्तगतं विद्यते धनं तस्य।
भवति न तद्विधमधिकं प्रागल्भ्यं रिक्तहस्तस्य ॥ १५ ॥
बिलनिहितद्रविणकणश्चपलगतिर्मूषकोऽप्यलं प्लवते।
दानक्षीणस्तन्द्रीं सुषिरकरः कुञ्जरो भजते ॥ १६ ॥
विटविनिवारणयुक्त्या निर्मक्षिकमाक्षिकोपमं सहसा।
गत्वा करोमि तावत्तवोपजीव्यं वणिक्तनयम् ॥ १७ ॥

अस्माकमङ्गमङ्गं पण्योपनतं महाधननिधानम्।
दासीसुताः किमेते खादन्ति विटाः प्रसङ्गेन ॥ १८ ॥
इत्युक्त्वा तूर्णतरं शय्याभवनस्थितं समभ्येत्य।
शिशुमवदत्कङ्काली विजनकथाकेलितन्त्रेण ॥ १९ ॥

अपि पुत्र रात्रिरखिला सुखेन ते कुमुदहासिनी याता।
बन्धनयोग्योऽस्माकं कलावतीहृदयचोरस्त्वम् ॥ २० ॥
ध्यानं वलनं जृम्भणमुच्छ्वसनं वेपनं परिस्खलनम्।
त्वत्संगमेऽपि यस्याः किं कुरुते निर्गते त्वयि सा ॥ २१ ॥

लङ्घिततरुणसमुद्रा कलावती यत्पटाञ्चले लग्ना।
यामर्थयते दूतैर्दक्षिणदिग्वल्लभो भोजः ॥ २२ ॥
जन्मान्तरेऽनुबद्धा यदि नेयं संगतिः कृता विधिना।
तत्किं त्वयि मम जाता परलोके पुत्रकार्याशा ॥ २३ ॥

विघ्नस्तु संगमेऽस्मिन्नेकः परिचिन्तितोऽस्ति मे भयदः ।
यदयं विटसंघातः कण्टकजालायते परितः[1] ॥ २४ ॥
भुक्त्वा पीत्वा भवतः परधनवर्णाः स्ववित्तपरिहीणाः ।
धूर्तास्त्वामेव पितुर्बन्धनयोग्यं प्रयच्छन्ति ॥ २५ ॥
तस्माद्यदि दिनमेकं तिष्ठसि सुतरामदृश्यरूपस्त्वम् ।
तदयं कुटिलविटानां नैराश्याद्भिद्यते यूथः ॥ २६ ॥
इत्युक्ते कुट्टन्या शैशवसरलाशयो वणिक्सूनुः ।
तामवदत्सत्यमिदं स्नेहान्मातस्त्वया कथितम् ॥ २७ ॥
अस्ति ग्रन्थिनिबद्धं मम किंचिज्जनकभाण्डशालात्तम् ।
तदिदं गृहाण दुहितुर्मण्डनभोगव्यये योग्यम् ॥ २८ ॥
इत्युक्त्वा सारतरं दत्त्वा तस्यै शिशुर्गुरुद्रविणम् ।
तत्संदर्शितमविशच्छन्नपथं पृथुलहर्म्यतलकोष्ठम् ॥ २९ ॥
तं प्रच्छाद्य सहर्षा कृत्वा मिथ्या मुखं नवविषादम् ।
अभ्येत्य विटानवदत्कङ्काली कलकलारम्भे ॥ ३० ॥
आजन्मसहजसुहृदामस्मत्प्रणयोपचारतुष्टानाम् ।
उचितः किमयमकस्माद्भवतां निन्द्यः समाचारः ॥ ३१ ॥
दस्युसुतस्तीक्ष्णतरः स भवद्भिः किं वणिक्सुतव्याजात् ।
रत्नाभरणाकीर्णं प्रवेशितोऽस्मद्गृहं रात्रौ ॥ ३२ ॥
अन्यगणिकाप्रयुक्ता यदि यूयं प्रहसनोद्यताः प्रसभम् ।
तत्किं स्त्रीवधसदृशं क्रियते पृथुसाहसं पापम् ॥ ३३ ॥
स परं प्रभातनिद्रालवविवशायां क्षणं कलावत्याम् ।
आदाय हारसहितं केयूरयुगं गतः कामी ॥ ३४ ॥
श्रूयन्ते प्रतिनगरं भूषणलुब्धैः पणाङ्गना निहताः ।
निजदेवताप्रसादात्कलावती किं तु मुक्ताद्य ॥ ३५ ॥
तेन यदेतन्नीतं राजकुले कस्य मूर्ध्नि परिपतति ।
प्रतिभूर्भवद्विधानां क्व गृहीतः पण्यललनाभिः ॥ ३६ ॥

---

१. 'पुरतः' इति पाठः.

पश्यत पश्यत लोकाः कलिकालः कीदृशः प्रवृत्तोऽयम् ।
स्निग्धाः सुहृदः सधनाः स्त्रीवधपापं भजन्ते यत् ॥ ३७ ॥
को वेत्ति गुणविभागं हस्तेन परीक्ष्यते कथं जातिः ।
दुर्ज्ञेयं कुटिलानां चेष्टितमन्यद्वचश्चान्यत् ॥ ३८ ॥
इत्युक्त्वा गृहपरिजनकलकलहोदग्रदुःसहविकारा ।
कङ्काली राजपथे चुक्रोश गतागतस्तारम् ॥ ३९ ॥
तद्भीत्यैव विटास्ते सपदि विवर्णा निरुत्तरप्रतिभाः ।
निर्गत्योत्पथविवरैर्दूरतरे संगमं चक्रुः ॥ ४० ॥
अथ ते विचार्य सुचिरं भोगभ्रष्टाः समापतितकष्टाः ।
मिथ्यापवादनष्टा विफलक्लिष्टा मिथो जगदुः ॥ ४१ ॥
जाताक्षपटलदोषैरिव नास्माभिर्व्रजन्वणिग्दृष्टः ।
कङ्काल्यैव हृतोऽसावित्यवदन्निर्गुटस्तत्र ॥ ४२ ॥
राशिं निगूह्य वणिजं पश्यत भूर्जेन निग्रहोऽस्माकम् ।
कुट्टन्यैव कृतोऽयं.........शोचन्नब्रवीद्विविरः ॥ ४३ ॥
विहिताङ्गहारयुक्तिः कुट्टन्या पूर्वरङ्गयोग्योऽयम् ।
अस्मन्नृत्तं वृत्तं किमन्यदिति नाट्यवित्प्राह ॥ ४४ ॥
कपटतुलां कङ्कालीमङ्कशताङ्कामहं वेद्मि ।
विहितस्तया भ्रमोऽसावित्याह तुलाधरः कोपात् ॥ ४५ ॥
आकृष्य मेषभोगाद्दूरतरं मित्रमण्डलं वणिजः ।
कालकलयेव नीतं कङ्काल्या गणक इत्यूचे ॥ ४६ ॥
पेया मद्यसमृद्धिस्तयैव सा कृतचिकित्सायाम् ।
लङ्घनमिदमुपदिष्टं तापादित्यब्रवीद्वैद्यः ॥ ४७ ॥
नवसुखचरितं नष्टं कष्टं विभ्रष्टनियमवृत्तानाम् ।
अस्माकमेतदनुपमगित्याह कविः श्वसन्विरसः ॥ ४८ ॥
इति दुःखकोपविस्मयलज्जाकुलिताः कथां मिथः कृत्वा ।
कुसुमारामभ्रष्टा इव मधुपास्ते विटाः प्रययुः ॥ ४९ ॥

अथ कङ्काली गूढं निःशल्यां कामभोगसामग्रीम् ।
आस्वाद्य निशामनयन्निःशब्दमहोत्सवोत्साहा ॥ ९० ॥
प्रातर्विचिन्त्य युक्तिं सा गत्वा हट्टभाण्डशालाग्रम् ।
कामिजनकस्य वणिजः स्फीतार्थसमृद्धिमद्राक्षीत् ॥ ९१ ॥
सोऽपि महाधनसंचयलाभविशेषेऽपि सद्ग्राहः ।
पुत्रहृतहेमचिन्तासंतापात्कातरतरोऽभूत् ॥ ९२ ॥
उन्नतवृसीनिविष्टः कोटित्रयलेख्यसंपुटीहस्तः ।
अर्थिजनवदनदर्शननमीलितनयनप्रसक्तसततान्ध्यः ॥ ९३ ॥
बन्धादिमोक्षणागतलाभपरित्यागयाचने बधिरः ।
अत्यल्पपण्यदानप्रश्नप्रतिवचनजल्पने मूकः ॥ ९४ ॥
तैलमलकललमूषकजग्धार्धटुण्पिकाविकटः ।
शीर्णोर्णाप्रावरणप्रलम्बघनकञ्चुकाञ्चलालोलः ॥ ९५ ॥
नग्नोरुजानुजर्जरधूमारुणपृथुलशिथिलमोचोटः ।
रूक्षश्मश्रुकलापस्थूलप्रचलच्छटुम्पकग्रन्थिः ॥ ९६ ॥
निजगृहदिवसपरिव्यययाच्ञागतकन्यकाप्रहारोग्रः ।
रज्जुग्रथितबुभुक्षितमार्जारीरावनिर्दयप्रकृतिः ॥ ९७ ॥
दूराद्वितर्क्यमाणः स तया नासार्पिताङ्गुलीलतया ।
ख्यातः स एव वणिगयमिति विदधे निश्चितं तस्य ॥ ९८ ॥
साथ शनैरुपसृत्य प्रविरलजननिर्मलावसरे ।
तमभाषत भाण्डपते वक्तव्यं किंचिदस्ति मम विजने ॥ ९९ ॥
पुत्रस्ते मुग्धमतिर्मृगशिशुरिव लुब्धकैर्विटैः कृष्टः ।
हारितभूषणवसनः संध्यायां ह्यो मया दृष्टः ॥ ६० ॥
दयया प्रवेशितोऽसौ मया स्वगेहं मनोहराकारः ।
अविशत्क्षणं न जाने केन पथा मत्सुताहृदयम् ॥ ६१ ॥
स तया स्नानानन्तररुचिराम्बरभूषणार्पणप्रणयैः ।
राजार्हविविधभोगैः काम इवाभ्यर्चितो भक्त्या ॥ ६२ ॥

वंशजगौरवयोगात्सुवृत्तताश्लाघ्यरूपसंभारः ।
कण्ठे हार इवासौ कृतस्तया गुणगणोदारः ॥ ६३ ॥
कायपणार्जितबहुविधराजसुतामात्यबहुधनेन सह ।
अधुना त्वत्तनयोऽस्याः स्वामी प्राग्जन्मसंबन्धात् ॥ ६४ ॥
उचिततरसङ्गसुभगां [दृष्ट्वैव] कलावतीं रागयौवनोन्मत्ता ।
तव हस्ते निक्षिप्तं स्त्रीधनसहितं मया गेहम् ॥ ६५ ॥
यातायां मयि तीर्थं कंचित्कालं त्वया कलावत्याः ।
मुद्रामुद्रितमखिलं सर्वस्वं पालनीयं तत् ॥ ६६ ॥
अद्य तु भवता कार्यः पुत्रस्नेहात्स्नुषानुरोधाच्च ।
अस्मद्गेहे स्वल्पो भोज्योत्सवमङ्गलाचारः ॥ ६७ ॥
उक्त्वेति साश्रुनयना कङ्काली तस्य वज्रहृदयस्य ।
निपपात चरणयुगले सुतलाभविशेषतुष्टस्य ॥ ६८ ॥
स च तामुवाच भद्रे सर्वमिदं हर्षकारि कुशलतरम् ।
किं तु त्वद्गमनं मे नाभिमतं सह गमिष्यावः ॥ ६९ ॥
परभोजननियमवता भोक्तव्यं त्वद्गृहे कथं नु मया ।
संभोजनमूल्यं मे गृह्णासि तदा गमिष्यामि ॥ ७० ॥
इत्युक्त्वास्या हस्ते दत्त्वा हृष्टः स रूपकं सार्धम् ।
तामन्तः स्मितवदनां विसृज्य पश्चाद्ययौ भोक्तुम् ॥ ७१ ॥
तत्र सुतं सविलासं दृष्ट्वा कान्तासनाथसंभोगम् ।
निर्व्ययभोज्यसमृद्ध्या निश्चिन्तः प्रीतिमानभवत् ॥ ७२ ॥
कर्पूरैलापरिमलरसवासितविविधभोजनं भुक्त्वा ।
पीत्वा च भूरि मद्यं जगाद लुब्धः स कङ्कालीम् ॥ ७३ ॥
सततं दिनव्ययं वः सर्वमहं समुचितं प्रदास्यामि ।
एवंविधस्तु न पुनः कार्यः स्थूलव्ययारम्भः ॥ ७४ ॥
इत्युक्त्वा स गृहं निजमगमद्गगनस्थलीकृषिकृताशः ।
लाभप्रदर्शनं किल लुब्धधियां वञ्चनोपायः ॥ ७५ ॥

अन्येद्युर्दिवसव्ययमानेतुं कुटिलचेतसस्तस्मात् ।
चित्तग्रहणाय निजां विससर्ज कलावती दासीम् ॥ ७६ ॥
सुचिरात्समेत्य दासी शरावचञ्चत्सहिङ्गुकणभूर्जा ।
हस्तेन विस्फुटन्ती कलावतीं सस्मितामवदत् ॥ ७७ ॥
श्वशुरेण ते महार्घः प्रहितोऽयं भूरिभोज्यसंभारः ।
उत्तिष्ठ कुरु विभागं निमन्त्र्यतां बन्धुवर्गश्च ॥ ७८ ॥
तैलस्य तोलकमिदं तोलकयुगलं च चूर्णलवणस्य ।
दत्त्वा मामिदमूचे भ्रुकुटीकुटिलाननः स परम् ॥ ७९ ॥
तैलमिदं लवणमिदं शाकाय श्वेतिकाद्वयं दत्तम् ।
वेश्यायाः किं कामी ददाति दिवसव्यये लक्षम् ॥ ८० ॥
इत्युक्त्वा तत्प्रहितं दासी संदर्श्य थूत्कृतं बहुशः ।
क्षिप्त्वा दूरे तन्मुखदर्शनमलिनां निनिन्द दृशम् ॥ ८१ ॥
अन्येद्युः कङ्काली विचिन्त्य तद्वञ्चने सुखोपायम् ।
प्रययौ कृत्वा विजने कलावतीं विदितवृत्तान्ताम् ॥ ८२ ॥
सा वर्णमानमुद्रासदृशसमुद्गद्वयं विधाय नवम् ।
एकस्मिन्नाभरणान्यन्यस्मिन्नुपलखण्डिकां विदधे ॥ ८३ ॥
स्थूलतरतूलपटिकाप्रावरणं प्राप्य भाण्डशालाग्रम् ।
सा कक्षाञ्चलसंवृतसमुद्गयुगलावदद्वणिजम् ॥ ८४ ॥
वाराणसीप्रयाणे नक्षत्रं क्षिप्रकृन्ममोपनतम् ।
नास्ति पुनर्वसुनातरदर्शनमात्रं त्वयि गतायाम् ॥ ८५ ॥
इदमाभरणं सर्वं समुद्गकन्यस्तमस्ति रत्नाङ्कम् ।
स्त्रीबालधनं भवता प्राणसमं सर्वथा रक्ष्यम् ॥ ८६ ॥
इत्युक्त्वा तत्सर्वं संदर्श्य पुनः सुमुद्रितं कृत्वा ।
निक्षिप्य पुरः प्रचुरं सा तमवादीत्सहेलैव ॥ ८७ ॥
पाथेयमतः पृष्ठाल्लाभे न ममोपयुज्यते लक्षम् ।
त्वं दातुमर्हसि सखे देवालयधान्यभुक्तिसंशोध्यम् ॥ ८८ ॥

---

१. वराटकद्वयमित्यर्थः.

इति लीलया ब्रुवाणा समुद्गयुगलस्य विनिमयं कृत्वा ।
लक्षं क्षणाद्गृहीत्वा जगाम निजवेश्म कङ्काली ॥ ८९ ॥
अथ निर्वर्तितकृत्यां ज्ञात्वा तामागतां वणिग्भवनात् ।
शङ्खसुतं हर्म्यगता प्रोवाच कलावती विजने ॥ ९० ॥
त्वयि मे हृदयमकस्मादन्तः सक्तं बलान्न निर्याति ।
त्वं तु धनवान्विवाहं करिष्यसीत्येव मे शङ्का ॥ ९१ ॥
दिनरमणीयः पुंसां जन्मजघन्यस्तु गेहिनीसङ्गः ।
तदपि विवाहे मोहादविचारतरादराः पशवः ॥ ९२ ॥

नित्यप्रसूतिहतसुस्थिरयौवनेषु
वेशोपचाररहितेषु मदोज्झितेषु ।
गोष्ठीविलासरसकेलिनिरादरेषु
दारेषु का स्मररुचिः कलहाङ्कुरेषु ॥ ९३ ॥
जात्यैव कामिजनरञ्जनजीवितासु
वेशोपचारनिरतासु ससौरभासु ।
कामप्रमोदममकासु सविभ्रमासु
वेश्यासु कस्य न रतिः सततस्मितासु ॥ ९४ ॥

कुरु मे प्रत्ययहेतोर्धनधारणपत्रिकां विवाहे [त्वम्] ।
विहिता सैव तवास्ते मत्तगजस्याङ्कुशशिखेव ॥ ९५ ॥
इत्युक्तः स रमण्या स्थूलतरोज्जासपत्रिकामलिखत् ।
नाम्ना विक्रमशक्तेर्नृपमहिषीभ्रातृपुत्रस्य ॥ ९६ ॥
अथ शय्याभवनगतं प्रातः स्वयमेत्य कङ्काली ।
जामातरमिदमवदन्मिथ्यैव सखेदवदनेव ॥ ९७ ॥
आसन्नयौवनस्त्वं दुहितुर्मे यौवनं त्वया प्रायः ।
क्षपितमलक्ष्यं स्त्रीणां गलति हि सहसैव तारुण्यम् ॥ ९८ ॥
स्थिरयौवनाः प्रकृत्या पुरुषाः किल तालसालसंकाशाः ।
ह्यः कन्यकाद्य तरुणी प्रातर्वृद्धा भवत्येव ॥ ९९ ॥

मासादधिकायांतं दिनद्वयं पुष्पदर्शनस्नाने ।
अद्यैव कलावत्या गर्भाशङ्काकुलं चेतः ॥ १०० ॥
यौवनविभ्रमशापस्तनुनलिनीतुहिननिकरघनपातः ।
प्रसवदिनं नारीणां पातकमुग्रं स्तनयुगस्य ॥ १०१ ॥
प्रसवहृतयौवनानामधोमुखे लज्जयेव कुचयुगले ।
भवति न पण्यवधूनां विक्रयचर्चा तृणेनापि ॥ १०२ ॥
स्थविरत्वे पुरुषाणां भवन्ति सुखजीविकाः परिज्ञानैः ।
यौवननाशे वेश्या यदि परमटति स्फुटं भिक्षाम् ॥ १०३ ॥
तस्माज्जनकाभावादविकलमापत्स्यमाननिजविभवम् ।
अधिकरणपत्रलिखितं प्रयच्छ सुमते कलावत्यै ॥ १०४ ॥
इत्युक्ते कुट्टन्या सोत्साहः प्रीतये वणिक्तनयः ।
आपत्स्यमानमखिलं प्रददौ हृष्टः कलावत्यै ॥ १०५ ॥
अथ शिथिलादरया[स]द्वित्रैर्दिवसैः समेत्य कङ्काल्या ।
कृतसंकेतः कङ्कः········श्रुत्यै कलावतीमूचे ॥ १०६ ॥
अयि रागदग्धहृदये कलावति व्रतवतीव कस्य त्वम् ।
एष त्वामर्थयते ठक्कुरपुत्रो रणविलासः ॥ १०७ ॥
देवगृहगञ्जदिविरस्तव सततप्रार्थनानुबन्धेन ।
पदमुक्तिधन्यकाले गणयति चण्डं मकरगुप्तः ॥ १०८ ॥
अद्यापि महामात्यः सत्यरथस्त्वत्कृते समर्घदिने[1] ।
प्रहिणोति वस्त्रयुगलं न च प्रसादस्त्वयास्य कृतः ॥ १०९ ॥
प्रेक्षणके त्वां दृष्ट्वा साहसराजेन राजपुत्रेण ।
त्वद्गत[स]रभसमनसा वासवसेनावरुद्धिका त्यक्ता ॥ ११० ॥
विरजसि वयसि नवेऽस्मिन्नेकश्चेदीप्सितस्तव स्वामी ।
तत्किं यौवनभङ्गे ददाति कश्चिद्धनं मुग्धे ॥ १११ ॥
याभिर्यौवनसमये रागेण धनार्जनं परित्यक्तम् ।
ता एताः पर्यन्ते भस्माङ्कचश्चीवरिण्यश्च ॥ ११२ ॥

१. 'ममार्घदिने' इति पाठः.

कुचकाञ्चनकलशवती नितम्बसिंहासना स्मितच्छत्रा ।
एकपुरुषोपसेव्या नूनं त्वं रतिरमणराज्यश्रीः ॥ ११३ ॥
भुक्तं मयास्य वित्तं दाक्षिण्यमिति प्रनष्टविभवेऽपि ।
मा त्वं कृथाः सुमध्ये ह्यो भुक्तं नाद्य तृप्तिकरम् ॥ ११४ ॥
दासी दासी तावद्यावत्पुरुषस्य किंचिदस्ति करे ।
क्षीणधनपुण्यराशेर्दुष्प्रापा स्वर्गनगरीव ॥ ११५ ॥
ह्यो दत्त्वार्थं कथमिव गच्छाम्यद्येति निवसते प्रायम् ।
कः कुरुते वेश्यानां तत्क्षणधनदानभोग्यानाम् ॥ ११६ ॥
इति कङ्कवदननिर्गतवचनशरैर्दारितो वणिक्तनयः ।
निश्चेष्टः क्षणमभवद्वैलक्ष्याद्वीक्ष्यमाणः क्ष्माम् ॥ ११७ ॥
अथ शूलबन्धुनिधनव्यसनाद्यङ्गप्रसङ्गकथनाद्यैः ।
शय्यावहारमकरोत्कलावती शङ्खतनयस्य ॥ ११८ ॥
अद्य व्रतनियमो मे दुःस्वप्ननिरीक्षणात्परं मातुः ।
षष्ठीप्रजागरेऽद्य च राजकुले तत्र मे शय्या ॥ ११९ ॥
अद्य वयस्यासूनोश्चूडाकरणं मृगाङ्कदत्तस्य ।
इत्यादिभिरपदेशैः सा प्रययौ कामिनां भवनम् ॥ १२० ॥
त्वरिता ततः प्रभाते कदाचिदभ्येत्य कम्पविकलाङ्गी ।
कङ्काली शङ्खसुतं जगाद भयसंभ्रमार्तेव ॥ १२१ ॥
उत्तिष्ठ पुत्र तूर्णं व्रज दत्त्वा शिरसि किंचिदविभाव्यम् ।
अस्मत्कृतेऽद्य यूनोः सपत्नकलहे वधो वृत्तः ॥ १२२ ॥
नगरपतिर्विषमतरः कलावती मित्रमन्दिरं याता ।
त्वं तु वणिक्सुत साधुर्धनगन्धे धावति क्ष्मापः ॥ १२३ ॥
तूलपटीं त्यज पृष्ठाद्गृहाण तूस्तीं (?) वरट्टमालातः ।
को जानीते वर्त्मनि किं कुरुते कः परिज्ञाय ॥ १२४ ॥
इत्युक्ते कङ्काल्या मिथ्यैव विशल्यवेश्मकरणाय ।
कृत्वा तदुक्तमखिलं पङ्कः प्रययौ कुमार्गेण ॥ १२५ ॥

वेश्यालताः सरागं पूर्वं तदनु प्रलीनतनुरागम् ।
पश्चादपगतरागं पल्लवमिव दर्शयन्ति निजचरितम् ॥ १२६ ॥

इति समयमातृकायाः कङ्काल्या बुद्धिसंविभागेन ।
भुक्त्वा वणिजः सकलं कलावती पूर्णविभवाभूत् ॥ १२७ ॥

इति बहुभिरुपायैः कुट्टनी कामुकानां
कृतसुकृतविहीना वञ्चनां सा कृतघ्ना (?) ।
वनभुवि मृगबन्धं हन्त पश्यन्ति नित्यं
तदपि हरिणशावाः कूटपाशं विशन्ति ॥ १२८ ॥

समयेन मातृका सा कृत्रिमरूपा कृता कलावत्या ।
तन्नाम्नैव निबन्धः क्षेमेन्द्रेण प्रबन्धोऽयम् ॥ १२९ ॥

इति श्रीक्षेमेन्द्रकृतायां समयमातृकायां कामुकप्राप्तिर्नामाष्टमः समयः ।

---

सालंकारतया विभक्तिरुचिरच्छाया विशेषाश्रया
वक्रा सादरचर्वणा रसवती मुग्धार्थलब्धा परम् ।
आश्चर्योचितवर्णनानवनवास्वादप्रमोदार्चिता
वेश्या सत्कविभारतीव हरति प्रौढा कलाशालिनी ॥ १ ॥

संवत्सरे पञ्चविंशे पौषशुक्लादिवासरे ।
श्रीमतां भूतिरक्षायै रचितोऽयं स्मितोत्सवः ॥ २ ॥

अद्रिच्छिद्रविनिद्ररौद्रफणिनामत्रास्ति कालं कुलं
मत्तास्तत्र वसन्ति दन्तिपतयः सिंहाश्रयेयं गुहा ।

---

१. तद्देशप्रसिद्धे लौकिकाब्दे. अर्थात् १०५० मिते खिस्ताब्दे क्षेमेन्द्रेण समयमातृका प्रणीता. गतकलिवर्षेषु पञ्चविंशतिरहितेषु शतभक्तेषु यदवशिष्यते, स एव लौकिकाब्दः. तस्यैव सप्तर्षिसंवत्सरशास्त्रसंवत्सरादिनाम्ना काश्मीरादिषु पर्वतदेशेषु व्यवहारः. राजतरङ्गिणीकर्तापि प्रायो लौकिकाब्देन व्यवहरति. 'कलेर्गतैः सायकनेत्रवर्षैः सप्तर्षिवर्यास्त्रिदिवं प्रयाताः । लोके हि संवत्सरपत्रिकायां सप्तर्षिमानं प्रवदन्ति सन्तः ॥' इति कस्यचित्पद्यम्. पञ्चविंशतिरहितः कलिगताब्दगणः सप्तर्षिसंवत्सरो भवति, तत्र शतसंख्यया भजनं तु केवलमङ्कसंकोचार्थमिति ज्ञेयम्.

इत्यार्तिप्रतिबद्धवृद्धशबरी वर्गेण मार्गाग्रगा
यद्वैरिप्रमदाः सदा वनमहीगाढग्रहे वारिताः ॥ ३ ॥
वीरस्यार्तदयाविधेयमनसः शीलव्रतालंकृते-
र्निस्त्रिंशः परदारकृज्जयविधौ यस्यैककार्यः सुहृत् ।
तस्यानन्तमहीपतेर्विरजसः प्राज्याधिराज्योदये
क्षेमेन्द्रेण सुभाषितं कृतमिदं सत्पक्षरक्षाक्षमम् ॥ ४ ॥

**इति श्रीक्षेमेन्द्रकृता समयमातृका समाप्ता ।**

KÂVYAMÂLÂ. 17.

# THE UNMATTA-RÂGHAVA

OF

# BHÂSKARA BHATTA.

EDITED BY

PANDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1889.

*Price 2 Annas.*

(*Registered according to Act XXV. of 1867.*)
( All rights reserved by the Publisher. )

काव्यमाला. १७.

श्रीभास्करकविविरचितं

# उन्मत्तराघवम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम् ।

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८८९

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यं २ आणकाः ।

# काव्यमाला।

## श्रीमद्भास्करकविविरचितम्

## उन्मत्तराघवम्[1]।

कला चान्द्री शंभोः प्रणयकलहप्रापितरुषः
प्रणामे पार्वत्याः पदकमललाक्षापरिचिता।
श्रियै भूयादस्या वदनशशिनः कोपकलुषा-
त्प्रसादेनारुण्यं विनिमयवशेनेव दधती॥ १॥

(नान्द्यन्ते)

**सूत्रधारः**—(नेपथ्याभिमुखमवलोक्य।) आर्ये, इतस्तावत्।

(प्रविश्य।)

**नटी**—अज्ज, इअं म्हि। को णिओओ आणवेदु। (क)

**सूत्रधारः**—अद्य खल्वादिष्टोऽस्मि विमलतरनिजकीर्तिकर्पूरकरण्डीकृतनिखिलब्रह्माण्डेन दिगन्तदन्तावलकुम्भमण्डलमण्डनायमानप्रतापसिन्दूरेण सकलकलाकलापकोविदेन विद्यारण्यश्रीचरणारविन्दवन्दनमहोत्सवमिलितेनामुना सामाजिकेन, यथा—

---

१. अयं ग्रन्थस्तञ्जोरप्रदेशवर्ति'पल्मर्नेरी'नगराच्छ्रीसुब्रह्मण्यशास्त्रिभिः स्वदेशलिपितो देवनागरलिप्यां परिवर्त्य प्रहितः. अधस्तनी भूमिका च तैरेव लिखितेति परमनुगृहीता वयम्, काव्यमालानुग्राहकाः सहृदयाश्चेति शिवम्॥

'भो भोः काव्यमालासंपादका विद्वन्मुकुटमणिवराः, अतिदुर्लभमिदं महाकविश्रीभास्करविरचितमतिप्राचीनमुन्मत्तराघवं नाम प्रेक्षाणकं मया कुहचनातिमहता प्रयासेन संपाद्य श्रीमतामन्तिकं सकुतुकं प्रेषि। अल्पमपीदमनल्पगुणनिरन्तरतया सुतरां सहृदयहृदयमुल्लासयेदित्येव ममाशयः। तदधुना मुकुन्दानन्दभाणमुद्रणसमन्तरमेवैतन्मुद्रणविषये मय्यनुग्रहबुद्धिः श्रीमद्भिः कार्येति प्रार्थना॥

इति सहृदयसमुदायविधेयः

**सुब्रह्मण्यशास्त्री।'**

---

(क) आर्य, इयमस्मि। को नियोग आज्ञापयतु।

उन्मत्तराघवं नाम यत्प्रेक्षाणकमुक्तवान् ।
भास्करः कृतिनां मान्यस्तत्त्वयाद्य निरूप्यताम् ॥ १ ॥

इति । तदादिश्यतां प्रयत्नः ।

**नटी**—(सविमर्शम् ।) बहुविण्णाणकुसलो क्खु एसो सभाजणो । कहं से हिअअं आवज्जिदुं सक्खिअदि । (क)

**सूत्रधारः**—मा मैवं वक्तव्यम् । विशेषज्ञानामेव गुणग्राहिता नैसर्गिकी । अतस्ते सुखमावर्जनीयाः । शृणु ।

विज्ञानविशदमेव हि चेतः सुजनस्य शक्यते हर्तुम् ।
परिशुद्धमेव लोहं सुतरां कर्षत्ययस्कान्तः ॥ ३ ॥

**नटी**—होदु । जं अणन्तरकरणिज्जं तं अज्जो णिरूवेदु । (ख)

**सूत्रधारः**—नन्विदानीं वर्तते वसन्तसमयः । तथा हि ।

माकन्दालिं मलयपवना मन्दमान्दोलयन्ते
मज्जत्यस्या मधुकरयुवा मञ्जरीणां मरन्दे ।
आसेवन्ते मुकुलनिकरानासमन्तादशोका
वक्तुं मत्ताः पिकयुवतयः पञ्चमं प्रारभन्ते ॥ ४ ॥

देवि, तत्समयोचितं किंचिद्गीयताम् ।

**नटी**—(गायति ।)

जस्स हि महू अमच्चो दक्खिणपवणो वरूहिणीणाहो ।
पिअभमराणुअरो सो जेदु चिरं वम्महो राओ ॥ ५ ॥ (ग)

**सूत्रधारः**—साधु गीतम् । (अन्यतोऽवलोक्य ।) आर्ये, इतः पश्य ।

मनोहराणामपि मञ्जरीणां विहाय जालानि विशेषलिप्सुः ।
लतान्तराण्येति मधुव्रतालिः सीता यथेयं कुसुमेषु लोभात् ॥ ६ ॥

(इति निष्क्रान्तौ ।)

**प्रस्तावना ।**

---

(क) बहुविज्ञानकुशलः खल्वेष सभाजनः । कथमस्य हृदयमावर्जयितुं शक्यते ।

(ख) भवतु । यदनन्तरकरणीयं तदार्यो निरूपयतु ।

(ग) यस्य हि मधुरमात्यो दक्षिणपवनो वरूथिनीनाथः ।
प्रियभ्रमरानुचरः स जयतु चिरं मन्मथो राजा ॥

(ततः प्रविशति पुष्पावचयं नाटयन्ती सीता सखी च ।)

**सखी**—हला जाणइ, अग्गदो एव्व कुसुमाइं दीसन्दि । किं अण्णदो दिण्णदिट्ठी गच्छसि । (क)

**सीता**—हला महुअरिए, इदो वि पुरट्ठिदे काणणन्तरे मणोहराइं कुसुमाइं दीसन्दि । ता अहिलासेण गच्छम्मि । (ख)

**मधुकरिका**—हला जाणइ, दाणिं वि अम्हाणं अपरिचिदो पदेसो । काणणेसु सावाणुग्गहसमत्था इसिणो चिट्ठन्ति । अदो जस्सिं कस्सिं वि अस्समे कुसुमेसु गहिदेसु जो को वि कुप्पइ । रामभद्दो वि तुह पिअं कादुं कणअमिअं गेण्हिअ मिअआवावारादो दाणिं एव्व णिवट्टिस्सदि । ता एत्तिएहिं कुसुमेहिं णिवत्तेमो । (ग)

**सीता**—सव्वजणसाहारणाइं क्खु वणलदाइं फलपुप्फमूलाइं णईजलाइं अ । अदो किंणिमित्तं जो को वि कुप्पादि । (पुष्पभाजनं विलोक्य ।) अज्जउत्तस्स देव्वच्चणोपजुत्ताइं कुसुमाइं पज्जत्ताइं । इदो पुरट्ठिदे काणणन्तरे मणोहराइं कुसुमाइं अहिगेण्हिअ उडअं गच्छम्हो । (घ)

(इत्युभे प्रस्थिते ।)

---

(क) सखि जानकि, अग्रत एव कुसुमानि दृश्यन्ते । किमन्यतो दत्तदृष्टिर्गच्छसि ।

(ख) सखि मधुकरिके, इतोऽपि पुरःस्थिते काननान्तरे मनोहराणि कुसुमानि दृश्यन्ते । तस्मादभिलाषेण गच्छामि ।

(ग) सखि जानकि, इदानीमप्यस्माकमपरिचितः प्रदेशः । काननेषु शापानुग्रहसमर्था ऋषयस्तिष्ठन्ति । अतो यस्मिन्कस्मिन्नप्याश्रमे कुसुमेषु गृहीतेषु यः कोऽपि कुप्यति । रामभद्रोऽपि तव प्रियं कर्तुं कनकमृगं गृहीत्वा मृगयाव्यापारादिदानीमेव निवर्तिष्यते । तस्मादेतावद्भिः कुसुमैर्निवर्तावहे ।

(घ) सर्वजनसाधारणानि खलु वनलताः फलपुष्पमूलानि नदीजलानि च। अतः किंनिमित्तं यः कोऽपि कुप्यति । आर्यपुत्रस्य देवार्चनोपयुक्तानि कुसुमानि पर्याप्तानि । इतः पुरःस्थिते काननान्तरे मनोहराणि कुसुमान्यभिगृह्योटजं गच्छावः ।

**सीता**—(सदृष्टिक्षेपम् ।) हला, इदो भमरो किंणिमित्तं संभमन्तो देसु देसु लदाविडवेसु कुसुमकोडरेसु आलुठन्तो परिब्भमइ । (क)

**मधुकरिका**—(विभाव्य ।) हला, मअरन्दपाणणिच्चलपक्खदाए पल्लवन्तरिदं इमं सहअरिं भमरिं अवेक्खन्तो अविलोअणवेअणाए णूणं उम्मत्तो संवुत्तो । (ख)

**सीता**—(विलोक्य ।) हला, साहु लक्खिदं तुए । (ग)

**मधुकरिका**—अम्हहे । सविसेसं परिब्भमन्तो वि एसो सहअरिं ण पेक्खदि । (घ)

**सीता**—महुअरिए, संजोजेहि णं । (ङ)

**मधुकरिका**—इमिणा सहआरदण्डेण मञ्जरिं ताडिअ मअरन्दपाणणिच्चलं भमरिं उड्डावेमि । (तथा कृत्वा ।) अम्हहे । मञ्जरीए उड्डिदाए ताए सहअरीए संगदो इमो महुअरो माहवीमण्डवं अहिरुहिअ महुरसं पिबन्तो सुहं वट्टइ । (वनान्तरं विलोक्य सावेगम् ।) कहिं गदा जाणई । (पुनर्विलोक्य ।) अम्हहे । ण कस्सिं वि दीसइ । (वनान्तरं प्रविश्य सर्वत्रान्विष्यन्ती ।) अम्हहे । इअं मणोहराकिदी का वि हरिणी सिणिद्धाए दिट्ठिए मं पेक्खिअ णिस्सरन्तेहिं णअणसलिलेहिं सहीसिणेहं सूअअदि । मह हिअअं वि एदस्सिं चिरपरिचिदं विअ विस्सद्धं होदि । अहवा इमाए जणणन्तरसहीए होदव्वम् । (इति ससंभ्रमं परिभ्रमन्ती सविमर्शम् ।) एत्थ महेसिणो असमप्पहावादो दुट्ठमिआणं संचारो णत्थि । ता कहिं पत्थिदा जाणइत्ति मे अच्चरिअं होदि । (निःश्वस्य ।) मन्दभाइणी अहं खु । मिअआवावारादो णि-

---

(क) सखि, इतो भ्रमरः किंनिमित्तं संभ्रमंस्तेषु तेषु लताविटपेषु कुसुमकोटरेष्वालुठन्परिभ्रमति ।

(ख) सखि, मकरन्दपाननिश्चलपक्षतया पल्लवान्तरितामिमां सहचरीं भ्रमरीमप्रेक्षमाणोऽविलोकनवेदनया नूनमुन्मत्तः संवृत्तः ।

(ग) सखि, साधु लक्षितं त्वया ।

(घ) आश्चर्यम् । सविशेषं परिभ्रमन्नप्येष सहचरीं न पश्यति ।

(ङ) मधुकरिके, संयोजयैनम् ।

उत्तस्स रामभद्दस्स कहं कहइस्सम् । रामभद्दो वि सुणिअ कीरिसं अवत्थन्तरं अणुहविस्सदित्ति वेवइ मे हिअअम् । (क)

(नेपथ्ये कलकलः ।)

**मधुकरिका**—इदो तदो वि संभमन्ता तावसजणा दीसन्ति । अदो रामभद्दो वि आअच्छदित्ति तक्केमि । (ख)

(पुनर्नेपथ्ये ।)

संमृज्यन्तां पदव्यः करधृतकलशावर्जितैस्तोयपूरैः
सिच्यन्तामासमन्तादविरलमभितः कीर्णपुष्पाः क्रियन्ताम् ।
जीवग्राहं गृहीत्वा कनकमृगमसौ जानकीप्रीतिहेतोः
संप्राप्तः काननान्तात्समधिकमहिमा सत्वरं रामभद्रः ॥ ७ ॥

अयं हि

प्रतिपदमुपयान्तं लक्ष्मणं वीक्ष्य किंचि-
द्वलितनयनकोणेनादराद्भाषमाणः ।
श्रमजललसदास्यः शोभते चापदण्डं
शिथिलितगुणबन्धं स्कन्धदेशे दधानः ॥ ८ ॥

---

(क) अनेन सहकारदण्डेन मञ्जरीं ताडयित्वा मकरन्दपाननिश्चलां भ्रमरीमुत्थापयामि। आश्चर्यम्। मञ्जर्या उत्थितया तया सहचर्या संगतोऽयं मधुकरो माधवीमण्डपमधिरुह्य मधुरसं पिबन्सुखं वर्तते। कुत्र गता जानकी। आश्चर्यम्। न कुत्रापि दृश्यते । आश्चर्यम्। इयं मनोहराकृतिः कापि हरिणी स्निग्धया दृष्टया मां दृष्ट्वा निःसरद्भिर्नयनसलिलैः सखीस्नेहं सूचयति। मम हृदयमप्येतस्यां चिरपरिचितमिव विस्रब्धं भवति । अथवानया जनमान्तरसख्या भवितव्यम् । अत्र महर्षेराश्रमप्रभावाद्दुष्टमृगाणां संचारो नास्ति । तस्मात्कुत्र प्रस्थिता जानकीति म आश्चर्यं भवति । मन्दभागिन्यहं खलु । मृगयाव्यापारान्निवृत्तस्य रामभद्रस्य कथं कथयिष्ये । रामभद्रोऽपि श्रुत्वा कीदृशमवस्थान्तरमनुभविष्यतीति वेपते मे हृदयम् ।

(ख) इतस्ततोऽपि संभ्रमन्तस्तापसजना दृश्यन्ते। अतो रामभद्रोऽप्यागच्छतीति तर्कयामि ।

**मधुकरिका**—(ससंभ्रमम् ।) अए, कणअमिअं गेण्हिअ अन्तिअत्थेण लक्खणेण किं वि मन्तअन्तो रामभद्दो एव्व आअच्छदि । अहं से मग्गं परिहरिअ चिट्ठामि । (तथा करोति ।) (क)

(ततः प्रविशति यथानिर्दिष्टः सलक्ष्मणो रामः ।)

**रामः**—वत्स, नूनमिमं कनकमृगं विलोक्य जानकी सविशेषं तुष्यति ।

**लक्ष्मणः**—वचनमात्रेण देव्याः कुतूहलं निवर्तयतस्तवायं प्रसाद एव कनकमृगलाभादपि महान्तं परितोषमापादयति ।

**रामः**—(निमित्तमभिनीय ।) वत्स, महामुनेरगस्त्यस्य सामर्थ्यादपगतसकलभये तपोवने सख्या मधुकरिकया सह वर्तमानामपि जानकीं विचिन्त्य, अपरिचितप्रदेशतया मनः शङ्काकुलमास्ते ।

**लक्ष्मणः**—प्रेमविशेषो हि प्रियजने प्रथमं प्रमादमेव चिन्तयति ।

**मधुकरिका**—(सनिःश्वासम् ।) सव्वहा जदाकदावि कहणिज्जो जेव्व सो उत्तन्तो । ता गच्छम्हि । दाणिं एव्व कहेमि । (उपसर्पति ।) (ख)

**लक्ष्मणः**—(मधुकरिकां दृष्ट्वा स्वगतम् ।) एकाकिनी दीनमुखी मधुकरिका समागच्छति । सर्वथात्याहितेन भवितव्यं देव्याः सीतायाः ।

**मधुकरिका**—जेदु महाराओ । (ग)

**रामः**—मधुकरिके, क्वास्ते जानकी ।

**मधुकरिका**—(सगद्गदम् ।) देव्व, तुम्हाणं देव्वच्चणाए उडअसमीवट्ठिदासु लदासु कुसुमाइं अवचिणोमि त्ति णिग्गदा । (घ)

---

(क) अये, कनकमृगं गृहीत्वान्तिकस्थेन लक्ष्मणेन किमपि मन्त्रयन्रामभद्र एवागच्छति । अहमस्य मार्गं परिहृत्य तिष्ठामि ।

(ख) सर्वथा यदाकदापि कथनीय एव स वृत्तान्तः । तद्गच्छामि । इदानीमेव कथयामि ।

(ग) जयतु महाराजः ।

(घ) देव, युष्माकं देवार्चनायै उटजसमीपस्थितासु लतासु कुसुमान्यवचिनोमीति निर्गता ।

**लक्ष्मणः**—देवतार्चनाकुसुमान्यवचेतव्यान्येव ।

**रामः**—(स्वगतम् ।) किमतःपरं कथयिष्यतीति कम्पते मे चेतः । (प्रकाशम् ।) ततस्ततः ।

**मधुकरिका**—मणोहराइं कुसुमाइं दीसन्दि त्ति इदं काणणन्तरं पविट्ठा जाणई अण्णेसन्दीए मए ण दिट्ठा । (क)

**रामः**—हा, हतोऽस्मि ।

ज्वलत्तुषाराग्निकणोपमानि सीता न दृष्टेति दुरक्षराणि ।
कर्णं प्रविष्टानि हठादमूनि सर्वाङ्गतापं जनयन्ति हन्त ॥ ९ ॥

कष्टम् । अतिदारुणो दैवदुर्विपाकः ।

अम्बाजनं च पितरं च सहोदरौ च
राज्यं च तानि भवनानि सबान्धवानि ।
दैवाद्विहाय विपिने वसतां तथापि
हन्तातिदुःखमविषह्यमुपागतं नः ॥ १० ॥

हा जानकि,

विरहं मम सोढुमक्षमा त्वं वनवीथीष्वपि मामनुद्रुतासि ।
अकृतागसमेनमद्य मुक्त्वा वद कुत्रासि कुरङ्गशावनेत्रे ॥ ११ ॥

**लक्ष्मणः**—(स्वगतम् ।) इममार्यः पश्यति चेदतिपीडितो भविष्यति । तदेनं प्रेषयामि । (अपवार्य ।) मधुकरिके, इममुटजं नय । अहमार्यसमीपे तिष्ठामि ।

**मधुकरिका**—(कनकमृगमादाय ।) तह । (इति निष्क्रान्ता ।) (ख)

**रामः**—

प्राणप्रियां प्राप्तवतीं कठोरामकीर्तितव्यां पदवीमकाण्डे ।
त्रैलोक्यलावण्यललामभूतां हा जानकीं कुत्र विलोकयामि ॥ १२ ॥

---

(क) मनोहराणि कुसुमानि दृश्यन्त इतीदं काननान्तरं प्रविष्टा जानकी अन्वेषन्त्या मया न दृष्टा ।

(ख) तथा ।

**लक्ष्मणः**—किमेवं खिद्यसे। इदं वनं प्रविश्यान्विष्यद्भिर्दृश्यते देवी।

**रामः**—मन्दभाग्ययोर्मम चक्षुषोरतःपरं कुतः सीतादर्शनसुखम् । तथापि प्रतिपादय ।

**लक्ष्मणः**—इत इतः ।

(उभौ परिक्रम्य वनं प्रविशतः ।)

**लक्ष्मणः**—आर्य, सिकतावति प्रदेशे स्पष्टं प्रतीयते देव्याः पदपद्धतिः।

**रामः**—(विलोक्य ।) नूनमियं प्रियायाश्चरणसरणिः । तथा हि ।

स एवाङ्गुलिविन्यासः स एव चरणक्रमः ।
तदेवाल्पप्रदेशत्वं सैव विक्षेपचातुरी ॥ १३ ॥

(निःश्वस्य ।)

प्रणतात्प्रणयापराधकाले शिरसो मे पतितैः प्रसूनजालैः ।
कृतपूजनयोर्मृगेक्षणायाः पदयोरत्र विलोकयामि मुद्राम् ॥ १४ ॥

(पदसरणिमनुसरन्, विलोक्य ।)

अश्रुबिन्दुचयमञ्जनाञ्चितं मुञ्चती प्रणयकोपनिर्गतम् ।
पाटलं विनमितं मुखाम्बुजं बिभ्रतीयमिह दृश्यते प्रिया ॥ १५ ॥

(उपसृत्य ।) प्रिये, प्रसीद प्रसीद ।

अयि मुञ्च रुषं तव प्रसन्नं जितपूर्णेन्दु मुखारविन्दमस्तु ।
प्रणतिं कलयन्नहं त्वदीयां पदलाक्षां परिपालयामि मूर्ध्ना ॥ १६ ॥

(इति तत्रस्थितां पादमुद्रां प्रणमति ।)

**लक्ष्मणः**—कष्टमार्यस्योन्माददशा वर्तते । आर्य, न जानकी । (इति मूर्धानमुन्नमयति ।)

**रामः**—(उत्थाय स्थलपद्मिनीं विलोक्य ।) मधुभरनामितप्रसूनां महीतलगलितमकरन्दपानाय कमलोदरादापतन्त्या मधुकरमालया स मे तामरुणां स्थलपद्मिनीं विलोक्य मूढोऽस्मि ।

**लक्ष्मणः**—अहो, ज्ञानाज्ञानयोः संकरः । तथा हि ।

वाक्यानि कानिचिदयुक्ततराणि वक्ति
ब्रूते च कान्यपि तथापि यथार्थवन्ति ।

आर्ये सहैव वसतस्तदबोधबोधौ

छायातपाविव तलेऽल्पदलद्रुमस्य ॥ १७ ॥

**रामः**—भवतु । एतामेव पृच्छामि ।

त्वामागतेयं पदपङ्क्तिरस्याः प्रयच्छ मे पद्मिनि पद्मवक्राम् ।

न चेत्तदीयां चरणाब्जमुद्रां प्रदर्शयान्यत्र विनिर्गतां मे ॥ १८ ॥

(विभाव्य ।) इयमपि चलितकमलमुखसंज्ञया पदपद्धतिमितः प्रयातामावेदयति ।

**लक्ष्मणः**—इतः सहकारवाटिकामुपगता पादमुद्रा ।

(उभौ चूतवाटिकामुपसरतः ।)

**लक्ष्मणः**—(स्वगतम् ।) आर्यस्य हृदयमन्यतो नयामि । (प्रकाशम् ।)

किसलयपरिपाटीं किंचिदग्रे विधुन्व-

न्प्रतिपदमुप(मनु)यातः पङ्क्तिभिः षट्पदानाम् ।

अभिनवमकरन्दानाहरन्मञ्जरीणां

मलयशिखरिजन्मा मारुतो याति मन्दम् ॥ १९ ॥

**रामः**—अये, विरहिजनवनदावानलः समीरणः ।

सर्वस्य जगतः प्राण इति त्वां ब्रुवते वृथा ।

जगदन्तःस्थितस्यैव यतो मे प्राणहारकः ॥ २० ॥

तथा हि ।

अङ्गं यदि प्रियायाः स्पृष्टं भवता शिरीषसुकुमारम् ।

तर्ह्यालिङ्ग ममाङ्गान्यपसर तूर्णं न चेत्पवन ॥ २१ ॥

(विभाव्य ।) भवतु, प्रेयसीमेव पृच्छामि ।

जगत्प्राण मम प्राणकान्ता कान्तारसीमनि ।

भ्रमता भवता दृष्टा किं सा हंसलसद्गतिः ॥ २२ ॥

अये, प्रियाया निसर्गसुरभिणा मुखमारुतेन तिरस्कृततया वैरमनुस्मरंस्तूष्णीमुपयासि ।

माकन्दपालीमकरन्दपूरे मधुव्रता मज्जनमाचरन्तः ।

मानापनोदाय मनस्विनीनां मानोभवं मन्त्रमुदीरयन्ति ॥ २३ ॥

अपि च।

माकन्दवृन्दमकरन्दजलेषु मग्ना
धृत्वा च पङ्कजरजांसि मधुव्रतालिः।
मानापनोदनफलाय मनस्विनीनां
मन्त्रानुदीरयति मन्मथदेवताकान् ॥ २४ ॥

किं [च] निरन्तरमधुरसास्वादमत्तानाममीषां वचनमप्रमाणमेव । अत प्रियागतिर्न प्रष्टव्या। (पदान्तरमभिनीय कर्णं दत्त्वा।) वत्स,

सरोजनेत्रा सहकारवीथ्यां नवप्रवालान्तरिता प्रिया मे।
अव्यक्तवर्णं किमपि ब्रुवाणा समुत्सुकं मे हृदयं तनोति ॥ २५ ॥

**लक्ष्मणः**—(स्वगतम्।) कोकिलालापमाकर्ण्य भ्रान्तो नूनमार्यः।

**रामः**—अये, प्रियालाप इव श्रूयते नाकृतिस्तु दृश्यते। अत प्रार्थयामि।

चेतसः सपदि जीवनौषधं नेत्रयोरमृतवर्तिकाञ्जनम्।
मन्मथज्वरमहारसायनं दर्शयस्व दयिते तवाकृति(नन)म् ॥ २६

(क्षणमात्रं तूष्णीं स्थित्वा।) अयि जानकि, किमित्यौदासीन्यं भजसि।

आगत्य तूर्णमसितोत्पलरम्यनेत्रे
कण्ठं बधान मम ते भुजवल्लरीभ्याम्।
पश्चादुपेत्य निभृतं पदमर्पयन्ती
यद्वा पिधेहि नयने करपल्लवाभ्याम् ॥ २७ ॥

(इति नयने निमील्य तिष्ठति।)

**लक्ष्मणः**—(स्वगतम्।) कष्टं प्रतीकारदुःस्थे कर्मणि किं कुर्मः।

**रामः**—प्रिये, किमिति विलम्बसे। उभयोः पक्षयोरेकतरमाचर।

**लक्ष्मणः**—आर्य, एष कोकिलालापः श्रूयते। नात्र जानकी सा ज्वलति (?)।

**रामः**—(नेत्रे निमील्य पुनः कर्णं दत्त्वा।) स एवेदानीं श्रुतवीणारवस्य ढक्काध्वनिरिव कठोरतां भजति।

(लक्ष्मणोऽन्यतो दर्शयति ।)

**रामः**—(विलोक्य ससंभ्रमम् ।) वत्स, केचिदमी चोराः प्रियायाः सर्वाभरणजातमादाय मस्तके दधानाः प्रसारितबाहवो मया योद्धुमग्रतो निःशङ्कमासते । पश्य पश्य ।

मुक्ताहारच्छटामेके पद्मरागावलिं परे ।
प्रियायाः कनकाकल्पानपरे हन्त बिभ्रति ॥ २८ ॥

**लक्ष्मणः**—(स्वगतम् ।) कष्टमार्यस्य पुनरप्युन्मादः ।

**रामः**—भो भोश्चोराः, तिष्ठत । ममाग्रतः कुतो गम्यते । इदानीमेव धनुरारोप्यैकेनैव सायकेन सर्वान्वः पातयामि । (इति साटोपं परिक्रम्य धनुरारोपयति ।)

**लक्ष्मणः**—(सज्जं धनुरवलम्ब्य ।) अलमाटोपेन ।

**रामः**—वत्स, मुञ्च मुञ्च बाणं संधास्यामि । अमी पुनरत्रैव निर्भया निश्चलमासते । (इति तूणीरमुखाद्बाणमुद्धर्तुमिच्छति ।)

**लक्ष्मणः**—

निषङ्गान्निर्गते बाणे परेषां प्राणनिर्गमः ।
तदेव ज्ञायते देव संधानं किंप्रयोजनम् ॥ २९ ॥

अतः शरसंधानं विहाय विभावयत्वार्यः, नात्र चोराः ।

**रामः**—(विभाव्य ।) अहो, मे मूढा मतिः । तथा हि ।

आरक्तोऽयमशोककुड्मलचयो नो पद्मरागच्छटा
फुल्लोऽयं नवकर्णिकारनिकरो न स्वर्णभूषावलिः ।
एषा च स्फुटसिन्धुवारपटली नो मौक्तिकानां व्रजः
शाखाजालभृतस्त एव तरवो नोद्यद्भुजा दस्यवः ॥ ३० ॥

**लक्ष्मणः**—इतोऽपि लताकुञ्जेषु विभावयावः ।

**रामः**—तथा । (इति पदान्तरे स्थित्वा विलोक्य सहर्षम् ।) वत्स, दृष्टा जानकी ।

स्तनभरविनम्रमूर्तिर्मामिह चाहूय पाणिचलनेन ।
कर्णामृतैर्वचोभिः कलयति मम हृदयमाहितानन्दम् ॥ ३१ ॥

**लक्ष्मणः**—अहो, चिरमुन्मादो वर्तते ।

**रामः**—अये जानकि, एतवान्तं कालं कुत्र गतासि । (कर्णं दत्त्वा ।) किं ब्रवीषि—'आर्यपुत्रस्य प्रेमपरीक्षार्थं क्वचिल्लताकुञ्जे निगूढास्मि' इति ।

**लक्ष्मणः**—क्वास्ते जानकी ।

**रामः**—(अनाकर्णितकेन ।)

त्वदालापाः कर्णे मम नवसुधाशीकरमया-
स्तव स्पर्शोऽप्यङ्गे शिशिरशिशिरश्चन्दनरसः ।
शरज्ज्योत्स्नापूरस्तव वपुरिदं मे नयनयोः
कथं ते कल्याणि क्षणमपि सहे हन्त विरहम् ॥ ३२ ॥

**लक्ष्मणः**—आर्य, क्वास्ते जानकी ।

**रामः**—नन्वियमग्रत एवास्ते । (इति पुरोपस्थितां लतामुपसृत्य विलोक्य ।) अहो मे मोहः ।

कुसुमस्तबकानता विलोलां दधती पल्लवसंपदं मनोज्ञाम् ।
मकरन्दलिहां मधुव्रतानां कलझंकारकरम्बिता लतेयम् ॥ ३३ ॥

(पुनर्विलोक्य ।) वत्स, अस्यामेव लतायां पुष्पाण्यवचितवती जानकीति तर्कयामि । तथा हि ।

अवचितकुसुमानि तया केवलवृन्तावशेषितान्यधुना ।
पतिताः पल्लवभङ्गा लक्ष्यन्ते तत इतश्चामी ॥ ३४ ॥

**लक्ष्मणः**—एवमेतत् । पदपद्धतिरप्यविच्छिन्ना लतामिमां प्राप्ता ।

**रामः**—इतः परं कां दिशं प्रस्थितेति विलोकय ।

**लक्ष्मणः**—तथा । (इति लतां परिभ्रमन्, मणिवलयं विलोक्य, स्वगतम् ।) इदं देव्याः करपरिभ्रष्टम् । तदार्यस्य हृदयविनोदनार्थमवसरे दर्शयामि । (इत्यादाय पटान्ते पिदधाति । उपसृत्य प्रकाशम् ।) आर्य, नेतःपरं कुत्रापि लक्ष्यते पादमुद्रा । किंतु वने संचरतः कस्यापि मृगस्यात्रैवाभिव्यक्ता पदसरणिरालोकिता ।

**रामः**—हन्त, निराशाः स्मः । अये जानकि,

आयतेक्षणमरालकुन्तलं पक्वबिम्बफलपाटलाधरम् ।
मञ्जुभाषिणि ममाक्षिगोचरं कल्पते तव कदा मुखाम्बुजम् ॥ ३५ ॥

(परितोऽवलोक्य ।) अये, प्रियायाः किंचिदपि वस्तु न लक्ष्यते । केनाहं हृदयमवलम्बे ।

**लक्ष्मणः**—आर्य, देव्याः करपरिभ्रष्टमिदं मणिवलयम् । तदवधारयत्वार्यः । (इति ददाति ।)

**रामः**—(गृहीत्वा सहर्षम् ।)

मम हृदयमिदं चिराय किंचिद्विगलिततापरुजं वितन्वदेतत् ।
कथमपि करपल्लवात्प्रियाया मणिवलयं पतितं मयाद्य लब्धम् ॥३६॥

(हृदये निक्षिपन् ।)

एतत्पुरा मम गलं परिपीड्य गाढं
च्छिन्नं व्यधत्त बहुशः परिरम्भणेषु ।
बिम्बाधरं मयि रसात्पिबति प्रियायाः
कोलाहलं च कृतवत्करधूननेषु ॥ ३७ ॥

(निःश्वस्य ।) वत्स, क्व जानकीं पश्यामः । कुत्र वनान्तः पुनरन्विष्यामः । केषु वा निकुञ्जेषु पुनर्विलोकयामः । हन्त, सर्वथा निराशाः स्मः ।

दिशो विलोकयाम्यद्य ज्वालापरिवृता इव ।
बाढं जगदिदं मन्ये ह्यद्य मे प्रियया विना ॥ ३८ ॥

**लक्ष्मणः**—अहो, कष्टमार्यस्येयं दशा वर्तते ।

**रामः**—किमत्रास्महे ।

वत्स याहि गृहं व्रजाम

**लक्ष्मणः**— किमिदं गेहं

**रामः**— कुतः

**लक्ष्मणः**— कानने

वत्स्यामः

**रामः**— कथमागता वनभुवं

**लक्ष्मणः—** ताताज्ञया यन्त्रिताः ।

**रामः—**

आयाताः कति वा वयं कथय मे

**लक्ष्मणः—** देव त्रयः

**रामः—** के च ते

**लक्ष्मणः—**

त्वं चाहं जनकात्मजा च

**रामः—** दयिते कुत्रासि हा जानकि ॥३९॥

(नेपथ्ये ।)

वत्से, मा भैषीः ।

**लक्ष्मणः—**(कर्णं दत्त्वा सहर्षं विभाव्य ।) आर्य, मधुकरिकासमेतां जानकीं समाश्वासयन्कुम्भसंभवो महर्षिरित एवाभिवर्तते ।

(ततः प्रविशति यथानिर्दिष्टः कुम्भसंभवः ।)

**अगस्त्यः—**वत्से, मा भैषीः । अयमिह त्वामन्विष्यन्नास्ते सलक्ष्मणो रामभद्रः ।

**सीता—**(रामं विलोक्य लज्जां नाटयन्ती स्वगतम् ।) एदेहिं विलोअणेहिं अज्जउत्तो दिट्ठो त्ति अहो मे भाअहेअम् । (क)

**रामः—**भगवन्, अभिवादये ।

**अगस्त्यः—**आयुष्मानेधि ।

**लक्ष्मणः—**भगवन्, अभिवादये ।

**अगस्त्यः—**वत्स, चिरं जीव ।

**सीता—**जेदु जेदु अज्जउत्तो । (ख)

**मधुकरिका—**जेदु जेदु महाराओ । (ग)

---

(क) एताभ्यां विलोचनाभ्यामार्यपुत्रो दृष्ट इत्यहो मे भागधेयम् ।

(ख) जयतु जयत्वार्यपुत्रः ।

(ग) जयतु जयतु महाराजः ।

**रामः**—(सीतां विलोक्य।) वत्स, अकाण्डपतितसुधावृष्टिसदृशं सीतादर्शनम् ।

**लक्ष्मणः**—आर्य, एवमेतत् । (अगस्त्यं प्रति।) भगवन्, अत्र लतामण्डपे मुहूर्तमासनपरिग्रहः क्रियताम् ।

**सर्वे**—तथा । (इत्युपविशन्ति।)

**लक्ष्मणः**—भगवन्, कथमासादिता जानकी ।

**अगस्त्यः**—श्रूयताम् ।

**रामः**—अवहिताः स्मः ।

**अगस्त्यः**—पूर्वमत्र वने दुर्वासाः कानिचिद्दिनानि तपः कृतवान् ।

**मधुकरिका**—सुलहकोव्वो क्खु एसो महेसी सुणिअदि । (क)

**रामः**—ततस्ततः ।

**अगस्त्यः**—तस्मिन्समये तेषु तेष्वाश्रमेषु तीव्रतपःशङ्किना महेन्द्रेण विसृष्टानां चरन्तीनां मध्ये हरिणी नाम काचिदेतत्तपोवनं प्रविश्य पुष्पाण्यवाचिनोत् ।

**रामः**—हन्त, महान्प्रमादः ।

**अगस्त्यः**—ततः परमभिषेकायागच्छन्नयं दुर्वासास्तामवलोक्य 'अये हरिणि, यतोऽस्मद्देवतार्चनोचितानि कुसुमान्यवचिनोषि, ततस्त्वन्नामसदृशीमेवाकृतिमेहि' इति शशाप । तदानीमेव परित्यज्य वनमिदमन्तर्हितश्च ।

**मधुकरिका**—अम्हहे, अदिणिट्ठुरदा तावसाणम् । (ख)

**लक्ष्मणः**—कथमस्यास्तदुपरमो जातः ।

**अगस्त्यः**—ततो हरिणीभूतां हरिणीमादायास्मदन्तिकं प्राप्ताभिरतिकरुणमाक्रन्दन्तीभिरप्सरोभिरभ्यर्थितेन मया कृपावशेनाभिमन्त्रिता दूर्वामुष्टिरर्पिता । तस्मिन्वने नास्याः प्रत्यासत्तिरासीत् । (?)

**रामः**—किमाश्चर्यम् ।

---

(क) सुलभकोपः खल्वेष महर्षिः श्रूयते ।

(ख) अहो, अतिनिष्ठुरता तापसानाम् ।

दवदहनदग्धमूर्तेः काननलक्ष्म्याः पुनर्नवीकरणम् ।
उपकर्तुरखिलजगतां घननिकरस्य स्वभाव एवायम् ॥ ४० ॥

**अगस्त्यः**—अयमेवाद्याप्यनुवर्तमानः शापो महानस्मिन्वने कुसुमान्यवचिन्वन्तीं जानकीमस्पृशत् ।

**रामः**—(साश्चर्यम् ।) किमेतावन्तं कालं हरिणीभूय स्थितेयम् ।

**मधुकरिका**—(स्वगतम् ।) तस्सिं एव्व समुवट्ठिदाए हरिणीए होदव्वम् । (क)

**अगस्त्यः**—अहमेकाकिनीमस्मदाश्रमे तिष्ठन्तीमितस्ततः प्लवमानामदृष्टपूर्वां हरिणीं समाधिना जानकीं निश्चित्य तत्क्षणमेव शापान्मोचयित्वा भवदन्तिकमनैषम् ।

**रामः**— परोपकारशीलत्वं परदुःखासहिष्णुता ।
दयापरत्वं दाक्षिण्यं सतां स्वाभाविका गुणाः ॥ ४१ ॥

**अगस्त्यः**—अनया जानक्या लक्ष्मणेन सह महान्तं कालं वर्तेथाः । अपि च ।

दोषध्वान्तं क्षालयन्ती नराणा-
माकल्पान्तं नन्दयन्ती जगन्ति ।
स्फायज्ज्योत्स्नापूरपाण्डुस्त्वदीया
जीयात्कीर्तिः श्रीनिधे राघवेन्द्र ॥ ४२ ॥

**रामः**—महान्प्रसादः ।

**अगस्त्यः**—किं ते भूयः प्रियमुपकरोमि ।

**रामः**—इतः परं किं प्रियमस्ति । तथापीदमस्तु भरतवाक्यम् ।

समयविहितवर्षैः सस्यपूर्णां धरित्रीं
जनयतु जलदौघः प्रेरितो वासवेन ।
भवजलनिधिमध्ये मज्जतां मानवानां
भवतु तरणिरूपा संगतिः सज्जनानाम् ॥ ४३ ॥

**संपूर्णम् ।**

---

(क) तस्मिन्नेव समुपस्थितया हरिण्या भवितव्यम् ।

# KÂVYAMÂLÂ 27.

THE

# JÎVÂNANDANA

OF

# ÂNANDARÂYA MAKHÎ.

EDITED BY

PAṆDIT ḌURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂṆḌURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1891.

*Price* 12 *Annas*.

( *Registered according to Act XXV of 1867.* )

All rights reserved by the publisher. )

काव्यमाला. २७.

आनन्दरायमखिप्रणीतं

# जीवानन्दनम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम् ।

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८९१

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यं १२ आणकाः ।

# काव्यमाला।

## श्रीमदानन्दरायमखिप्रणीतं

## जीवानन्दनम्।

प्रथमोऽङ्कः।

लक्ष्मीकैरवबन्धुकल्पकतरूंल्लब्ध्वाथ लब्धेप्सिते
भूयो मश्नति देवदानवगणे दुग्धाब्धिमृद्धश्रमे।
तस्यानन्दथुना समं समुदयन्कुम्भं सुधापूरितं
बिभ्राणः स्वकरे करोतु भवतां भद्राणि धन्वन्तरिः॥ १॥

अपि च।

प्राग्जन्मीयतपःफलं तनुभृतां प्राप्येत मानुष्यकं
तच्च प्राप्तवता किमन्यदुचितं प्राप्तुं त्रिवर्गं विना।
तत्प्राप्तेरपि साधनं प्रथमतो देहो रुजावर्जित-
स्तेनारोग्यमभीप्सितं दिशतु वो देवः पशूनां पतिः॥ २॥

(नान्द्यन्ते)

**सूत्रधारः**—मारिष, इतस्तावत्।

(प्रविश्य)

**पारिपार्श्वकः**—भाव, एषोऽस्मि।

**सूत्रधारः**—

रीतिः सुखपदन्यासा शारदीया विजृम्भते।
पूर्णचन्द्रोदयश्चायं निहन्ति ध्वान्तमामयम्॥ ३॥

अपि च।

क्रममाणेषु दिगन्ते जलधरजालेषु शङ्खधवलेषु।
शान्तिमुपयाति सहसा कालुष्यदशा भृशं पयसाम्॥ ४॥

**पारिपार्श्वकः**—अतः किमाचरितव्यम् ।

**सूत्रधारः**—शृणु तावत् । अत्र तञ्जापुरे पौरजानपदा देशान्तरादागताश्च बृहदीश्वररथोत्सवदिदृक्षया संघीभूताः ।

सरसकवितानाम्नो हेम्नः कषोपलतां गता
विहरणभुवः षड्दर्शन्या विवेकधनाकराः ।
विदधति तपोलभ्याः सभ्या इमे मम कौतुकं
तदिह हृदयं नाट्येनैतानुपासितुमीहते ॥ ५ ॥

**पारिपार्श्वकः**—(सशिरःकम्पम् ।) कं पुनः प्रबन्धमवलम्ब्य ।

**सूत्रधारः**—नन्वस्ति मम वशे सहृदयजनहृदयचन्दनं जीवानन्दनं नाम नवीनं नाटकमिति ।

**पारिपार्श्वकः**—कस्तस्य प्रबन्धस्य कविः ।

**सूत्रधारः**—विद्वत्कविकल्पतरुरानन्दरायमखी । य एष इह

गुरुदेवद्विजभक्तो नैमित्तिकनित्यकाम्यकर्मपरः ।
दीनजनाधीनदयो विहरति समरे च विक्रमार्क इव ॥ ६ ॥
यः स्नातोऽजनि दिव्यसिन्धुसलिले यः स्वात्मविद्याश्रितो
येनाकारि सहस्रदक्षिणमखो यः सद्भिराश्रीयते ।
सोऽयं त्र्यम्बकराययज्वतिलको विद्वत्कवीनां प्रभो-
र्यत्तातस्य नृसिंहरायमखिनस्तुल्यप्रभावोऽनुजः ॥ ७ ॥

**पारिपार्श्वकः**—(सबहुमानम् ।) आः, ज्ञायत एवायम् । किं त्वस्य सर्वलोकविदिता अप्येते गुणाः प्रबन्धनिर्वाहधूर्वहत्वमवबोधयितुं नेशते । यतः।

आराध्नोति यदेष भक्तिभरितो देवान्द्विजातीन्गुरू-
न्यच्च श्रद्दधदातनोति समये नित्यादिकर्मत्रिकम् ।
यद्दीनेषु दयां करोति समरे शौर्यं यदालम्बते
तत्सर्वं नरसिंहयज्वसुततालाभस्य लीलायितम् ॥ ८ ॥

इदं तु श्रोतव्यम् ।

आनन्दरायमखिनो वाल्मीकेरिव योगिनः ।
इतरापेक्षणात्सारः स्वतः सारस्वतोदयः ॥ ९ ॥

**सूत्रधारः**—(विहस्य ।) मारिष, त्वं न जानासि यत एवं ब्रवीषि । शृणु तावत् ।

आबाल्यादपि पोषितोऽजनि मया प्रेम्णा तथा लालित-
स्तेनासौ सरसामुपैतु कवितामानन्दरायाध्वरी ।
इत्येकक्षितिपालवंशजलधेर्देव्या गिरां जातया
श्रीशाहावनिनायकाकृतिभृता नूनं प्रसादः कृतः ॥ १० ॥

अत एव

कवीनां पूर्वेषां कथमपि च चित्तैरवहितै-
र्गृहीता या नासीत्सरसकवितासारपदवी ।
असौ तामाक्रामन्हरति नरसिंहाध्वरिकुल-
प्रदीपः सूरीणां श्रवणयुगजाड्यान्धतमसम् ॥ ११ ॥

**पारिपार्श्वकः**—श्रीशाहराज इति नाम दधत्याः सरस्वत्याः कियानानन्दरायमखिनि दयाविशेषः । यतः ।

पुष्यत्कौतुकपद्मसंभृतकरद्वन्द्वाङ्गुलीवेल्लन-
द्राङ्क्ष्पीडितचन्द्रमण्डलगलत्पीयूषधारासखैः ।
वाग्गुम्फैर्बलवैरिधारितशचीधम्मिल्लमल्लीसर-
स्फारामोदमदापहैश्च कवयत्यानन्दरायाध्वरी ॥ १२ ॥

युक्तमुक्तं च भावेन 'शाहभूपतिरूपेण गिरां देवी जाता' इति । कथमन्यथानन्यसाधारणमस्य प्रागल्भ्यम् । तदिदानीमिदमुत्प्रेक्ष्यते—

भर्तुं लालयितुं भुवि प्रथयितुं विद्वज्जनानाश्रिता-
न्श्रीशाहक्षितिपात्मना क्षितिगतां मत्वा गिरां देवताम् ।
आसिञ्चन्नसकृत्कमण्डलुजलैरङ्गानि पर्याकुलो
धाता वाहनहंसपक्षपवनैस्तापं किलापोहति ॥ १३ ॥

**सूत्रधारः**—तन्नियोजय भूमिपरिग्रहायास्मद्वर्ग्यं शैलूषगणम् ।

**पारिपार्श्वकः**—बाढम् । किं तु सन्ति कथानायकस्य जीवस्य परिजना विज्ञानशर्मप्रभृतयः प्रतिनायकस्य च यक्ष्मणः परिजनाः पाण्डुश्वासकासज्वरगुल्मातिसारप्रभृतयः । तेषां यद्यपि भूमिकाग्रहणपटवो नटबटवः

पुण्डरीककेयूरकमयूरकसारङ्गकतरङ्गकप्रभृतयः संनह्यन्ति । तथापि प्रयोगस्य बहुत्वेन दुरवगाहतया कथमभीप्सितार्थसिद्धिर्भविष्यतीति विचारेण व्याकृष्यत इव मे हृदयम् ।

**सूत्रधारः**—यत्किंचिदेतत् । महतामेषां सामाजिकानामनुग्रह एवास्माकमभीप्सितमर्थं समग्रयिष्यति । यतः ।

जाड्यं भिनत्ति जनयत्यधिकं पटुत्वं
सार्वज्ञमावहति संमदमातनोति ।
विद्वेषिवर्गविजयाय धृतिं विधत्ते
किं किं करोति न महद्भजनं जनस्य ॥ १४ ॥

**पारिपार्श्वकः**—एवं च मन्ये त्वया सह स्पर्धमानोऽपि विकटनामा नटबटुरभिनयविद्यायां महदनुग्रहात्त्वयैव विजेष्यत इति ।

**सूत्रधारः**—विकटो नाम नटबटुर्मया सह स्पर्धत इत्यतत्त्वविदो वचनम् । शृणु तावत् ।

अभिनयविद्याविषये दुरहंकाराकुलीकृतो विकटः ।
स नटबटुर्मां वाञ्छन्त्यभिभवितुं जीवमिव यक्ष्मा ॥ १५ ॥

(नेपथ्ये)

अरे रे शैलूषापसद, 'अभिभवितुं जीवमिव यक्ष्मा' इति किमसंभावितमर्थं दृष्टान्तयसि ।

मयि जीवति जीवस्य स्वामिनो मन्त्रिणि प्रिये ।
दुर्बलो यक्ष्महतकः कथं वाभिबुभूषति ॥ १६ ॥

**सूत्रधारः**—(आकर्ण्य ।) मारिष, जीवराजमन्त्रिणो विज्ञानशर्मणो भूमिकामादाय मम कनीयान्कलहंसो रङ्गभुवमवतरति । तदावामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

**प्रस्तावना ।**

(ततः प्रविशति जीवमन्त्री विज्ञानशर्मा ।)

**विज्ञानशर्मा**—('अरेरे शैलूषापसद–' इत्यादि पठित्वा विचिन्त्य ।) सर्वथा राजसमीपं गत्वा तदनुज्ञया यक्ष्मणः प्रवृत्तिमुपलब्धुं चारान्प्रेषयिष्यामि । अथवा 'तत्प्रवृत्त्युपलम्भाय प्रेषय धारणाम्' इति मयोक्तो राजा तथा कुर्यात् । (श्रुतिमभिनीय ।)

दिक्षूदञ्चति ताम्रचूडरसितं यद्ध्रस्वदीर्घप्लुत-
प्रायोवर्णनिभं ब्रवीति तदिदं व्युष्टा निशाभूदिति ।
स्त्रीणां निर्गमनं विहृत्य पतिभिर्ब्रूते विनैवाक्षरैः
क्रीडावेश्मकपाटिकाविघटनक्रेंकारपारम्परी ॥ १७ ॥

तदिदानीं देव्या प्रसन्नया बुद्ध्या सह राजा प्रतिबुध्य निवसेत् । तदुपसर्पामि । (इति पुरो दृष्टिक्षेपमभिनयन् ।)

चञ्चत्खेटकृपाणकञ्चुकशिरस्त्राकल्पदृप्यद्भटा
सादिव्यञ्जितवक्रमण्डलगतित्वङ्गत्तुरङ्गव्रजा ।
गण्डद्वन्द्वगलन्मदाम्बुमुखरीभूतद्विरेफद्विपा
दृष्टयोर्मे कुतुकाय राजभवनद्वारोपकण्ठस्थली ॥ १८ ॥

अपि च ।

प्रौढामात्यनिरुक्तमन्त्रपदवीविस्रम्भसंचारिणो
राज्ञो दुःसहतेजसो निशमने यद्वद्धृतिं द्वेषिणः ।
प्रासादप्रतिहारवेदिषु तथा स्नेहाङ्कपात्रस्थिताः
प्रत्यूषोपगमे प्रदीपमुकुलाः कान्तिं त्यजन्त्यञ्जसा ॥ १९ ॥

(पुरो विलोक्य ।) का पुनरियं तपश्चरणजनितप्रभुत्वगौरवेव मामभिवर्तते ।

गाढोन्नद्धजटाकलापकपिलश्रीधूतबालातपा
बिभ्राणा भसितानुलेपधवलच्छायां तनुं पावनीम् ।
भिक्षापात्रमयूरपिच्छचमरभृत्पाणिद्वया मेऽधुना
काषायाम्बरधारिणी कलयति स्वान्ते धृतिं तापसी ॥ २० ॥

(निपुणं निरूप्य ।)

अस्यामक्षिभ्रुवं नासा रदपङ्क्ती रदच्छदः ।
चुबुकं मन्दहासश्च धारणायामिवेक्ष्यते ॥ २१ ॥

(ततः प्रविशति तापसीवेषा धारणा ।)

**धारणा**—अहं खु पच्चत्थिराआभिसेणणसंणाहं कस्स वि पुरिसस्स मुहादो सुदवन्तेण रण्णा 'इमं उत्तन्तं पुरं पविसिअ जाणीहि' त्ति पेसिदह्मि । मए वि तावसीवेसाए तह जाणिअ रण्णो समीवे समागमीअदि । (अग्रतो दत्तदृष्टिः स्वगतम् ।) एसो विण्णाणसम्मा अमच्चो आअच्छदि । होदु । वेसेण पदारेमि णम् । जज्जवि सव्वस्सिं वि कज्जे इमस्स अणुमदिं विणा राआ ण पवट्टइ तह वि जं मह संसओ वट्टइ ता एअकस्स पआसो ण भवे । (इति परिक्रामति ।) (क)

**मन्त्री**—(दृष्ट्वा स्वगतम् ।) इयं तापसी राजप्रहिता प्रच्छन्ना किं धारणा भवेत् । भवतु । पृच्छामि । (प्रकाशम् ।) अये तापसि, का त्वम् । कुत आगच्छसि ।

**धारणा**—(स्वगतम् ।) इमस्स पडिवअणं भासन्तरेण भणेमि । अण्णहा कहं वि जाणिस्सदि इअं सेति । (प्रकाशम् ।) अहं खलु गार्गी यक्ष्मणो राज्ञो वयस्या देव्या गृहिण्याः स्नेहसर्वस्वभाजनं तदन्तःपुरादेवागच्छामि । (ख)

**मन्त्री**—(स्वगतम् ।) भवेदेवेयं धारणा तापसीवेषेण रिपुप्रवृत्तिमुपलभ्यागतवती । अयं स्वनामानुगुणमभिज्ञो वा न वेति मां परीक्षितुं संस्कृत-

---

(क) अहं खलु प्रत्यर्थिराजाभिषेणनसंनाहं कस्यापि पुरुषस्य मुखाच्छ्रुतवता राज्ञा 'इमं वृत्तान्तं पुरं प्रविश्य जानीहि' इति प्रेषितास्मि । मयापि तापसीवेषया तथा ज्ञात्वा राज्ञः समीपे समागम्यते । एष विज्ञानशर्मा अमात्य आगच्छति । भवतु । वेषेण प्रतारयाम्येनम् । यद्यपि सर्वस्मिन्नपि कार्येऽस्यानुमतिं विना राजा न प्रवर्तते तथापि यन्मम संशयो वर्तते तदेककस्य प्रकाशो न भवेत् ।

(ख) अस्य प्रतिवचनं भाषान्तरेण भणामि । अन्यथा कथमपि ज्ञास्यति इयं सेति ।

भाषया वेषानुगुणमपलपते प्रतिपक्षकुले च पक्षपातमात्मनः सूचयति । भवतु । अहमप्यजानन्निवानुनयन्पृच्छाम्येनाम् । (प्रकाशम् ।) अये तापसि,

निखिलं जगतश्चरितं विज्ञातं ते समाधिनैव भवेत् ।
तन्मे महाप्रभावा भाग्येनासादिता भवती ॥ २२ ॥

**धारणा**—(स्वगतम् ।) मं तावसिं एव्व जाणिअ मह मुहादो पच्चत्थिराअप्पउत्तिं सुणिदुं अणुणअप्पआरो एसो । होदु । अहं वि अजाणन्तीव पुच्छामि । (प्रकाशम् ।) कस्त्वम् । क्व गच्छसि । सूनृतेन ते वचनेन साधुर्भवानिति पृच्छामि । (क)

**मन्त्री**—(स्वगतम् ।) इयमात्मानं गोपयति । अहमपि तथैवोत्तरयामि । (प्रकाशम् ।) कार्यविशेषेऽधिकृतं जानीहि येनैवमधिकृतस्तन्निकटे गच्छामि ।

**धारणा**—(स्वगतम् ।) एसा विपक्खजणपक्खवादिणित्ति गोपणप्पआरो एसो । (प्रकाशम् ।) केनाधिकृतोऽसि । (ख)

**मन्त्री**—भगवति, त्वमेव जानासि । यतः प्रणिधानेन योगिनः सकलमपि प्रत्यक्षयन्ति ।

**धारणा**—(स्वगतम् ।) कहं एदं आपडिदम् । होदु । जोइणो विअ आसिअं करिअ अमच्चं वञ्चेमि । (इति ध्यानारूढा तिष्ठति ।) (ग)

**मन्त्री**—(स्वगतम् ।) एषा खलु

कृत्वा स्वस्तिकमासनं करयुगं विन्यस्य जानुद्वये
नासाग्रार्पिततारका नतमृजूकृत्यावलग्नं दृढम् ।
निःश्वासोच्छ्वसितोपरोधघटितस्तैमित्यपीनस्तनी
चित्ते मे कृतसंयमेव कुरुते धूर्ता महत्कौतुकम् ॥ २३ ॥

(प्रकाशम् ।) परिनिष्ठितं योगाभासनं भवत्याः ।

---

(क) मां तापसीमेव ज्ञात्वा मम मुखात्प्रत्यर्थिराजप्रवृत्तिं श्रोतुमनुनयप्रकार एषः । भवतु । अहमप्यजानतीव पृच्छामि ।

(ख) एषा विपक्षजनपक्षपातिनीति गोपनप्रकार एषः ।

(ग) कथमेतदापतितम् । भवतु । योगिन इवासिकां कृत्वा अमात्यं वञ्चयामि ।

**धारणा**—(ध्यानाद्विरम्य सस्मितम् ।) जीवस्य राज्ञो मन्त्री विज्ञानशर्मा भवान् ।

**मन्त्री**—महाप्रभावा योगसिद्धिमती भवती । तथाहि ।

बुद्ध्या महत्या कृतसाहचर्या देवे निजे दर्शितभूरिभक्तिः ।

परप्रवृत्तिं विदती महिम्ना साधारणा त्वं त्वहिते हिते च ॥ २४ ॥

**धारणा**—(स्वगतम् ।) किं जाणिदं म्हि अमच्चेण जहत्थणामधेएण जं तावसीवण्णणव्वाजेण अहं जेव्व वण्णिदा । होदु । एव्वं भणामि । (प्रकाशम् ।) महान्खलु योगप्रभावः । (क)

**मन्त्री**—भगवति, तव न किंचित्प्राणिनामन्तर्गतमविदितमस्ति । अतस्त्वां प्रार्थये । कथमस्माकं राजनि यक्ष्मा मन्यते । योगिन्यास्तव दुःखितेषु कथमेषां दुःखविमुक्तिः स्यादिति चित्तपरिकर्मविशेषः करुणा भवत्येव । योगाङ्गेषु यमेषु वाङ्मनसयोर्यथार्थत्वरूपः सत्यं नाम द्वितीयो यमोऽपि तथा । अत इदं निर्विशङ्कं प्रार्थनापूर्वं पृष्टासि ।

**धारणा**—(स्वगतम् ।) जक्खराजपक्खवादविसेसे वि जोइणीए पुच्छिदस्स जहत्थुत्तरं अभणिअ असक्कं ठादुं त्ति मण्णइ अमच्चो । (प्रकाशम् ।) किमन्यत् । पुरान्निष्क्रमयितव्योऽयमिति मन्यते । (ख)

**मन्त्री**—कथमेतदेतस्य संघटते सामादिषु चतुर्षूपायेष्वेकैकस्यापि प्रयोगेण सुसाधो हि रिपुमनोरथभङ्गः ।

**धारणा**—नन्विमं दुष्करं पश्यामि ।

यक्ष्मणि विभौ प्रयोगं घटयन्ति न सामभेददानानि ।

दण्डः प्रभवेन्नु कथं प्रबलतरे रिपुजने स्वस्मात् ॥ २५ ॥

**मन्त्री**—यथार्थमाह भवती । किं त्विदं पक्षपातवचनम् । केनेममस्मत्प्रबलतरं मन्यसे ।

---

(क) किं ज्ञातास्म्यमात्येन यथार्थनामधेयेन यत्तापसीवर्णनव्याजेनाहमेव वर्णिता । भवतु । एवं भणामि ।

(ख) यक्ष्मराजपक्षपातविशेषेऽपि योगिन्या पृष्टस्य यथार्थोत्तरमभणित्वा न शक्यं स्थातुमिति मन्यतेऽमात्यः ।

**धारणा**—(स्वगतम् ।) एसो अत्तकेरअस्स पहुणो अमच्चो । ता पहुजअविषअणीए मन्तविचारसिद्धीए परपक्खबलट्ठिदिं एदस्स जेव्व कहइस्सम् ।(क) (प्रकाशम् ।) सर्वरोगराजो यक्ष्मा निष्प्रतीकार इति सर्वजनविदितमेतत् । शृणु तावत् । परीवारा एतस्य रोगविशेषा भीमरूपा बहवः । तथाहि ।

ज्वरपाण्डुप्रमेहार्शः शूलगुल्मभगंदराः ।
कासश्वासावतीसारसंनिपाताश्मरीव्रणाः ॥ २६ ॥

किं च ।

रोगा मूर्ध्नि शतं चतुर्नवतिरेवाक्ष्णोस्तथा नासिकां
प्रत्याष्टादश कर्णयोरपि तथा वक्त्रे चतुःसप्ततिः ।
पञ्चैवं हृदि किं च सन्ति बहवः सर्वेऽप्यमी दुस्तराः
प्राप्तौ कल्ककषायलेह्यवटकप्रायौषधानामपि ॥ २७ ॥

तस्माद्दुर्जयो युष्माभिः ।

**मन्त्री**—(स्वगतम् ।) इयं किल भीत्या निसर्गकातरा प्रबलपरबलप्रवेशहृदया मदीयप्रभावमजानती स्वबुद्ध्यनुरूपं किमपि प्रलपति । भवतु । किमनया वृथा संवादकदर्थनया । प्रस्तुतकार्यसाधनार्थमिमां तावदन्तरयामि । (प्रकाशं सोपहासम् ।)

आलोक्य शात्रवबलं बहुधारणे त्वं
भीतासि संप्रति रसं प्रतिपन्नधैर्या ।
जीवस्य जीवितसमे मयि सत्यमात्ये
भूयात्कथं बत विरोधिशिरोधिरोहः ॥ २८ ॥

**धारणा**—(विहस्य ।) कधं जाणिदह्मि अमच्चेण । ता कहेमि विस्सद्धं जहत्थं सुणादु अमच्चो । अहं खु देईए बुद्धीए सहअरी रण्णा जीवेण तावसीवेसं करिअ रत्तिम्मि पुरं पविसिअ जक्खराअस्स विआरणीओ व-

(क) एष आत्मीयस्य प्रभोरमात्यः । तत्प्रभुजनविषयिण्या मन्त्रविचारसिद्धेः परपक्षबलस्थितिमेतस्यैव कथयिष्यामि ।

वसाओ त्ति पेसिदह्मि । तह ज्जेव विचारिअ अज्जं पदारेदुं पच्छण्णे व ठिदह्मि । (क)

**मन्त्री**—युज्यत एतत् । अतो राजसमीपमेव गच्छावः ।

**धारणा**—तुमं जेव्व गदुअ इमं वुत्तन्तं भणाहि । रण्णो णिवेदणादो वि तुह पुरदो कज्जणिवेदणं अब्भहिदम् । अहं उण दुज्जणसंसग्गकिदं कलुसं पक्खालेदुं महाणदिं ण्हादुं गच्छेमि । (ख) (इति निष्क्रान्ता ।)

**मन्त्री**—(सविचारम् ।) यद्यपि कुटिलप्रकृतयः स्वामिनि निबद्धदृढभक्तयो दुर्जया एव परसैनिकास्तथापि किमसाध्यं बुद्धिविभवस्य । यतः ।

दुर्जाते सुमहत्यपि क्षितिपतेः शालीनतां संत्यज-
ञ्शत्रूञ्जेतुमथेप्सितं घटयितुं शक्नोत्युपायेन यः ।
प्रायो मन्त्रिपदं महोन्नतमतिः प्राप्तुं स एवार्हति
स्वोत्सेकी न तु पण्डितो भुवि जनो वाचा वदन्पौरुषम् ॥ २९ ॥

अत इदानीम् ।

संचिन्तयामि कंचन संप्रति समयोचितं जयोपायम् ।
येनास्माकं श्रेयो भविता सहसा पराजयो द्विषताम् ॥ ३० ॥

(इति ध्यानं नाटयन् ।) आः, चिन्तितोऽयमबाधितोपायः । तथाहि ।

प्रथन्ते यास्तिस्रः प्रबलजडतीक्ष्णाः प्रकृतयो
वशीकारे तासां जगति सदुपायाः परममी ।
क्रमात्स्नेहास्ते ते कुशलमतिभिः सद्भिरुदिता-
स्तथा तीक्ष्णोपाया नियतमुपचाराश्च मधुराः ॥ ३१ ॥

---

(क) कथं ज्ञातास्म्यमात्येन । तत्कथयामि विश्रब्धं यथार्थं शृणोत्वमात्यः । अहं खलु देव्या बुद्धेः सहचरी राज्ञा जीवेन तापसीवेषं कृत्वा रात्रौ पुरं प्रविश्य यक्ष्मराजस्य विचारणीयो व्यवसाय इति प्रेषितास्मि । तथैव विचार्यार्यं प्रतारयितुं प्रच्छन्नेव स्थितास्मि ।

(ख) त्वमेव गत्वा इमं वृत्तान्तं भण । राज्ञो निवेदनादपि तव पुरतः कार्यनिवेदनमभ्यर्हितम् । अहं पुनर्दुर्जनसंसर्गकृतं कलुषं प्रक्षालयितुं महानदीं स्नातुं गच्छामि ।

तस्मात्प्रबलजडतीक्ष्णप्रकृतीनां वातपित्तकफानां मध्ये प्रबलो यो वातः स तु बहुविधस्नेहविशेषप्रयोगेण वशीकार्यः । तदनुगतस्य पित्तस्य मधुरोपचारेणैव सुकरो वशीकारः । उभयविरुद्धो जडो यः कफस्तत्रेतरोपायस्याप्रसरात्तीक्ष्णप्रयोगेणैव स वशमानेतव्यः । एवं च तत्तत्समुचितैरुपायैः सर्वामयनिदानेषु वातादिषु स्वाधीनेषु तज्जनितानामितरेषामुन्मेष एव दूरतोऽपास्तः । किं च ।

सर्वस्मिन्विषये निरङ्कुशतया यद्दुर्निरोधं मनः
प्रायो वायुरिव प्रकृष्टबलवत्सर्वात्मना चञ्चलम् ।
तत्कामादिभिरुद्धतैरुपहतं संप्रेरितैर्यक्ष्मणा
तत्सौहार्दमुपेत्य यद्यपि पुनर्नः प्रातिकूल्यं चरेत् ॥ ३२ ॥

अतस्तदपि महाधिकारेण वशीकृत्य महति व्यापारे विनियोज्य तैरपि दुर्भेदं करिष्यामि । यद्यपि मद्विरोधिचेष्टोऽज्ञानशर्मा मदसंनिधाने राज्ञ उपजापेन कार्यभेदमेव जनयेत् तथापि जाग्रतिः फलकर्मैव (?) ।

सर्वानर्थनिदाने यक्ष्मणि तस्मिन्समूलमेव मया ।
उन्मूलिते ततो नः कर्तव्यं नावशिष्यते किंचित् ॥ ३३ ॥

तथाकर्तुमेव तावद्राजनिकटमेव गच्छामि । (इति कतिचित्पदानि गत्वा पुरो विलोक्य ।) इदं तद्राजभवनम् । यावत्प्रविशामि । कः कोऽत्र भोः ।

(प्रविश्य ।)

**प्रतीहारः**—मन्त्रिन्, किमाज्ञापयसि ।

**मन्त्री**—प्राण दौवारिक, संप्राप्तं मां राज्ञे निवेदय ।

**प्राणः**—तथा । (इत्यन्तःपुरं प्रविष्टः ।)

**मन्त्री**—(परितो विलोक्य ।) इह खलु

संमृज्य शोधिनीभिश्चत्वरवेदीतलेषु रम्येषु ।
रचयन्ति रङ्गवल्लीरन्तःपुरचारिका एताः ॥ ३४ ॥

गृह्णन्वेत्रलतां वसत्यवसरापेक्षो जरत्कञ्चुकी
राजा मामवलोकयेदिति समं वत्सेन गौस्तिष्ठति ।

वादित्रध्वनिमण्डलीकृतगरुद्धर्हीं नटत्यङ्गणे
देव त्वं विजयीभवेति गुणयन्नास्ते शुकः पञ्जरे ॥ ३९ ॥

(प्रविश्य।)

**दौवारिकः**—(मन्त्रिणं प्रति।) स्वामिन्, भवन्तं द्रष्टुं बुद्ध्या सह देव्या भद्रासनमधिवसति राजा।

**मन्त्री**—

अतिपरिचयेऽपि राज्ञो बिभेमि सहसोपगन्तुमभ्यर्णम्।
येनाग्नेरिव तेजः स्फुरदस्याराान्निवर्तयति ॥ ३६ ॥

(विचिन्त्य।) परपक्षं प्रति प्रतिविचारणाय प्रेषितां धारणां प्रतीक्षमाण इव लक्ष्यते। भवतु तदेतदहं वक्ष्यामि।

(ततः प्रविशति बुद्ध्या देव्या सह राजा जीवः।)

**मन्त्री**—(उपसृत्य।) विजयतां महाराजः।

**राजा**—इतो निषीदतु भवान्। (इति मन्त्रिणे आसनं निर्दिशति।)

**मन्त्री**—(आसने उपविश्य स्वगतम्।) एष खलु

गण्डूषोदकशोधितेऽपि वदने ताम्बूलरक्ताधरः
स्नानापोहितचन्दनेऽपि वपुषि प्रोद्दामतत्सौरभः।
निर्णिक्ते सिचये धृतेऽपि कनककल्पेन पीताम्बरः
सोऽयं सत्यपि न प्रमाद्यति सदाचारादतिप्राभवे ॥ ३७ ॥

(प्रकाशम्।) महाराजेन प्रहिताया धारणाया मुखात्तत्रत्यः सर्ववृत्तान्तो विदित एव। सा पुनर्दुर्जनसंसर्गदोषपरिहाराय नदीं स्नातुं गता। तया च *मयि संक्रमितस्तत्रत्यवृत्तान्तः*।

**राजा**—(सोत्कण्ठम्।) कथमिव।

**देवी**—अहं वि अवहिदह्मि। (क)

**मन्त्री**—(स्वगतम्।) इयं हि देवी

किमपि नियमिताग्रैः कुन्तलैः स्निग्धनीलैः
परिलसदपराङ्गा धारयन्ती दुकूलम्।

---

(क) अहमप्यवहितास्मि।

धवलमुपरि भर्तुश्चामरं धूयमानं
विरमयति करेण व्यक्तमाकर्णनाय ॥ ३८ ॥

(प्रकाशम् ।) श्रोतव्यमिदं धारणावचनम् । यक्ष्महतकः पुरान्निष्क्रामणमेवासाकमिच्छतीति ।

**राजा**—किमत्र प्रतिविधातव्यम् ।

**देवी**—(सोद्वेगम् ।) दाणिं किं कुम्भो । (क)

**मन्त्री**—देवि, मा भैषीः । प्रतिविधानप्रकारोऽपि धारणया विदितः ।

**राजा**—कथमिव ।

**मन्त्री**—(कर्णे) एवमेवम् ।

**राजा**—कथमिदं धारणया निर्धारितम् ।

**मन्त्री**—रसगन्धकप्रयोगमन्तरेण सपरिवारोऽहमजय इति यक्ष्मराजस्य हृदयं विश्वसनीयया तापसीवेषया धारणया गृहीतम् ।

**देवी**—(साश्वासम् ।) जइ एव्वं ता कहं अह्मेहिं रसगन्धआ संपादणिज्जेत्ति । (ख)

**राजा**—

शंभोर्वीर्यं रसो नाम शर्वाण्या नाम गन्धकः ।
ताभ्यामेव प्रसन्नाभ्यां तौ ग्राह्याविति मे मतिः ॥ ३९ ॥

**देवी**—केण उण उवाएण ताणं पसादो संपादणिज्जो । (ग)

**मन्त्री**—उपासनयैव ।

**राजा**—युक्तमुक्तं भवता । श्रूयते हि पुरा मृकण्डुरुमापतिमुपास्य पुत्रं लेभे । तत्पुत्रोऽपि तदुपासनया मृत्युमुखान्मुक्तो दीर्घमायुरलभतेति ।

**मन्त्री**—सम्यगवगतं महाराजेन । यतः खल्वेष

पादाघातत्रुटितयमुनाभ्रान्तबाह्वन्तरोद्य-
द्रक्तस्रोतः समुपशमिताशेषशोकाश्रयाशम् ।

---

(क) इदानीं किं कुर्मः ।

(ख) यद्येवं तत्कथमस्माकं रसगन्धकौ संपादनीयौ इति ।

(ग) केन पुनरुपायेन तयोः प्रसादः संपादनीयः ।

मार्कण्डेयं व्यतनुत यदा सर्वभूतैस्तदादि-
स्तुत्यं मृत्युंजय इति यशः स्फारमीशः प्रपेदे ॥ ४० ॥

**राजा**—पुरा खलु देवदानवैरमृतार्थिभिर्महोरगयोक्रपरिवेष्टितविकृष्यमाणमन्दरमन्थानदण्डैर्मथ्यमाने दुग्धसागरे गरलमुद्भटमुत्थितमसहमानेषु भुवनेषु विनष्टप्रायेषु पलायनाभिमुखे चतुर्मुखे विगलितौजसि बिडौजसि भगवानेवैष विषमश्नन् जगदनुचकम्पे । तथाहि ।

मेघाक्रान्तदिगन्तदर्शरजनीमूर्छत्तमोमेचकं
तापद्रावितदेवदानवनरं यः कालकूटं गरम् ।
जग्ध्वा जम्ब्विव बालकस्त्रिभुवनत्राणं ततानाञ्जसा
तस्य द्राङ्महिमा न वाङ्मनसयोः पन्थानमारोहति ॥ ४१ ॥

**मन्त्री**—किमुच्यते महिमेति । श्रूयतां तावत् । त्रिपुरविजयप्रसक्तावसक्त इव स्वयं तदर्थं कतिचित्साधनानि संपाद्य तान्यपि वितथीकृत्य स भगवान्निजमेव महिमानमभिव्यंक्तवान् । तथाहि ।

सूर्याचन्द्रमसौ रथाङ्गयुगलं सूतो विधाता स्वयं
रथ्याश्वा निगमाश्च यस्य रथमारूढेन भूमीमयम् ।
मेरुं धन्वविषक्तवासुकिगुणं कृत्वा शरं चाच्युतं
तिस्रस्तेन पुरः स्मितेन तु परं दग्धाः सुरद्वेषिणाम् ॥ ४२ ॥

**राजा**—एवमपरिमितान्याश्चर्यचरितानि देवस्य ।

**देवी**—किं अच्चरिअं । महेसरस्स जह जह जारिसो उपासनं करेदि तह तह तारिसं सो तं तं फलं पावेदि । (क)

**मन्त्री**—एवमेतत् ।

**राजा**—एवमनिर्धारणीयनानास्वरूपा भगवतीपरमेतत् । परंतु भगवतो दयारूपैवेयम् । अत एव लोकरक्षणार्था प्रवृत्तिरेतस्याः । श्रूयतां तावत् ।

---

(क) किमाश्चर्यम् । महेश्वरस्य यथा यथा यादृश उपासनं करोति तथा तथा तादृशं स तं तं फलं प्राप्नोति ।

भक्तिप्रह्वमहेन्द्रमुख्यमखभुक्प्रारब्धभूरिस्तव-
प्रादुर्भावितनिर्भरप्रमदया कारुण्यभाजा यया ।
निद्राभङ्गमवापितेन हरिणा दीप्तौजसा घातया-
मासाते मधुकैटभावतिबलौ सा केन वा वर्ण्यते ॥ ४३ ॥

**मन्त्री**—राजन्, तथ्यमेवाह भवान् । अस्याः किल भक्तवात्सल्यमनन्यतुल्यं पश्यामि ।

दूरोद्धूतविषाणकोटिघटनाचूर्णीकृताम्भोधरं
प्रेङ्खत्पादचतुष्टयीखुरपुटप्रक्षुण्णपृथ्वीतलम् ।
कल्पान्ताभ्रकठोरकण्ठनिनदत्रस्तत्रिलोकीजनं
विक्रान्तं महिषासुरं युधि पुरा चिच्छेद शूलेन या ॥ ४४ ॥

**देवी**—सा खु परमेसरी बहुविहदेवआसत्तिरूआवअवा पअण्डपरक्कमखण्डिअचण्डमुण्डधुम्मलोअणरत्तबीजप्पहुदिदाणवमण्डला सुणीअदि चण्डिआणामधेएत्ति । (क)

**राजा**—तदपि ज्ञायते । यथा खलु ।

शस्त्रच्छिन्नसुरारिसैन्यपिशितग्रासग्रहप्रीतिम-
त्कङ्कक्रोष्टरि संगरे सुरवधूमुक्तप्रसूने स्थितम् ।
देव्या शुम्भनिशुम्भदानववधप्रक्लिन्नचित्तस्तुव-
द्रुद्रेन्द्राग्निकृतान्तनैर्ऋतजलाधीशानिलश्रीदया ॥ ४५ ॥

**मन्त्री**—राजन्, एवं भक्तवत्सलयोरनादिदंपत्योरुपासनया संपादनीया सिद्धिः । किं च ।

सामर्थ्यसिद्ध्यै रसगन्धकानां संयोजनार्थं सकलौषधीश्च ।
संपादयामोऽथ तदाश्रितस्य सर्वौषधीशस्य विधोः प्रसादात् ॥ ४६ ॥

**देवी**—कदमं उण देसं पविसिअ उवासणिज्जा एदे । (ख)

---

(क) सा खलु परमेश्वरी बहुविधदेवताशक्तिरूपावयवा प्रचण्डपराक्रमखण्डितचण्डमुण्डधूम्रलोचनरक्तबीजप्रभृतिदानवमण्डला श्रूयते चण्डिकानामधेयेति ।

(ख) कतमं पुनर्देशं प्रविश्योपासनीयावेतौ ।

**मन्त्री**—पुण्डरीकपुरं प्रविश्य।

**देवी**—कहं तत्थ पवेसो। (क)

**मन्त्री**—देवि,

शक्यं तत्खलु पुण्डरीकनगरं गन्तुं मनोद्वारत-
स्तत्रास्ते शिवभक्तिरित्यनुपमा कापि प्रमोदास्पदम्।
दृष्ट्वा तां प्रथमं तथा परिचयस्तस्या विधेयस्त्वया
चत्वारोऽपि भवन्ति ते करतलं प्राप्ताः पुमर्था यथा॥ ४७॥

**राजा**—(सोत्कण्ठम्।)

तामद्वैतां स्वरूपेण भक्तिं हृदयरञ्जिनीम्।
स्वीकृत्याहं भविष्यामि प्राप्ताखिलमनोरथः॥ ४८॥

**देवी**—(सासूयमिव स्वगतम्।) कहं सव्वपुरुसत्थप्पसवित्तिआ सेत्ति सुणिअ सुदघणाघणगज्जिदो मोरो व्विअ उक्कण्ठिदो अज्जउत्तो। होदु। ता मए वि सह गन्तव्वम्। (प्रकाशम्।) अज्जउत्त, अहं वि आगमिस्सम्। (ख)

**राजा**—(स्वगतम्।) कथमनयाप्यागन्तव्यम्। (विचिन्त्य।) भवतु। (प्रकाशम्।) अयि भद्रे, भक्तिपराधीनं साम्बमुपास्यावामभिलषितमर्थं साधयावः। (मन्त्रिणं प्रति।)

राज्यं त्वयि समारोप्य योग्ये सर्वाङ्गसंहितम्।
देव्या सह शिवं साम्बमुपास्तुं यामि तत्पुरम्॥ ४९॥

**मन्त्री**—यथा रोचते देवस्य।

(इति निष्क्रान्ताः सर्वे।)

इति प्रथमोऽङ्कः।

---

(क) कथं तत्र प्रवेशः।

(ख) कथं सर्वपुरुषार्थप्रसवित्रिका सेति श्रुत्वा श्रुतघनाघनगर्जितो मयूर इवोत्कण्ठित आर्यपुत्रः। भवतु। तन्मयापि सह गन्तव्यम्। आर्यपुत्र, अहमप्यागमिष्यामि।

द्वितीयोऽङ्कः ।

(ततः प्रविशति चेटः कासः ।)

**कासः**—अहं खलु स्वमन्त्रिहतकोपदिष्टं किमपि रहस्यं शृण्वञ्जीवो नाम प्रतिराजा स्वस्मिन्किमपि चेष्टितुमन्तर्मुखस्तिष्ठतीति चारमुखादवगतवता संभ्रान्तेन महाराजेन यक्ष्मणा किमयं वृत्तान्तः श्रुतस्त्वया न वेति युवराजं पाण्डुं पृष्ट्वागच्छेति प्रेषितोऽस्मि । अतस्त्वरन्नितो युवराजसमीपं गच्छामि । अहो महाराजस्य युवराजे महती प्रीतिः । यतः ।

यद्यज्ज्ञातं स्वयं तत्तद्युवराजोऽपि वेत्ति चेत् ।
तदा राज्याधिकारेऽस्य शक्तिः स्यादिति मन्यते ॥ १ ॥

(पार्श्वतो विलोक्य ।) कथमियं छर्दिः । यैषा

प्रवालमृदुलाधरप्रकरचारुबिम्बप्रभा-
हृताहृतविलोचनाञ्जनविशेषदृश्यानना ।
मयूरपदकस्फुरत्कठिनतुङ्गपीनस्तनी
तरङ्गयति कौतुकं तरुणिमश्रिया चेतसि ॥ २ ॥

(स्मरणमभिनीय ।)

श्लथजलधरजालश्लिष्टशीतांशुबिम्बा-
नभिनवमुकुराविर्भूतमुक्ताकदम्बान् ।
दरतरलितचक्रद्वन्द्वखेलन्मृणाला-
न्विवशहृदयमस्या विभ्रमानन्वभूवम् ॥ ३ ॥

(सभयम् ।) तदियं मामवलोकयति चेदिदानीं विभ्रममूल्यमनुपयुज्य मां निरुन्धीत ततो गमनविघ्नः स्यात् । (इत्युत्तरीयपटेन मस्तकमवगुण्ठयन्नन्यतो गच्छति ।)

(प्रविश्य)

**छर्दिः**—अए सठ, रत्तिम्मि मुत्ताफलं परिपणीकदुअ पुरुसाइदं मए कारविअ दाणिं मं पेक्खिअ ओगुण्ठितसीसो बद्धकटी कुदो पलाएसि । (क)

(इति कासं हस्ते गृह्णाति ।)

---

(क) अये शठ, रतौ मुक्ताफलं परिपणीकृत्य पुरुषायितं मया कारयित्वा इदानीं मां प्रेक्ष्यावगुण्ठितशीर्षो बद्धकटिः कुतः पलायसे ।

**कासः**—मुञ्च मुञ्च । (इति हस्तं धुनोति ।)

**छर्दिः**—(इदं हस्तमवलम्ब्य ।) हदास, मह पडिण्णादं दाऊण गच्छेहि । (क)

**कासः**—हञ्जे, यावदागत्य दास्यामि ।

**छर्दिः**—कुदो आगमिअ । (ख)

**कासः**—धिङ्मूर्खे, नायमवसरः । पश्चात्कथयिष्यामि ।

**छर्दिः**—जइ दाणिं ण कहेसि अहं वि ण मुञ्चेमि । (ग)

**कासः**—तर्हि गृहाण मुक्ताफलस्य प्रतिनिधिमिमामूर्मिकाम् । (इत्यङ्गुलीयकं विमुच्य प्रयच्छति ।)

**छर्दिः**—इदं होदु । कुदो आगमिअ त्ति कहेहि । (घ)

**कासः**—किं मम वधमिच्छसि । यतः ।

कार्यं राज्ञां मन्त्रिभिर्मन्त्रितं यत्सर्वेषां तत्सर्वथा गोपनीयम् ।
येऽभिव्यञ्जन्त्येतदुद्यत्प्रमान्दाः शीर्षच्छेद्यांस्तन्वते तान्नरेन्द्राः ॥ ४ ॥

**छर्दिः**—जह तह होदु । एदं दाव कहेहि । (ङ)

**कासः**—(स्वगतम् ।) अहो दास्याः स्नेहपरिपाकः । यः परमनर्थाय संपद्यते । तथा हि ।

स्त्रियः स्वार्थपराः प्रायः परदुःखं न जानते ।
अप्रष्टव्यं यदप्राक्षीद्गृहिणी कैकयाधिपम् ॥ ५ ॥

(प्रकाशम् ।) राजकौलीनमेतदिति न कथयामि । मुञ्च । (इति त्वरयति ।)

**छर्दिः**—मा भयाहि तुमं । जं मञ्जूसा क्खु अहं राजकज्जाणं । अदो ण पआसेमि । (च)

---

(क) हताश, मम प्रतिज्ञातं दत्त्वा गच्छ ।

(ख) कुत आगत्य ।

(ग) यदीदानीं न कथयसि अहमपि न मुञ्चामि ।

(घ) इदं भवतु । कुत आगत्येति कथय ।

(ङ) यथा तथा भवतु । इदं तावत्कथय ।

(च) मा बिभेहि त्वम् । यन्मञ्जूषा खल्वहं राजकार्याणाम् । अतो न प्रकाशयामि ।

**कासः**—(विहस्य ।) छर्दिका किल त्वं प्रकृत्या । तत्कुतो न प्रकाशयसि ।

**छर्दिः**—(विहस्य ।) भसणसीलस्स कुक्कुरस्स विअ तुह जाआ अहम् । होदु । एदं कहेहि पत्थुदम् । (क)

**कासः**—(स्वगतम् ।) इयं राजकार्यकथननिर्बन्धान्न मुञ्चति माम् । का गतिः । (प्रकाशम् ।) हञ्जे, कथयामि । शृणु तावत् ।

**छर्दिः**—ओहिदम्हि । (ख)

**कासः**—मया कटकप्रवेशः कर्तव्यो युवराजस्य पाण्डोर्दर्शनाय ।

**छर्दिः**—ता किं विचारीअदि । अम्हकेरभडक्कन्ते सुगमो सत्तुणो पुरे मग्गो तुज्झ । सान्दणक्खत्ते णहे इन्दुणो व्विअ । (ग)

**कासः**—त्वं पुरोपरोधमात्रं जानासि । तत एवं ब्रवीमि ।

**छर्दिः**—किं अण्णं वि तत्थ कडए पउत्तं जं मए ण जाणीअदि । (घ)

**कासः**—श्रूयताम् ।

अस्मत्सैन्यैर्निरोधं कृतमगणयता स्वे पुरे सूपदिष्टं
जीवोऽमात्येन योगं स किल निशमयन्प्रापदन्तर्मुखत्वम् ।
इत्यस्माकं निशम्य प्रभुरतिविशदं चारवक्त्रात्कुमारं
गत्वा पृच्छ त्वयेदं विदितमथ न वेत्त्याकुलः प्राहिणोन्माम् ॥ ६ ॥

**छर्दिः**—जुवराएण पण्डुणा विदिदं ण वेत्ति णत्थि संदेहो । जेण एदं एव्व सुणिअ सअलसामन्तचक्केण सह सिद्धसेणिओ रहस्सागारे णिद्दाभङ्गकसाइदलोअणो चिन्तापज्जाउलो जुवराओ चिट्ठदि । तुए वि तत्थ

---

(क) भषणशीलस्य कुक्कुरस्येव तव जायाहम् । भवतु । एतत्कथय प्रस्तुतम् ।

(ख) अवहितास्मि ।

(ग) तत्किं विचार्यते । अस्मदीयभटाक्रान्ते सुगमः शत्रोः पुरे मार्गस्तव । सान्द्रनक्षत्रे नभसि इन्दोरिव ।

(घ) किमन्यदपि तत्र कटके प्रवृत्तं यन्मया न ज्ञायते ।

गच्छीअदु । णाह, पञ्च वि तुह वअस्सा सासा सेवातप्परा तह ज्जेव्व वट्टन्दि । (क)

**कासः**—कथमिदं ज्ञातं त्वया ।

**छर्दिः**—तुह पुव्वगिहिणीए कण्ठकण्डूए परिदेवणमुहेण देइए विसूचीए संणिहाणे सव्वं राअकज्जं णिवेदिदम् । तहिं संणिहिदथम्भन्तरिदाए मए सुदम् । (ख)

**कासः**—कुतः कीदृशं च परिदेवनं तस्याः ।

**छर्दिः**—जं तुए मं कामअन्तेण पुव्वगिहिणीए ताए पणअभङ्गो किदो तेण कादव्वं परिदेवणं क्खु ताए । तह खु कण्ठकण्डू देवीए कहिदवदी जं किल भट्टिणि, एदं मह दुज्जादं पण्डुगिहिणीए णिवेदिदुं गदम्हि । सा उण कालन्तरे एदं होदुत्ति जह तह मह अस्सुप्पमज्जणं किदवदी । तं जह–(ग) (स्मरणमभिनीय सभयम्, संस्कृतमाश्रित्य ।)

अस्यात्याहितकर्मणो व्यपगमे कासेन भर्त्रा समं
संधास्येत्यवतीं (?) तु तत्प्रियसखान्संप्रेषयन्ती रहः ।

---

(क) युवराजेन पाण्डुना विदितं न वेति नास्ति संदेहः । येनैतदेव श्रुत्वा सकलसामन्तचक्रेण सह सिद्धसैनिको रहस्यागारे निद्राभङ्गकषायितलोचनश्चिन्तापर्याकुलो युवराजस्तिष्ठति । त्वयापि तत्र गम्यताम् । नाथ, पञ्चापि तव वयस्याः श्वासाः सेवातत्परास्तत्रैव वर्तन्ते ।

(ख) तव पूर्वगृहिण्याः कण्ठकण्ड्वाः परिदेवनमुखेन देव्या विषूचिकायाः संनिधाने सर्वं राजकार्यं निवेदितम् । तत्र संनिहितस्तम्भान्तरितया मया श्रुतम् ।

(ग) यत्त्वया मां कामयमानेन पूर्वगृहिण्यास्तस्याः प्रणयभङ्गः कृतस्तेन कर्तव्यं परिदेवनं खलु तया ; तथा खलु कण्ठकण्डूर्देव्यै कथितवती यत्किल भट्टिनि, एतन्मम दुर्जातं पाण्डुगृहिण्यै निवेदितुं गतास्मि । सा पुनः कालान्तरे एतद्भवत्विति यथा तथा ममाश्रुप्रमार्जनं कृतवती । तद्यथा ।

इत्थं श्वासविलासिनीरुपगताः पञ्चापि हिक्काः सुखी-
कृत्य द्रागुपसान्त्व्य पाण्डुदयिता मां प्राहिणोत्कामला ॥ ७ ॥

तत्थ वि मन्दभाइणी अहं हदमणोरहा जादेत्ति । (क)

**कासः**—(विचिन्त्य ।) मा बिभेहि । ज्ञातस्तव भावः । त्वयि प्रणयस्य भङ्गे कण्ठकण्डूा यत्नः क्रियत इति गच्छामि तत्रैव तानपि वशीकुर्याम् । तेऽपि मद्भक्त्यैव पुष्टाः कथं मह्यं द्रुह्येयुः ।

**छर्दिः**—गच्छेहि कज्जसिद्धीए अहं वि देईए सकासं गमिस्सम् ।

(इति निष्क्रान्तौ ।)

प्रवेशकः ।

---

(ततः प्रविशति रहस्यागारस्थः सुप्तोत्थितः सचिन्तः पाण्डुः ।)

**पाण्डुः**—कः कोऽत्र भोः ।

(प्रविश्य)

**दौवारिकः**—विजयतां देवः ।

(पाण्डुर्निद्रालसो जृम्भते ।)

**दौवारिकः**—(आत्मगतम् ।) एष किल

आरक्तसंकुचदपाङ्गमुदग्रदंष्ट्रं
व्यादाय वक्रमुरुपाटलदीर्घजिह्वम् ।
उच्चैर्भुजौ वलयितौ ग्रथिताङ्गुलीकौ
कुर्वन्सशब्दमिह जृम्भणमातनोति ॥ ८ ॥

अपि च ।

जृम्भावसरे दारुणमाननबिम्बं सजिह्वमेतस्य ।
निपतितदीर्घकपाटं पातालद्वारमिव हि पश्यामि ॥ ९ ॥

(प्रकाशम् ।) देवस्य कीदृशो मयि नियोगः ।

**पाण्डुः**—गलगण्ड, सेनापतीनाहूय मम निकटं प्रवेशय ।

(गलगण्डो निष्क्रम्य त्रयोदशप्रकारान्संनिपातान्प्रवेशयति । सर्वे प्रविश्य प्राञ्जलयस्तिष्ठन्ति ।)

---

(क) तत्रापि मन्दभागिन्यहं हतमनोरथा जाता ।

तत्र **एकः**—सविचार इव दृश्यते युवराजः । तत्क्षणं जोषमास्यताम् । यदेषः

खट्वामङ्कविवर्तनेन लुलितक्षौमास्तरामावस-
न्वीटीं भृत्यकरार्पितामगमयन्वक्रं गृहीतामपि ।
उत्तानस्तिमिते दृशावपि चिरादुच्चैर्वितानेऽर्पय-
न्नत्यर्थं श्वसितोद्गमैर्विवृणुते चिन्तां निजान्तर्गताम् ॥ १० ॥

किं च पूर्वमपि ।

न स्नाति वारिषु चिरं त्वरितं दुकूलं
वस्ते विलम्बसहनो न कदापि भुङ्क्ते ।
भूषागणं वहति किं च विपर्ययेण
राजा युवैष हृदि कार्यविचारकृष्टः ॥ ११ ॥

**गलगण्डः**—(दण्डेन भूमिमाघट्टयन् ।) देव, सेनापतयः प्राप्ताः ।

**पाण्डुः**—(विलोक्य ।) भो भोः संनिपाताः, प्रतिराजस्य जीवस्य सकाशादस्मदीयराजस्य यक्ष्मणोऽधुना पराभवः संभावयिष्यत इति श्रूयते । स यथा न भवेत्तथा सैन्यैः सह संनद्धव्यं भवद्भिः ।

**संनिपाताः**—

अस्मादृशेषु बलशालिषु सैनिकेषु
राजन्नलं प्रभुपराभवचिन्तया ते ।
स्यात्किं वसन्तदिवसेषु विसृत्वरेषु
पद्माकरस्य तुहिनाभिभवप्रसक्तिः ॥ १२ ॥

कति कत्यस्मदीयाः सैनिकाः । तत्रैकैकस्य पराक्रमवतो युद्धाय न पर्याप्तमखिलं शत्रुसैन्यम् । किं पुनः सर्वेषाम् । श्रूयन्तां तावदस्मदीयाः ।

अष्टौ कुष्ठा दश च बलिनः प्लीहगुल्मास्तथाष्टौ
षट् चोन्मादा वसति दशकं पञ्चकं च व्रणानाम् ।
अर्शोभेदाः षडतिधृतयो[1] विंशतिश्च प्रमेहाः
किं चाश्मर्यो दश दश पुनः सन्ति सप्तातिसाराः ॥ १३ ॥

---

1. अतिधृतय एकोनविंशतिः.

(गलगण्डं प्रति ।) स्वामिनः कुमारस्य संनिधिं प्रापय सर्वानपि सैनिकान् ।

**गलगण्डः**—तथा । (इति निष्क्रम्य सर्वैः सह प्रविशति ।)

(सर्वे पाण्डुं प्रणम्य प्राञ्जलयस्तिष्ठन्ति ।)

**पाण्डुः**—एवं प्रवृत्ते राजकार्ये किं भवन्तो मन्यन्ते ।

तत्रादौ **कुष्ठाः**—

कार्या न चेतसि कुमार कदापि चिन्ता
स्थास्यन्ति के वद पुरः प्रतिगर्जतां नः ।
शत्रोः प्रविश्य पुरमीक्षितुमप्ययोग्यं
कुर्मो वयं तनुभृतामतिकुत्सनीयम् ॥ १४ ॥

**उन्मादाः**—सर्वे सैनिकास्तिष्ठन्तु । ज्ञायतामस्माकमभिप्रायः ।

कोपाध्मातककुत्स्थपुंगवकरव्याकृष्टगर्जद्धनु-
र्ज्यानिर्गत्वरमार्गणानलशिखादीने नदीने भृशम् ।
पाठीनान्कमठैः समं विलुठतः सर्वेऽनुकुर्वन्तु ते
शार्दूला इव शम्बरान्सरभसं यानद्य गृह्णीमहे ॥ १५ ॥

**व्रणाः**—स्वामिन्कुमार, प्रथमं पुरमेव बाधितव्यम् । तद्बाधया शिथिलीभविष्यत्यन्तर्मुखतापि जीवस्य । अत इदानीम्

प्रचण्डमदपाण्डवप्रहितकाण्डवर्गत्त्रुट-
त्तरक्षुकरिकेसरिप्रियकशल्यशार्दूलकम् ।
अरण्यमिव खाण्डवं घनसरण्यतीतं द्रुम-
व्रजं दहनहेतयः पुरमरेर्दहामो वयम् ॥ १६ ॥

सर्वेऽपि **अर्शोभेदाः**—स्वामिन्, यदुक्तं व्रणैस्तदस्मभ्यमपि रोचते । तेन वयं च निरुद्धमूलद्वाराः ।

गृह्णीयाम व्यथयितुमरेस्तत्पुरं येन सर्वे
व्याघ्राकृष्टा इव हि पशवः प्राणिनोऽसद्गृहीताः ।

---

१. समुद्रे. २. मृगभेदान्.

स्थातुं गन्तुं शयितुमशितुं यातुमाभाषितुं वा
नापेक्षन्ते मनसि दधतो दुःखमात्रानुभूतिम् ॥ १७ ॥

**प्रमेहाः**—स्वामिन्, अस्मासु विधेयेषु पुरोवर्तिषु किमर्थमन्येषां प्रस्तुतकार्यं प्रति प्रेषणम् । तत्क्रियतामस्मदुक्तिश्रवणादरः ।

**पाण्डुः**—वक्तव्यानि वो विवक्षितानि ।

**प्रमेहाः**—

संप्रस्रावात्परिणतिमसृङ्मांसमेदोस्थिमज्ज्ञां
व्यातन्वन्तो वयमनुदिनं तत्पुरं शोषयामः ।
क्रान्तर्वक्रो भवतु विधुरीभूय जीवः क्व मन्त्री
तत्साहाय्यं कलयतु भवांस्तद्विषादं जहातु ॥ १८ ॥

**अश्मर्यः**—सर्वे सैनिकाः स्वस्वबलानुरूपं गर्जन्ति । स्वामिन्, न वयं गर्जनपराः । किं तु भूतार्थवादिन्यः ।

वर्धिष्यते न यावत्स हितः सर्वैर्भटैर्निजैर्वैरी ।
तावन्निग्रहणीयः श्रेयस्कामेन पुरुषेण ॥ १९ ॥

तथा हि ।

वेलालङ्घिप्रसर्पत्तटविटपिसमुत्पाटनाटोपमूर्छ-
त्कल्लोलाक्रान्तपृथ्वीवलयजनलयोल्लेखसंत्रस्तलेखः ।
अम्भोधिर्मा जनीति प्रतिकलमुदयद्वारिभूरीभविष्य-
न्नूषत्यह्नाय वह्निर्विघटितवडवावक्त्ररन्ध्रादुदञ्चन् ॥ २० ॥

**पाण्डुः**—युक्तमुक्तं भवद्भिः ।

**अतीसाराः**—स्वामिनः कृपयैव भुजप्रतापं दर्शयन्तो वयं विजेष्यामह इति किमत्र चित्रम् । अतः किमपि ब्रूमः । विदांकरोतु स्वामी ।

नेत्रे मज्जयितुं मुखं ग्लपयितुं जत्रुद्वयं व्यञ्जितुं
पार्श्वास्थ्नां गणनीयतां गमयितुं सत्त्वं भृशं लुण्ठितुम् ।
सत्त्वेऽपि निजे स्थिते वटयितुं पञ्चत्वमेवाङ्गिनां
शक्तान्नः प्रहिणोषि यत्र तरसा तत्साधयामो वयम् ॥ २१ ॥

**पाण्डुः**—(सबहुमानम् ।)

अतिसारा इति स्पष्टं विष्टपत्रयविश्रुतम् ।
युष्मन्नामैव युष्माकं ब्रूतेऽतिशयितं बलम् ॥ २२ ॥

**गुल्मप्लीहानः**—श्रूयतां स्वामिना ।

अस्मासु प्रविशत्सु शात्रवपुरं पीडाकरेषु द्रुतं
कार्याकार्यविवेक एव न भवेदल्पोऽपि तस्मिन्क्षणे ।
आस्तामेतदिदं वचो निशमय क्षन्तुं व्यथामक्षमो
विज्ञानेन च मन्त्रिणा सह पुराज्जीवः पलायिष्यते ॥ २३ ॥

**पाण्डुः**—अस्मत्सैनिकोपरुद्धे पुरे पिपीलिकापि न प्रसरीसरीति, कुतः पुनरियं तस्य पलायनशङ्का । परंतु सर्वैरिदमाकर्णनीयम् । नीतिशास्त्रानुसारिणि मन्त्रिणि तदनुरक्ते विक्रमाभिमानरक्षणैकपरे द्विजदेवपोषणैकतानमानसे राजनि तस्मिन्निपुणं किमपि प्रतिविधानमनुसंधेयम् । अंतः प्रागेवातर्क्यं किंचिदत्याहितहेतुस्तदीयान्तर्मुखतेति ।

**कुष्ठेष्वेकः**—(स्वगतम् ।) प्रागस्माभिः प्रेषितः शत्रुशिबिरं प्रविष्टः कर्णमूलोऽद्यापि नागतः किं तैर्गृहीतः स्यात् ।

(ततः प्रविशत्यध्वश्रान्तः कर्णमूलः ।)

**कर्णमूलः**—(दृष्ट्वा ।) एतत्खलु

तत्तत्कार्यनिवेदनार्थमिलितान्योन्यानभिज्ञस्पश-[1]
प्राप्तव्यावसरप्रतीक्षणकृतद्वाःपार्श्ववेद्यासिकम् ।
अन्तर्मन्दिरनिःसरज्जनवचोविज्ञाप्यमानप्रभु-
व्यापारश्रवणेप्सुबाह्यमनुजं पश्यामि पाण्डोर्गृहम् ॥ २४ ॥

(द्वाःस्थं प्रति ।) गलगण्ड, कथय कर्णमूलं संप्राप्तं माम् ।

(गलगण्डः प्रविश्य निष्क्रम्य कर्णमूलेन सहान्तः प्रविशति ।)

**कर्णमूलः**—(आत्मानं दृष्ट्वा स्वगतम् ।)

श्रमाम्भःसंसिक्तालिकललितपुण्ड्राङ्कवदनो
द्रवच्चर्मोपानद्दृढपिहितपार्श्वाञ्चलपटः ।

---

१. स्पशश्वरः.

समुद्यन्निःश्वासप्रसरपरिशुष्काधरपुटो
विलङ्घ्याहं दीर्घां सरणिमगमं पाण्डुसविधम् ॥ २९ ॥

(पाण्डुं दृष्ट्वा ।) कुमार, विजयी भव ।

**पाण्डुः**—भद्र, किम् । किंचिदुपलब्धं तत्र भवता प्रविष्टेन ।

**कर्णमूलः**—किं सफलो न भविष्यति कुमारनियोगो विशेषोपलम्भेन।

**पाण्डुः**—कथय ।

**कर्णमूलः**—श्रूयताम् । उपरुद्धमस्मत्सैनिकैः पुरम् ।

**पाण्डुः**—किमेतत्परिज्ञानाय प्रेषितोऽसि । विदितं खल्विदं सर्वेषाम्।

**कर्णमूलः**—(सर्वतो विलोक्य ।) एतदेव प्रस्तोतुमयमवसरः ।

**पाण्डुः**—विस्रब्धं कथय । किं न जानासि अस्मच्छरीराण्येव कीलैते।

**कर्णमूलः**—देव, भवदाज्ञया प्रविष्टोऽस्मि पुण्डरीकपुरम् । तत्राद्राक्षं च सन्निरीक्षणैकपरे ईक्षणे । निगमार्थश्रवणप्रसिते श्रवसी । शिवनिर्माल्यगन्धसंतर्पितं घ्राणम् । विघसामृतास्वादनैकतानां रसनाम् । त्रेताभस्मावगुण्ठितां त्वचम् । धर्मार्थसंग्रहीतारौ करौ । तदर्थं कृतसंचरणौ चरणौ । चिरंतनसरस्वतीचिकुरपरिमलामोदसदनं वदनं च । तद्दर्शनेन क्वचिदपि स्थलमलभमानः स्थातुमपि नाशक्नुवम्, किं पुनर्देवस्याज्ञां परिपालयितुम्।

**कुष्ठः**—(विहस्य ।) अनासारवर्षणमजागलस्तनसमवस्थं तव गमनागमनं च ।

**संनिपातः**—कुष्ठ, सावशेषमिव तव वचनम् ।

**कुष्ठः**—स्वामिपोषितस्वकलेवरनिरर्थकता च ।

**कर्णमूलः**—जाग्रति मच्छिरसि महाराजपादपङ्कजरेणौ कथमेतद्भविष्यति ।

**पाण्डुः**—ततस्ततः ।

**कर्णमूलः**—ततश्च ।

तस्मिन्पुरे स्थानमहं विवेक्तुं चरन्समन्तात्क्वचिदप्यपश्यम् ।
त्रिष्वाशयेषु स्थितिमत्स्वशङ्कं संचारितं केन च पङ्गुयुग्मम् ॥ ३६ ॥

**पाण्डुः**—(स्वगतम् ।) वायुसंचार्यमाणं कफपित्तयोर्युगं तद्भवेत् । (प्रकाशम् ।) ततस्ततः ।

**कर्णमूलः**—तस्मादन्तःपुरचारिणः पङ्गुयुग्मात्तत्संचारयतः पुरुषाच्च प्रवृत्तिरुपलब्धुं शक्येति तच्च तं चोपासर्पमहम् । स च तच्च मयि दृष्टमात्रे

भद्र गच्छ परिसर्प मा कुतो देशतस्त्वमसि नन्विहागतः ।
कस्य वा वद परिग्रहो भवानित्यपृच्छदथ सोऽपि तच्च माम् ॥ २७ ॥

भो भो भद्रमुखाः परिग्रहतया कस्यापि नाहं स्थितो
रात्रिं नेतुमिहागतोऽस्मि नियतं सायाह्नि भिक्षामटन् ।
स्थानं मे यदि शक्यतेऽपगतये प्रान्त(?)स्तदादीयता-
मित्युक्ते तु मया तदन्तरुदभूदन्योन्यमालोचना ॥ २८ ॥

अनन्तरं च कार्यान्तरव्यापृते च राजनि नूतनपुरुषपरिमार्गणपरे च नागरिके, भिक्षो, रात्रौ नावसरस्त्वादृशामत्र शयितुमित्युक्तवत्सु तेषु, क्व कार्ये राजा व्याप्रियते कुत एवं भिक्षुकाणामप्युपरोध इति पृष्टवानस्मि ।

**पाण्डुः**—ततस्ततः ।

**कर्णमूलः**—तेऽपि मां भद्रेत्यामन्त्र्य समकथयन् ।

पुण्डरीकपुरे मन्त्रिप्रेरितः परमेश्वरम् ।
आराद्धुं गतवान्राजा मनोद्वारेण तिष्ठति ॥ २९ ॥

किं च ।

शत्रुनिरुद्धे च पुरे परिसर्पाशङ्कया नगरगुप्त्यै ।
नागरिकशिक्षणमिति प्रावोचन्मां तदानीं ते ॥ ३० ॥

अत्रान्तरे विजृम्भमाणं यामिककलकलमशृणवम् । श्रुत्वा च कथंचिल्लब्धावकाशः स्वामिकार्यगौरवादागतोऽस्मि ।

**पाण्डुः**—(आकाशे लक्ष्यं बद्ध्वा सोपहासम् ।) रे रे मन्त्रिहतक, असज्जयार्थं सहजवैरिणं रसं साधयितुं किल तव प्रयत्नः । तर्हि पश्य ।

साधितोऽपि स किं कुर्याद्रसः पथ्यक्रमं विना ।
जिह्वाचापलमुद्भाव्य स एव ध्वंसयिष्यते ॥ ३१ ॥

किं च । भक्त्या त घटयित्वा चतुरोऽपि पुमर्थांस्तस्य साधयितुं किलाय-मपरो यत्नस्तत्रापि प्रतिविधास्यते ।

**कर्णमूलः**—(सप्रश्रयम् ।) देव, युगविगमसमयसमसमुदितमार्तण्डमण्डल-स्येवाखण्डितप्रतापस्य तवापि कियान्स रसः शोषण इव तस्य (?) तव किं महिमातिशयः । तथाहि ।

दृष्ट्वा वैरिचमूसमूहमवशादुद्वेलमुज्जृम्भित-
क्रोधात्संगररङ्गसीमनि भवत्यद्धा निबद्धादरे ।
जीवः कः क्व च तस्य मन्त्रिहतको विज्ञानशर्मा पुन-
र्दृश्येरन्क्व तृणाग्नितुल्यमहसस्तस्याल्पसारा रसाः ॥ ३२ ॥

**पाण्डुः**—आः, अस्त्वेतत् । भद्र, कथय कीदृशी प्रकृतीनां प्रवृत्तिः ।

के स्वामिनि दृढभक्ता के प्रबलाः के च दुर्बला नगरे ।
अरिमित्रोदासीनाः के पुनरङ्ग त्वया दृष्टाः ॥ ३३ ॥

**कर्णमूलः**—कथयामि देव, श्रूयताम् ।

तत्र प्रकृतयस्तिस्रो वातपित्तकफात्मकाः ।
तत्र यः प्रबलो वातः स तु स्नेहैर्वशीकृतः ॥ ३४ ॥

किं च ।

तदनुगतं यत्पित्तं मधुरमयैस्तद्विजेयमुपचारैः ।
पङ्गुर्यस्तत्र कफस्तीक्ष्णोपायैर्वशं स चानीतः ॥ ३५ ॥

**पाण्डुः**—अथ कीदृशो मनसो वृत्तान्तः ।

**कर्णमूलः**—

उद्दामबुद्धिविभवेन मनस्तु तत्र
विज्ञानशर्मसचिवेन वशीकृतं सत् ।
कार्ये महत्यधिकृतं हितकारिराज्ञः
सर्वात्मनाप्यनुसरत्यधुना तमेव ॥ ३६ ॥

**पाण्डुः**—अथ विज्ञानशर्मस्पार्धिनो ज्ञानशर्ममन्त्रिणः कीदृशः प्रकारः ।

**कर्णमूलः**—

विज्ञानमन्त्रिमन्त्रैर्विविधैरसकृद्विधूतनिजशक्तिः ।
स ज्ञानशर्ममन्त्री तिष्ठति केवलमसौ स्वरूपेण ॥ ३७ ॥

एवंविधविविधविचित्रचरित्रविस्मापितसकललोकस्य स्वामिहितकरणैकतानस्य मन्त्रिणः पारे खलु वाङ्मनसोश्चरिताद्भुतानि । तथाहि ।

तत्तद्दुर्घटराजकार्यघटनाव्यापारपारीणया
शक्त्या दुष्प्रसहस्य तस्य वचनैर्नानोपपत्त्यन्वितैः ।
निर्द्वन्द्वोऽपि स निर्गुणोऽपि च निराकारोऽपि निर्लेपनो-
ऽप्याः कष्टं प्रतिपक्षतामुपगतो जीवो विचेष्टेत नः ॥ ३८ ॥

तस्मादेवंस्थिते प्रकृतिमण्डले दुर्भेद्ये च शत्रुपक्षे महदत्याहितमापतिष्यति । (इति भयं नाटयति ।)

**पाण्डुः**—(विचिन्त्य ।) मा बिभिहि । तत्रापि काचिदस्त्यबाधिता नीतिः ।

**कर्णमूलः**—कीदृशी ।

**पाण्डुः**—श्रूयताम् ।

यच्चञ्चलं प्रकृत्या विषयेषु मनो निसर्गदुर्दान्तम् ।
तत्कामादिभिरेतैर्भेदयितुं शक्यते शनकैः ॥ ३९ ॥

तस्मिन्सर्वविषयाधिष्ठाने मनसि स्वाधीने सुकर एव कार्यशेषः । किं च याः किलाद्यास्तत्र तिस्रः प्रकृतयस्तासु यस्तीक्ष्णोपायैः संयमितवृद्धिः श्लेष्मा तस्योपचयं केनाप्युपायेन विधाय तेनैव तावपि क्षोभयितुं शक्येते ।

विज्ञानोऽयं यद्यपि स्वामिभक्तस्तत्राप्यस्यासंनिधाने विविक्ते ।
भेदो राज्ञस्तस्य तैस्तैरुपायैः शक्यः कर्तुं ज्ञानशर्मोपजापैः ॥ ४० ॥

एवं राजमन्त्रिणोर्विरोधेन विश्लिष्टे प्रकृतिमण्डलेऽचिरादेव हस्तगता महाराजस्य यक्ष्मणो जयलक्ष्मीः ।

**कर्णमूलः**—(सहर्षम् ।) साधु चिन्तिता मन्त्रिवर्येण राजतन्त्रनीतिः ।

**पाण्डुः**—भद्र, नाद्यापि महाराजनिकटगतोऽत्रायाति कासः ।

(प्रविश्य)

**गलगण्डः**—देव, महाराजपादमूलात्कासः प्राप्तः ।

**पाण्डुः**—त्वरितं प्रवेशय ।

(ततः प्रविशति गलगण्डेनानुगम्यमानः कासः।)

(कासो जानुभ्यां प्रणम्य किंचिदुपसर्पति।)

**पाण्डुः**—भद्र, कीदृशो मयि राजनियोगः।

**कासः**—(करपिहितमुखः। कर्णे।) एवमेवम्।

**पाण्डुः**—भद्र, तदर्थमेवेयं बद्धपरिकरता। तिष्ठ त्वमत्रैव। राजानमिममुदन्तमन्यमुखेन प्रापयिष्ये।

(नेपथ्ये यामप्रहारध्वनिः।)

**पाण्डुः**—(श्रुत्वा सैनिकान्प्रति।) तदहमिदानीं कार्यशेषं निर्वर्त्य प्रकृतकार्यार्थं संनह्यामि। भवन्तोऽपि तावत्

बिभ्राणास्तान्युपमितमहाभोगिभिर्बाहुदण्डै-
र्येषां येषां दधति निजतां यानि यान्यायुधानि।
स्वस्वस्थानेष्ववहितमनोवृत्तयस्त्यक्तशङ्काः
सर्वे तिष्ठन्त्वरिपुरमभिव्याप्य सैन्याः प्रवीराः॥ ४१॥

(इति निष्क्रान्ताः सर्वे।)

इति द्वितीयोऽङ्कः।

---

## तृतीयोऽङ्कः।

(ततः प्रविशति पश्चाद्बद्धं पुरुषं किंकरेण विकर्षन् विचारो नागरिकः।)

**नागरिकः**—अङ्ग गद, कस्त्वमसि।

**पुरुषः**—(स्वगतम्।) किमहं ज्ञातोऽस्म्यनेन गद इति।

**नागरिकः**—किं विचारयसि। यदि सत्यं गदोऽसि ततो मोक्ष्यसे।

**पुरुषः**—(स्वगतम्।) नाहमनेन ज्ञातः।

बिभ्राणो मुखबाहुवक्षसि कृतं पुण्ड्रत्रयं भस्मना
हस्तोपात्तविशुद्धताम्रकलशो रुद्राक्षमाली गले।
धृत्वा वैदिकवेषमाविशमिह स्वस्वामिना प्रेरितो
हृद्रोगोऽहमरेरवेक्षितुमना जीवस्य राज्ञः स्थितिम्॥ १॥

अनन्तरमनेन नागरिकेण संयमितः। भवतु। एवं ब्रवीमि। (प्रकाशम्।) आर्य, मुञ्च माम्। विप्रश्निकतामुपजीव्येदं जठरहतकं पुष्णामि।

**नागरिकः**—अस्त्वेतत् । कुतो रात्रिसंचारः ।

**पुरुषः**—यस्यकस्यचिद्यत्किंचिद्भाविफलमुक्त्वा पारितोषिकं गृह्णामीति ।

**नागरिकः**—किं दिवसस्ते तत्कर्मणो न पर्याप्तः ।

**पुरुषः**—बाढम् । श्रूयताम् ।

यामो यात्यविलम्बितं दिनमुखे स्नानादिभिः कर्मभिः
पश्चाद्भिक्षितुमारभे प्रतिदिनं धान्यानि वा तण्डुलान् ।
तैरन्नाद्युपपाद्य धूर्जटिमुखान्देवान्निवेद्यातिथी-
न्संतर्प्याश्नत एव याति दिवसः शेषः कुतः संचरः ॥ २ ॥

**किंकरः**—अये, युक्तमिदम् । इह तु यामादूर्ध्वं रुध्यते नगरसंचारः ।

**पुरुषः**—यदीदानीं यामादूर्ध्वं कालस्तर्हि न संचरामि स्वप्स्यामि ।

**किंकरः**—कुत्र निद्रास्थानम् ।

**पुरुषः**—धर्मशालायाम् ।

**नागरिकः**—किमिदं राजमन्दिरं तव धर्मशाला । अत्र हि

नोंकारः पुवते न गीतिरटति स्वाहेति न श्रूयते
न न्यायव्यवहारतारवचसः संघीभवन्ति द्विजाः ।
नात्युच्चैः पृषदाज्यहोमसुरभिर्धूम्या जरीजृम्भते
भक्ताः पञ्चजनाः स्वपन्ति परितो न स्त्री कुमारो न च ॥ ३ ॥

**पुरुषः**—अस्त्विदं राजमन्दिरं तथापि सुप्रवेशमस्मादृशामिति श्रुतमस्ति ।

**नागरिकः**—सुप्रवेशमिति कस्मात्त्वया श्रुतम् ।

**पुरुषः**—आर्यमिश्रेभ्य एव ।

**नागरिकः**—हन्त, किमस्माभिरिदं कथितम् ।

**पुरुषः**—नहि नहि । अन्यजनैः ।

**नागरिकः**—कैस्ते कथितम् । यदिदं परिचितजनस्यापि राजशासनमन्तरेण दुष्प्रवेशम्, किं पुनरपरिचितस्य ते ।

**किंकरः**—विसंस्थुलेवास्य वचनव्यक्तिः गृहीत इव चोरस्तरलतारकविलोचनः पश्यन्नयं वक्तुं न शक्तः प्रत्युत्तरं ततश्चर इव लक्ष्यते ।

**नागरिकः**—तर्हि शिक्षयतु भवानिमम्।

**किंकरः**—अरे, कथय तथ्यम्। मृषावादिनस्तव वैदिकता राजशासनस्य न प्रतिरोधिनी। (इति कशामुद्यच्छति।)

**पुरुषः**—मा ताडय। तथ्यं वदामि।

**नागरिकः**—यदि तथ्यं वदसि तदा विज्ञानमन्त्रिणं दर्शयित्वा संभावयिष्यामि।

**किंकरः**—प्रतीहार्या धारणया सह प्रासादमधिरूढो मन्त्री। तत्संनिधौ त्वमपि नेष्यसे।

**पुरुषः**—(स्वगतम्।) तथा चेन्मम दुर्लभमेव जीवितम्। (प्रकाशं भीतिमभिनीय।) अभयं मे दीयतां यदि तथ्यमेव श्रोतव्यम्। (इति प्रणमति।)

**नागरिकः**—दत्तभयोऽसि। कथयात्मानम्।

**पुरुषः**—(उत्थाय प्राञ्जलिः।) हृद्रोगोऽस्मि। विसृज मां दयया।

**नागरिकः**—चार एवायं वैदिकवेषमवलम्ब्यागतो दत्ताभयश्च।

**किंकरः**—तर्हि किं कर्तव्यम्।

**नागरिकः**—'सर्वमिदं राजकार्यं त्वया कस्मैचिदपि न कथनीयम्' इति शपथं गृहीत्वा पुराद्बहिर्विसृज्यताम्। अथवा किमनेन वराकेण कथनीयम्। दत्ताभयोऽयमिति मन्त्रिणे निवेद्य कथंचिन्मोचयितव्यः।

**किंकरः**—तथा करोमि। (इति निष्क्रान्तः।)

(नेपथ्ये कुक्कुटध्वनिः।)

**नागरिकः**—(आकर्ण्य।) कथं रजनीविरामः।

(पुनर्नेपथ्ये)

**वैतालिकः**—

पत्यावस्तं व्रजति विगलच्चञ्चरीकाञ्जनाश्रु-
त्रासान्मीलद्दलदृशमितो रागमर्कक्रमेण।
द्रागालिङ्गेदपि कुमुदिनीमित्यपन्यायशङ्की
कूकूशब्दं विसृजति जवात्कुक्कुटः पूर्वमेव॥ ४॥

**द्वितीयो वैतालिकः**—
राग मुखेन दरदर्शिततारकेण
मां व्यञ्जतीमपि समेत्य करेण गाढम् ।
आलिङ्ग्यते कुमुदिनीति रुषापराद्ध्रिं
यातां निशां द्रुतमनुव्रजतीव चन्द्रः ॥ ५ ॥

अपि च ।

प्रातर्जातमिति द्रुतं प्रशिथिलं बद्ध्वा दुकूलं दृढं
धम्मिल्लं च्युतमाल्यमप्युपवनान्निर्गत्वरीरित्वरीः ।
आकृष्टांशुकपल्लवे कठिनयोरालिङ्ग्य वक्षोजयो-
राघ्रायाननपङ्कजे च कथमप्युज्झन्त्यहो कामिनः ॥ ६ ॥

**नागरिकः**—तदधुना राजकार्ये चावहितस्तिष्ठामि। (इति निष्क्रान्तः ।)

शुद्धविष्कम्भकः ।

---

(ततः प्रविशति प्रासादाधिरूढः प्रतीहार्या धारणया दर्शितमार्गो मन्त्री ।)

**मन्त्री**—संप्रति हि

सोपानानि हिरण्मयानि परितः प्रत्युप्तरत्नान्यहं
पादाभ्यां समतीत्य किंकरगणालम्बी स्वयं पाणिना ।
भित्तिष्वालिखितैर्वृतं खगमृगस्त्रीपुंसवृक्षाचलै-
रारुक्षं निटिलाक्षशैलधवलं प्रासादमभ्रंलिहम् ॥ ७ ॥

(विचिन्त्य स्वगतम् ।) अहो दुरन्तता राजधर्माणाम् ।

आत्मानं परिरक्ष्य दुष्करतपोवृद्धद्विजाराधनै-
र्दानीयेषु च भक्तिपूर्वमसकृद्दानप्रदानैरपि ।
दण्डं दण्डयितव्यमात्रविषयं कृत्वा धरित्रीतले
राज्ञा धर्मपथे मतिं क्रमयता संरक्षितव्याः प्रजाः ॥ ८ ॥

किं बहुना ।

स्वश्रेयसार्थं यततेऽनिशं यो राज्ञा किलानेन पृथग्विमर्शः ।
स्वस्मिन्नमात्येषु सुहृत्सु राष्ट्रे दुर्गेषु कोषेषु बलेषु कार्यः ॥ ९ ॥

निर्ज्ञातसर्वतन्त्रेषु विगूढामोघमन्त्रेषु मन्त्रिषु विन्यस्तसमस्तकार्यभरस्य तु राज्ञो निश्चिन्ततैव। परंतु तेषां व्याकृष्यन्ते दुरन्तया चिन्तया हृदयानि।

सामन्ताविनमेयुरित्युपचयः कोषस्य सिध्येदिति
स्थानेषु द्विषतां स्थितीरपि चराः पश्येयुराप्ता इति।
स्यादायोपगमो यथेति विभवैस्तुष्टाः प्रवीरा भटा
वर्तेरन्निति मा मलिम्लुचगणाद्भूरुद्विजेतेति च॥ १०॥

अहमपि राज्ञा विन्यस्तसमस्तकार्यभारतया यत्सत्यं व्याकुल एव। तथा हि।

कार्येषूक्तेषु राज्ञा कतिचिदपि मया साधितान्येव पूर्वं
साधिष्यन्ते परस्तात्कतिचन कतिचिच्चापि साध्यन्त एव।
किंचानुक्तेषु सद्यः किमपि किल कुशाग्रीययात्मीयबुद्ध्या
पर्यालोच्यैव तत्तत्समयसमुचितं कर्तुमुत्कण्ठितोऽस्मि॥ ११॥

अत एव सर्वत्र तत्रतत्र व्यापृते मया पुरगुप्त्यै मत्सदृश एव कोऽपि विनियुक्तो विचारनामा नागरिकः। तत्प्रकृतकार्ये व्यापृतव्यम्। कः कोऽत्र भोः।

(प्रविश्य।)

**दौवारिकः**—विजयतां देवः।

**मन्त्री**—भद्र, मद्वचनेनानुशासनीयाः पौरा नगरालंकाराय।

आलिम्पन्तां सुधाभिः पुरसदनगता भित्तयो भृत्यवर्गै
रम्भास्तम्भाः क्रियन्तां कपिशफलभृतः पार्श्वयोर्द्वारभूमेः।
बध्यन्तां तोरणानि श्रितनवमणिभिर्दामभिः सन्तु रथ्याः
संमृष्टाश्चाम्बुसिक्ताः प्रतिगृहमुपरि ग्रथ्यतां केतनाली॥ १२॥

यतः संप्रत्येव सिद्धप्रतिज्ञो राजा समागमिष्यति।

**दौवारिकः**—यदाज्ञापयत्यार्यः। (इति निष्क्रान्तः।)

**मन्त्री**—(सदृष्टिक्षेपं परिवृत्यावलोक्य च।) अहो रिपूणां पुरावस्कन्दनप्रकारः। तथा हि। पाण्डुना प्रेरिता रोगाः,

मूर्धानं व्याप्तुकामाः शतमथ नवतिर्लोचने चाधिचत्वा
　नासामष्टादशास्यं खलु चतुरधिका सप्ततिर्हृच्च पञ्च ।
वक्षोजौ पञ्च शूलैः सह समगणनैः कुक्षिमष्टौ च गुल्माः
　स्वार्हस्थानान्युपेतं त्रिगुणगणनया पञ्चकं च व्रणानाम् ॥ १३ ॥

अथ च स्वयमेव मन्त्रिभूतस्य युवराजस्य पाण्डोः पुरोपरोधवैचित्री वाचामतिवर्तते पन्थानम् । (सामर्षं सावहित्थं चाकाशे ।) साधु मन्त्रिधुरीण, साधु । अनया गुप्तप्रयोगप्रकारगौरवया धिषणया शौर्येण च दैत्यगुरुं वृषपर्वाणं चाधिशेषे । (सोपहासम् ।) मयि— (इत्यर्धोक्ते विरमति ।)

**धारणा**—(सस्मितम् ।) अमच्चस्स वाक्यसेसेण तक्कीअदि धीरोदत्तत्तणम् । (क)

**अमात्यः**—अस्खलितासाधारणकार्यावधारणधौरेयस्खलितानि तव मनीषितानि भवन्ति । (इति पुरो विलोक्य ।) अहो नगरालंकारचातुरी पौराणाम् ।

कीर्णान्यम्बुपृषन्ति किंकरगणैरभ्यन्तरे ताडिता-
　न्यातोद्यानि निकेतकेकिनटनप्रारम्भमूलानि च ।
बद्धा मन्दिरमार्गसीमसु हसन्नाथापनीतांशुक-
　व्यक्तोरोजसलज्जसिद्धयुवतिव्याकृष्टचेलध्वजाः ॥ १४ ॥

अपि च ।

मन्ये रम्भाः पुरमृगदृशामूरुसौभाग्यचौर्या-
　द्बद्धा भृत्यैः प्रतिगृहमपि द्वारपार्श्वद्वयेषु ।
अम्भोदुर्गात्कथमपि हृता यन्त्रितोच्चैर्विताने
　तासां वक्राम्बुजपरिमलग्राहिणी पद्ममाला ॥ १५ ॥

किं च । सुधालेपधवलीकृतसौधवसतयः पौरयुवतयः शारदाभ्रगतपरमाद्भुततडिल्लताविभ्रममुद्भावयन्ति । किं च, चञ्चरीकगणश्चित्रलिखितसहकारमञ्जरीकलितोत्कलिकया संचरमाणोऽपि कदर्यमवनीपतिमुपगतो वनीपकलोक इव निष्फल एव निवर्तते । कतिचन निकेतनानि च नूतनालि-

---

(क) अमात्यस्य वाक्यशेषेण तर्क्यते धीरोदात्तत्वम् ।

खितेनाहिनकुलेनाश्वमहिषेण गोव्याघ्रेण च भित्तिषु निर्वैरसत्त्वान्यनुकुर्वन्ति चत्वराणि तपोधनाश्रमपदस्य । (अन्यतोऽवलोक्य सहासम् ।)

दृष्ट्वाकृष्टकचामुदस्तचिबुकां पत्या कराभ्यां बला-
त्कामप्येणदृशं करौ विधुवतीमास्वाद्यमानाधराम् ।
आलेख्ये पुरशिल्पिना विरचितां भित्तौ बहिर्मन्दिरा-
न्नार्यः सस्मितनम्रवक्त्रकमलाः कर्षन्ति यूनां मनः ॥ १६ ॥

नन्विदानीमत्र नगरालंकारदर्शिनो राज्ञः समागमं प्रतीक्षमाणाः पौरास्तस्य परमुपचाराय संनह्यन्ति । तथा हि ।

स्थाप्यन्ते गृहवासवेदिषु घटाः संवेष्टितास्तन्तुभिः
प्रत्यग्राम्रदलप्रसाधितमुखा विप्रैः पयःपूरिताः ।
कन्याभिर्घृतसिक्तवर्तिनिकरैर्नीराजनाभाजनैः
साध्यन्ते सममेव लाजसुमनश्चित्राणि पात्राणि च ॥ १७ ॥

(विचिन्त्य ।) कथमसौ राजा लिप्सितं फलं लब्ध्वा समायास्यति । कथमस्य साम्बशिवप्रसादमन्तरेण लिप्सितफललाभः । कथं वा कठोराणि तपांसि विनानेन सुलभः शिवप्रसादः । कथमनेन स्वकालविकस्वरशिरीषदलकोमलशरीरेण सुकरा कठोरा तपश्चर्या । न चैतस्य तादृशतपश्चरणादृतेऽखिलपुरुषार्थसाधनं भगवतश्चन्द्रकलावतंसस्य निरन्तरध्यानं संभाव्यते । नलिनीदलान्तरालतरलोदबिन्दुसमस्यन्दा दुर्निरोधा हि चित्तवृत्तयः । तदिदानीं मदीयमन्तःकरणं दुरन्तचिन्तोदधौ निमज्य पुनरुन्मज्जति । अथवा कस्य किमसंभावितमनुकूलतामुपगते दैवे । (दक्षिणभुजस्पन्दमभिनीय ।) कथमस्थाने मम विचारः । सर्वं सुघटितं भविष्यति ।

(नेपथ्ये)

**वैतालिकः**—

वातं प्रावृषिकं निरुध्य सहसा गात्रप्रकम्पप्रदं
संफुल्लानि विधाय चारुकमलान्यासाद्य हंसागमम् ।
दिष्ट्या लब्धवता प्रसादमधिकं वापीजलाधारयोः
सद्यः शारदवासरेण धवलो मेघोऽम्बरं प्रापितः ॥ १८ ॥

**मन्त्री**—(श्रुत्वा सहर्षम् ।) समद्युत(?)प्राणनिरोधेन निर्धूतसकलतपोविघ्नेन विशुद्धाद्वैतज्ञानसाधनेन समाराधितयोर्धूर्जटिधरराजकन्ययोः प्रसादेन राज्ञा रसो हस्तगतः कृत इत्यनेन वैतालिकवचनेन सूच्यते ।

(पुनर्नेपथ्ये ।)

दिङ्मण्डलस्य विमलीकरणे प्रवीणा-
  न्निर्विघ्नमुत्सृजति नीरजबन्धुरंशून् ।
पङ्कश्च पान्थपदयोगममृष्यमाणः
  संशोषमेत्य शकलीभवति क्षणेन ॥ १९ ॥

**मन्त्रीः**—(श्रुत्वा ।) एतेनापि वचसा निरोगीकरणसमर्थान्रसान्प्रयोक्तुं राज्ञस्तस्य च यक्ष्महतकस्य विनशितुं प्राप्तः कालोऽयमिति च सूच्यते । (सबहुमानम् ।) साधु रे वैतालिक, साधु । यदधुना गूढाभिप्रायेण भवता बोधितव्यं बोधितम् । तदेव वृत्तं सप्रकारमवगमयितुं राजानं प्रत्युद्गमनेन बहुमन्तुं च तत्रैव गच्छामि । (इत्युत्थाय आकाशे ।) अरे यक्ष्महतक, भवदीयमतःपरं पश्यामि शौण्डीर्यम् । (पुरो विलोक्य ।) कथमागत एव देवः । यतो देवी पुरोमार्गप्रदर्शिनी पुरो दृश्यते । यैषा

धम्मिल्ले घनसंनिभे सिततडिद्वल्ल्येव मल्लीस्रजा
  वक्त्रेन्दो रुचिरेण नाभितिलकव्याजात्कलङ्केन च ।
हारेण स्तनकोकयोरपि बिसस्वच्छेन चायामिना
  पादाम्भोरुहयोश्च हंसकयुगेनाराविणा राजते ॥ २० ॥

अयमपि महाराजस्तस्या अनुपदमागच्छति । संप्रति हि एतस्य

विचारविगमादिदं विलसति प्रसन्नं मुखं
  गृहीतसुषमं हिमव्यपगमादिवाम्भोरुहम् ।
विषाणिन इव प्रतिद्विरददर्शनामर्षिणो
  गतिश्च किल मेदिनीं नमयतीव धीरोद्धता ॥ २१ ॥

(ततः प्रविशति जीवो बुद्धिश्च ।)

**जीवः**—अहो श्रुतिस्मृतिविहितानां कर्मणां प्रभावः । यानि मया समयेषु समनुष्ठितानि मदीयमन्तःकरणमशोधयन् । शोधिते च तस्मिन्भ-

गवद्भक्तिर्नाम कापि कल्पलता प्रथममङ्कुरिता पश्चादुपचितपरिचया च सा मम हृदयानुरञ्जनी क्रमेण भगवन्तौ परमेश्वरौ साक्षाद्दर्शितवती । अनितरसाधारणया च तया प्रसन्नौ भगवन्तौ संप्रत्यभिलषितान्रसगन्धकादीन्प्रसादीकृत्यार्पितवन्तौ । अग्रेऽपि तस्या एव महिम्ना सकलमप्यभिलषितं पुमर्थं लप्स्यामहे ।

**बुद्धिः**—अज्जउत्त, किं एदे रसगन्धआ अण्णणिव्वेक्खा सअं जेव्व विवक्खक्खवणं णिव्वहन्दि । (क)

**राजा**—देवि, दिव्यौषधीभिः शोधिताः सन्तो विविधरसायनद्वारा उक्तसामर्थ्या ह्येते ।

**देवी**—ता एव्वं संविहाणसमत्थेण केण वि होदव्वम् । (ख)

**राजा**—विज्ञानशर्मैवात्र निर्वोढा । यतः ।

ऋषिरेव विजानाति द्रव्यसंयोगजं गुणम् ।
विज्ञानशर्मणः कोऽन्यः सर्वज्ञाननिधिर्ऋषिः ॥ २२ ॥

किं च ।

महेशतेजःसंभूतो रसः कारुणिकाग्रणीः ।
यः स्वानिष्टमुरीकृत्य परपीडां व्यपोहति ॥ २३ ॥

तदुक्तम्—

'मूर्छित्वा हरति रुजं बन्धनमनुभूय मुक्तिदो भवति ।
अमरीकरोति हि मृतः कोऽन्यः करुणाकरः सूतात् ॥ २४ ॥'
'सुरगुरुगोद्विजहंसापायकलापोद्भवं किलासाध्यम् ।
श्वित्रं महदपि शमयति कोऽन्यस्तस्मात्पवित्रतरः ॥ २५ ॥'

गन्धकस्यापि माहात्म्यमुक्तम्—

'ये गुणाः पारदे प्रोक्तास्ते गुणाः सन्ति गन्धके ।

---

(क) आर्यपुत्र, किमेते रसगन्धका अन्यनिरपेक्षाः स्वयमेव विपक्षक्षपणं निर्वहन्ति ।

(ख) तदेवं संविधानसमर्थेन केनापि भवितव्यम् ।

शुद्धो गन्धो हरेद्रोगान्कुष्ठमृत्युजरादिकान् ।
अग्निकारी महानुष्णो वीर्यवृद्धिं करोति च ॥ २६ ॥'

किं च प्रतिदिनं निषेव्यमाणैरेतैः प्रियरतीनां युवतीनामनभिमतानां पुंसां जरामुपरुध्य तासामभिमते यौवने तेषां स्थापनं भवति ।

**देवी**—(सलज्जं सदृष्टिक्षेपं च ।) संपत्तो एसो विण्णाणणामहेओ अमच्चो । ता णम्मालावस्स ण एसो समओ । (क)

**राजा**—(विलोक्य ।) अये, मन्त्रिबृहस्पतिः संप्राप्तः । (सानुशयम् ।)

कर्तव्यो विधिरित्थमित्थमिति मामुक्त्वा जिगीषुर्द्विषं
स्वस्यैवोपरि राज्यतन्त्रमखिलं द्रष्टव्यमासज्य च ।
अद्येदं क्रियते करिष्यत इदं पश्चादकारि त्विदं
प्रागेवेति दुरन्तया कृशतनुं पश्याम्यमुं चिन्तया ॥ २७ ॥

एतदनुज्ञयैव निर्विचारमानसेन मया कृतं भगवदाराधनम् ।

**मन्त्री**—(उपसृत्य ।) स्वस्ति सफलमनोरथाभ्यां स्वामिभ्याम् ।

**जीवः**—भवत्साहाय्यमेवात्र हेतुः ।

**बुद्धिः**—एवमप्पमत्तेण चित्तवावारेण सहायत्तणं कुणन्तो दीहाऊ होइ । (ख)

**राजा**—अत्र निषीदतु भवान् ।

**मन्त्री**—(उपविश्य ।) निर्विघ्नेन कार्यसिद्धिर्जातेति मनोरथानामुपरि वर्तामहे ।

**राजा**—तदेव वक्तुकामोऽस्मि ।

**मन्त्री**—अवहितोऽस्मि ।

**राजा**—त्वदुक्तमार्गेण प्रथमं पद्मासनं बद्ध्वा तथैवोपविष्टोऽहम् ।

शुद्धान्तःकरणेन संततपरिध्यातार्ककोटिप्रभ-
प्रालेयद्युतिकोटिशीतलशिवारूढाङ्कगङ्गाधरः ।

---

(क) संप्राप्त एष विज्ञाननामधेयोऽमात्यः । तन्नर्मालापस्य नैष समयः ।

(ख) एवमप्यमात्येन चित्तव्यापारेण सहायत्वं कुर्वन्दीर्घायुर्भव ।

सानन्दाश्रुकणो दृशोः सपुलको गात्रेषु सप्रश्रय-
स्तुत्युक्तिर्वदने कृताञ्जलिपुटो मूर्धन्यभूवं चिरम् ॥ २८ ॥

तदनु मयि प्रसादाभिमुखः प्रज्वलदग्निशिखाकलापकपिलजटामण्डलाटवीविलुठज्जाह्नवीचरबालहंसायमानचन्द्रलेखः कण्ठगतकालकूटद्युतियमुनोभयपार्श्वनिःसरन्निर्झरायमाणरुद्राक्षमालिकः परिहितशार्दूलचर्मसंदर्शनभीतमिव मृगमेकं संरक्षितुं करे बिभ्राणः करान्तरे च प्रणतजनदुरदृष्टशिलाभञ्जनं टङ्कं च कंचन भगवान्काञ्चनगिरिधन्वा गिरिकन्यासमेतो मामेतदवोचत—

ध्यानेन ते प्रसन्नोऽस्मि वृणीष्व वरमर्पये ।
इत्युक्तवन्तं तं देवमयाचे रसगन्धकान् ॥ २९ ॥

ततस्तेन दीयमानान्रसगन्धकानग्रहीषम् । पुनश्च प्रणम्य सप्रश्रयमयाचिषम् । देवदेव,

फलिन्यः फलहीना याः पुष्पिण्यो या अपुष्पिकाः ।
गुरुप्रसूतास्ता मुञ्चन्त्वंहसो न इति श्रुतिः ॥ ३० ॥
यस्मै ददासि तं रुग्भ्यः सर्वाभ्यः पारयामहे ।
इति सोमेनौषधयः संवदन्तीति च श्रुतिः ॥ ३१ ॥

अतः सर्वास्ताः सिद्धौषधयः सोमायत्ताः स च भगवतः शिरोभूषणमत्रैव संनिहितः । अतः ।

शोधयितुं रसगन्धान्कर्तुं च रसौषधानि विविधानि ।
दिव्यौषधीश्च सर्वा दापय मौलिस्थितेन चन्द्रेण ॥ ३२ ॥

ततश्च भगवदाज्ञया तेन सोमेन सर्वास्ता मह्यं दत्ताः । (इति मन्त्रिहस्तेऽर्पयति ।)

**मन्त्री**—(सहर्षं गृहीत्वा दृष्ट्वा च ।) सप्तकञ्चुकादिदोषनिराकरणेन शुद्धानेतानोषधीभिः सह शत्रुजयाय प्रयोक्ष्यामहे ।

**देवी**—कित्तिआ ते सत्तुजणा किंणामहेआ अ कस्सि समए पुरोपरोहं किदवन्तो । (क)

---

(क) कियन्तस्ते शत्रुजनाः किंनामधेयाश्च कस्मिन्समये पुरोपरोधं कृतवन्तः।

**मन्त्री**—श्रूयतां तावत् ।

पुण्डरीकपुरं राज्ञि प्रविष्टे रन्ध्रलाभतः ।
स्वराजानुज्ञया पाण्डुररुधत्सैनिकैः पुरम् ॥ ३३ ॥

यक्ष्महतकस्यास्मच्छत्रोर्बहवः सैनिकाः ।
ग्रहण्यश्मर्यतीसारशूलार्शःपाण्डुकामलाः ।
विषूचिकाकुष्ठगुल्मसंनिपातज्वरादयः ॥ ३४ ॥

**देवी**—अमच्च, एत्तिअं पुरोपरोहसंरम्भं कुणन्तेण सहसैणिएण तेण जक्खहदएण अम्हाणं किं अच्चाहिदं कादव्वम् । (क)

**मन्त्री**—देवि, पुरान्निष्क्रमयितव्या वयमित्येव तस्य हताशस्य दुराशाभिनिवेशः ।

**देवी**—अहो अणत्तणीणत्तणं जक्खहदअस्स । जो अम्हेसु पुरादो णिक्कन्तेसु सअं कहिं ठाइस्संति अप्पणो वि णासं ण गणेदि । (ख)

**मन्त्री**—सत्यमुक्तं देव्या ।

महापातकसंभूतेस्तस्य पापस्य यक्ष्मणः ।
वैरायितमिदं चित्रं स्वविनाशमपीच्छतः ॥ ३५ ॥

यदुक्तमभियुक्तैः—

'अपथ्यसेविनश्चौरा राजदाररता अपि ।
जानन्त एव स्वानर्थमिच्छन्त्यारब्धकर्मतः ॥ ३६ ॥' इति ।

ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे
ह्येवं या समभाणि भर्तृहरिणा काष्ठा परा पापिनाम् ।
तामेतामतिशेत एष सपरीवारस्य नाशं निज-
स्योत्पश्यन्नपि निष्क्रमाय यतते यो नः पुरात्पातकी ॥ ३७ ॥

---

(क) अमात्य, एतावन्तं पुरोपरोधसंरम्भं कुर्वाणेन सहसैनिकेन तेन यक्ष्महतकेनास्माकं किमत्याहितं कर्तव्यम् ।

(ख) अहो अनात्मनीनत्वं यक्ष्महतकस्य । योऽस्मासु पुरान्निष्क्रान्तेषु स्वयं कुत्र स्थास्यामीत्यात्मनोऽपि नाशं न गणयति ।

अस्त्यत्र लौकिकोऽप्याभाणकः—'स्वनाशाच्छेदेन शत्रोरमङ्गलमापादयत्य-नात्मनीनो मूर्खः' इति।

**देवी**—ता कहिं दाणिं एत्तिआणं रोगाणं णिग्गहो सुअरो। (क)

**मन्त्री**—देवि, मा भैषीः। निखिलरोगनिसर्गवैरिणि रसे स्वाधीने कः शत्रुजये संदेहः।

**राजा**—तर्हि कुतो विलम्ब्यते।

**मन्त्री**—अहं पुनरधुना रसमोषधीभिः सह संयोजयितुं गच्छामि। देवेनापि विश्रम्यताम्।

(इति निष्क्रान्ताः सर्वे।)

इति तृतीयोऽङ्कः।

---

## चतुर्थोऽङ्कः।

(ततः प्रविशति विदूषकः।)

**विदूषकः**—उत्तं खु दोआरिएण पाणेण रण्णो रसगन्धअवरप्पदाणं सुणिअ बलिअं रोसवसंगदेण जक्खहदएण पण्डुणा सह किंवि मन्तूण सपरिवारस्स अम्हाणं रण्णो उवरि वइक्कमं किंवि कादुं उज्जोओ करीअदित्ति *सुद्ध*-न्देण विण्णाणणामहेएण मन्तिणा कज्जगदिं आवेदिअमाणो अन्तेउरवेदिअन्तरे चिट्ठदित्ति। ता राअसमीपं गमिस्सम्। (इति परिक्रम्योदरं करतलेन परामृष्य।) अहो, मुहुत्तादो पुव्वं खादिदं मातुलुङ्गफलप्पमाणाणं मोदआणं सदं वि जिण्णं जादम्। जं तस्सिं समए घणणकुम्भीपीणुत्तुङ्गो मह पिचण्डो ठिदो। दाणिं उण तिण्णकिदो कटो विअ तणूहोदि। (विमृष्य।) णं मज्झण्णो वट्टदि। तह हि।

पत्तगदं घरहरिणो तिह्लाए पिबइ सीअलं सलिलम्।
गन्धेण कुणइ सुहिदं घाणं घिदमिस्ससक्करापूवो॥ १॥

अहो पमादो। राअसमीवं गमिस्सं ति महाणससमीवं गदो ह्मि। अदो एव्व तह वत्तुलतणुअरगोधूमापूवसंहितसरावेहिं माहिसदहिमण्डमिस्सिदमासविरइअभक्खविसेसणिबिडिअभाअणेहिं परितत्तम्बरिसभज्जिदचणअचअपूरिअपिण्डएहिं फाणिअसंकलिअजवधाणासमुल्लसिदविसालामत्तेहिं दुद्धदहिसक्करासलिलभाविदविविहपिथुअरासिसंपुण्णविसङ्कडचसअविसेसेहिं मल्लिअमुउलपुञ्जधवलसालितण्डुलन्नसमुच्चअविराजिदतम्ममअभण्डगणब्भन्तरट्ठाविदसुवण्णसवण्णसूपणिहाणपिठरेहिं कित्तपरिवक्कवन्ताककारइल्लपडोल-

---

(क) तत्कथमिदानीमेतावतां रोगाणां निग्रहः सुकरः।

कोसातईणिप्पावराअमासकदलीपणसकुब्भण्डप्पमुहसलाटुखण्डमयशाकषण्डमण्डिद्बहुविधभाअणविसेसेहिं अ परिसोहमाणस्स महाणसस्स विसमरो गन्धो। घुमघुमाअदि मे णासाबिलम्। सिलसिलाअदि तालुरसणामूले सुणिग्गत्तरं लालाजलम्। पज्जलदिव्व हणूमन्तवालग्गलग्गग्गिसिहागहिदघरपरम्परं लङ्काउरं विअ बुभुक्खाउरं मे उदरम्। (किंचित्पुरतो विलोक्य।) इह खु महाणसदुवारदेसे अवणदपुव्वकाओ विलोईअदि चुल्लिपावअपज्जलणत्थफुक्कारपवणविकिण्णभसितलेशपुञ्जधूसरमुखो णिडिलदीसन्तविरलसेदम्बुकणिओ करङ्गुलीलग्गहिङ्गुपरिमलसंतप्पिदसमीवगदजणघाणेन्दिओ ईससंकमिदेङ्गालल्लञ्छिद्परिधाणपडो दक्खिणकरग्गहीददव्वीसिहरतणुतरदीसन्तविलोलिअसाअपाअवप्फो अण्णकरलम्बितेन्धणसअलो भद्दमुहो णाम पौरोगवो। ता एणं एव्व पुच्छामि। अए भद्दमुह, तुए पक्केसु भक्खविसेसेसु किं वि किं वि मह हत्थे दादव्वं जं भक्खिअ एदं सुट्ठु एदं णेत्ति विआरिअ कहेमि जं सुट्ठु तं परिवेसिअ रण्णो हत्थादो पारितोसिअं गेह्णदु भवम्। (सामर्षम्।) कहं एसो दासीएपुत्तो 'जइ तुह बुभुक्खा तदो रण्णो समीपं गदुअ भोअणं दादव्वं ति पुच्छ। अहं उदरंभरिणो तुह किं वि ण दाइस्सं' ति भणिअ महाणसब्भन्तरं गदो। होदु। राअसमीपं गमिस्सम्। (इति परिक्रम्यावलोक्य च।) कहं एत्थ राअसमीवे विअणे अलगद्देण गिल्लिअ बिलं पवेसिदो मण्डूओ विअ किं वि अणक्खरं पलवन्तो अमच्चो वेधवेओ (?) चिट्ठइ। ता समअं पडिवालइस्सम्। (इति तिष्ठति।) (क)

---

(क) उक्तं खलु दौवारिकेण प्राणेन राज्ञो रसगन्धवरप्रदानं श्रुत्वा बलवद्रोषवशंगतेन यक्ष्महतकेन पाण्डुना सह किमपि मन्त्रयित्वा सपरिवारस्यास्माकं राज्ञ उपरि व्यतिक्रमं किमपि कर्तुमुद्योगः क्रियत इति श्रुतवता विज्ञाननामधेयेन मन्त्रिणा कार्यगतिमावेद्यमानोऽन्तःपुरवेदिकान्तरे तिष्ठतीति। तद्राजसमीपं गमिष्यामि। अहो, मुहूर्तात्पूर्वं खादितं मातुलुङ्गफलप्रमाणानां मोदकानां शतमपि जीर्णं जातम्। यत्तस्मिन्समये धान्यकुम्भीपीनोत्तुङ्गं मम पिचण्डं स्थितम्। इदानीं पुनस्तृणकृतः कट इव तनूभवति। ननु मध्याह्नो वर्तते। तथाहि।

(ततः प्रविशति राजा मन्त्री च ।)

**राजा**—(कर्णं दत्त्वा।) कार्यपर्यालोचनयातिक्रान्तोऽप्यर्धदिवसो न ज्ञातः। यत इदानीम्

पात्रगतं गृहहरिणस्तृष्णया पिबति शीतलं सलिलम् ।
गन्धेन करोति सुखितं घ्राणं घृतमिश्रशर्करापूपः ॥

अहो प्रमादः। राजसमीपं गमिष्यामीति महानससमीपं गतोऽस्मि । अत एव तथा वर्तुलतनुतरगोधूमापूपसंहितशरावैः माहिषदधिमण्डमिश्रितमाषविरचितभक्ष्यविशेषनिबिडितभाजनैः परितप्ताम्बरीषभर्जितचणकचयपूरितपिण्डकैः फाणितसंकलितयवधानासमुल्लसितविशालामत्रैः दुग्धदधिशर्करासलिलभावितविविधपृथुकराशिसंपूर्णविषङ्कटचषकविशेषैः मल्लिकामुकुलपुञ्जधवलशालितण्डुलान्नसमुच्चयविराजितताम्रमयभाण्डगणाभ्यन्तरस्थापितसुवर्णसवर्णसूपनिधानपिठरैः कृत्तपरिपक्ववृन्ताककारवेल्लपटोलकोशातकीनिष्पावराजमाषकदलीपनसकूष्माण्डप्रमुखशलाटुखण्डमयशाकषण्डमण्डितबहुविधभाजनविशेषैश्च परिशोभमानस्य महानसस्य विसृमरो गन्धः। घुमघुमायते मे नासाबिलम्। सिलसिलायते तालुरसनामूले सुनिर्गत्वरं लालाजलम्। प्रज्वलतीव हनूमद्वालाग्रलग्नाग्निशिखागृहीतगृहपरम्परं लङ्कापुरमिव बुभुक्षातुरं मे उदरम्। इह खलु महानसद्वारदेशेऽवनतपूर्वकायो विलोक्यते चुल्लीपावकप्रज्वलनार्थफूत्कारपवनविकीर्णभसितलेशपुञ्जधूसरमुखो निटिलदृश्यमानविरलस्वेदाम्बुकणिकः कराङ्गुलिलग्नहिङ्गुपरिमलसंतर्पितसमीपगतजनघ्राणेन्द्रियः ईषत्संक्रमितेङ्गाललाञ्छितपरिधानपटो दक्षिणकरगृहीतदर्वीशिखरतनुतरदृश्यमानविलोलितशाकपाकबाष्पः अन्यकरलम्बितेन्धनशकलो भद्रमुखो नाम पौरोगवः। तदेनमेव पृच्छामि। अये भद्रमुख, त्वया पक्वेषु भक्ष्यविशेषेषु किमपि किमपि मम हस्ते दातव्यं यद्भक्षयित्वा इदं सुष्ठु इदं नेति विचार्य कथयामि यत्सुष्ठु तत्परिवेष्य राज्ञो हस्तात् पारितोषिकं गृह्णातु भवान्। कथमेष दास्याःपुत्रः 'यदि तव बुभुक्षा तदा राज्ञः समीपं गत्वा भोजनं दातव्यमिति पृच्छ। अहमुदरंभरेस्तव किमपि न दास्यामि' इति भणित्वा महानसाभ्यन्तरं गतः। भवतु। राजसमीपं गमिष्यामि। कथमत्र राजसमीपे विजने अलगर्देन गृहीत्वा

प्रासादोदरपुञ्जितप्रतिरवप्राग्भारदीर्घीकृतं
सद्यः पञ्जरगर्भ एव चकितानुद्भ्रामयन्तं शुकान् ।
कार्यव्याप्रियमाणमानवमुखं कर्षन्तमात्मोन्मुखं
मध्याह्नागमसूचनाय पटहो धत्ते ध्वनिं ताडितः ॥ २ ॥

संप्रति हि घोरातपसंतापमसहमानाः प्राणिनः प्रायेण प्रच्छायशीतलं प्रदेशमावासाय प्रार्थयन्ते । तथा हि ।

आसीदन्ति विशालशैलशिखरभ्रश्यन्नदीनिर्झरां
शुक्लापाङ्गकुलानि सूर्यकिरणैः शून्यामरण्यावनीम् ।
आवर्तस्फुटपुण्डरीकमुकुलप्रेङ्खोलनोद्गन्धिना
तृप्यन्तो मरुता स्वपन्ति च नदीतीरे बिलेषूरगाः ॥ ३ ॥

**मन्त्री**—अहो यौवनश्रियं पुष्णात्येष दिवसः । यतः ।

छायाशीतलमध्वनि द्रुमतलं चण्डातपोपप्लुताः
शौरिं दानवपीडिता इव सुराः पान्था भजन्ति द्रुतम् ।
दुष्कीर्तिं क्षितिपा इव प्रकृतिभिर्लोभावधूतार्थिनो
गाहन्ते च करेणुभिः सह नदीमारण्यका वारणाः ॥ ४ ॥

अपि चेदानीम्

घर्माम्भःकणलुप्यमानमकरीपत्राङ्कुरालंक्रियं
भूयिष्ठोद्गतफूत्क्रियानिलगलन्मासृण्यबिम्बाधरम् ।
ताम्यल्लोचनतारकालसगतिव्याख्यातनिद्रागमं
प्रच्छाये पथि रोचते स्थितवते पान्थाय कान्तामुखम् ॥ ५ ॥

**राजा**—(स्वगतम् ।) नन्वस्मिन्नवसरे

स्नातव्यं जपितव्यं वसितव्यं नमसितव्यमत्तव्यम् ।
अ··········मनुकूलं दैवतमत्र क्रमेण मया ॥ ६ ॥

(प्रकाशम् ।) किमतःपरमाचरितव्यम् ।

---

बिलं प्रवेशितो मण्डूक इव किमप्यनक्षरं प्रलपन्नमात्यो··········तिष्ठति । तत्समयं प्रतिपालयिष्यामि ।

**मन्त्री**—मध्याह्न इति बुभुक्षिताः परिजनाः । ततः स्नानार्थमुत्तिष्ठतु महाराजः ।

(राजा उत्तिष्ठति मन्त्री च ।)

**विदूषकः**—(श्रुत्वा ।) एव्वंवादिणो मन्तिणो होदु पुण्णलोओ । (उपसृत्य ।) जेदु जेदु महाराओ । (क)

**राजा**—वयस्य, कथमागतोऽसि ।

**विदूषकः**—(मन्त्रिणं प्रति ।) अवि कुसलं अमच्चस्स । (ख)

**मन्त्री**—कथमभ्यवहारसमय इति प्राप्तोऽसि ।

**विदूषकः**—दाणिं जेव्व णिअघरे भोअणं कदुअ आअदेण अज्जेण वि किं ण विण्णादं मज्झह्नो वट्टदित्ति । (ग)

**मन्त्री**—विज्ञातमेव । श्रूयतामिदानीम् ।

यूना सस्पृहदृश्यमानकबरीभारोरुपीनस्तनी
पान्थेनाध्वनि शालिगोपवनिता शून्ये स्फुरद्यौवना ।
आसन्नां·········वारणबुसापत्रापनीतातपा-
मारामक्षितिमापगातटगतां साकूतमालोकते ॥ ७ ॥

**विदूषकः**—(समुखभङ्गम् ।) अण्णस्स पुरिसस्स अण्णाए इत्थिआए संपक्कसूअणं णाम अणुइदं किं ति वण्णीअदु अज्जेण । जइ मज्झह्नो वण्णणीओ त्ति आग्गहो तदो माणवाणं संभाविदं पाणभोअणं वण्णीअदु । जेण सुदमेत्तेण वि मह संतोसो होदि । (घ)

---

(क) एवंवादिनो मन्त्रिणो भवतु पुण्यलोकः । जयतु जयतु महाराजः ।

(ख) अपि कुशलममात्यस्य ।

(ग) इदानीमेव निजगृहे भोजनं कृत्वा आगतेनार्येणापि किं न विज्ञातं मध्याह्नो वर्तत इति ।

(घ) अन्यस्य पुरुषस्यान्यया स्त्रिया संपर्कसूचनं नामानुचितं किमिति वर्ण्यते आर्येण । यदि मध्याह्नो वर्णनीय इत्याग्रहस्तदा मानवानां संभावितं पानभोजनं वर्णयतु । येन श्रुतमात्रेणापि मम संतोषो भवति ।

**मन्त्री**—(विहस्य ।) भोजनेन तत्प्रकारस्य तत्साधनस्य च श्रवणे कुतूहली भवान् ।

(प्रविश्य)

**दौवारिकः**—महाराअ, उवाअणहत्था सामन्तभूवाला संपत्ता मए वि तिदीअकच्छं पवेसिदा महाराओ पेक्खिदव्वोत्ति चिट्ठन्ति । (क)

(राजा मन्त्री च तद्दर्शनप्रदानाय निर्गमनं नाटयतः ।)

**विदूषकः**—(आत्मगतम् ।) अए दासीएपुत्तेहिं सामन्तराएहिं मम ऊसाहभङ्गो किदो । (ख)

(इति तदनुसरणं नाटयति ।)

**मन्त्री**—एते स्वामिनं प्रणमन्ति ।

**राजा**—(आकाशे ।) अपि कुशलिनो यूयम् ।

**मन्त्री**—एते 'स्वामिनः कुशलप्रश्नेन कृतार्थाः स्मः' इति वदन्ति ।

**विदूषकः**—(स्वगतम् ।) बुभुक्खिदस्स मह अकुसलं ति ण जाणादि वअस्सो । (ग)

**मन्त्री**—

कश्चित्स्वर्णौघमेको मणिगणमपरो भूषणव्रातमन्यः
क्षौमस्तोमं परोऽश्वान्रथकुलमितरो बालमातङ्गसंघम् ।
सामन्तक्षोणिपालेष्वहमहमिकयोपाहरद्दृष्टिपातै-
र्देवस्यानुग्रहीतुं सकरुणमुचितं सर्वमित्यर्थयेऽहम् ॥ ८ ॥

अपि च ।

हंसाश्चित्रगताः शुकाः स्फुटगिरो लावा मिथोऽमर्षिणः
श्येनाः शीघ्रजवाः शिखण्डिन उपारोहत्कलापोच्चयाः ।
आनीतास्तपनीयपञ्जरगता भूपैरमीभिर्मुदा
किं चावेक्षितविक्रमाश्च मृगयाकालेषु कौलेयकाः ॥ ९ ॥

---

(क) महाराज, उपायनहस्ताः सामन्तभूपालाः संप्राप्ता मयापि तृतीयकक्षां प्रवेशिता महाराजः प्रेक्षितव्य इति तिष्ठन्ति ।

(ख) अये, दास्याःपुत्रैः सामन्तराजैर्ममोत्साहभङ्गः कृतः ।

(ग) बुभुक्षितस्य ममाकुशलमिति न जानाति वयस्यः ।

**राजा**—मन्त्रिन्,

दत्तानि भूपतिभिरेभिरुपायनानि
तेषां वशे कुरु मयाधिकृता नरा ये।
एतान्सभाजयितुमर्पय तत्तदर्हा-
न्युष्णीषकञ्चुकदुकूलविभूषणानि ॥ १० ॥

**मन्त्री**—यथाज्ञापयति देवः।

**विदूषकः**—णं वअस्स, मए वि विजई होइत्ति वाआमेत्तेण तुह उवाअणं दिण्णं तदो बुभुक्खिदं मं किं त्ति ण संभावेसि। (क)

**मन्त्री**—राजन्, श्रोतव्यः कार्यशेषः।

**विदूषकः**—हुं, चिट्ठदु दासीए वच्छो कज्जसेसो। वअस्स, किं मह पडिवअणम्। (ख)

**राजा**—मन्त्रिन्, ब्राह्मणस्य प्रथमं भोजनं निर्वर्तयेति अन्तःपुरं गत्वा देवीं वद। अतः प्रागेव संभाव्यात्र सामन्तभूपान्स्वस्थानं प्रेषय। वयस्य, त्वमपि मन्त्रिणा सह गच्छ।

**विदूषकः**—दीहाओ होइ। (ग)

**मन्त्री**—विजयी भवतु देवः। (इति विदूषकेन सह निष्क्रान्तः।)

**राजा**—कः कोऽत्र भोः।

(प्रविश्य)

**दौवारिकः**—आणवेदु महाराओ। (घ)

**राजा**—मज्जनगृहमार्गमादेशय।

**दौवारिकः**—इदो इदो भवं। (ङ) (परिक्रम्यावलोक्य च संस्कृतमाश्रित्य।)

---

(क) ननु वयस्य, मयापि विजयी भवेति वाचामात्रेण तवोपायनं दत्तं तद्बुभुक्षितं मां किमिति न संभावयसि।

(ख) हुं, तिष्ठतु दास्या वत्सः कार्यशेषः। वयस्य, किं मम प्रतिवचनम्।

(ग) दीर्घायुर्भव।

(घ) आज्ञापयतु महाराजः।

(ङ) इत इतो भवान्।

स्नातुं ते परिचारिकाः स्तनभरश्रान्ताः शनैः सांप्रतं
क्वाथोष्णानि जलानि मज्जनगृहे कुम्भीषु संगृह्णते ।
आयान्तीव तृषा जलार्थनमिषादासां विलासाद्गतिं
हंसाः केशभरश्रियं च शिखिनः स्नेहादिमा याचितुम् ॥ ११ ॥

अत्र च हिरण्मयस्य गृहस्थूणस्य पार्श्वभागे

अभ्यङ्गाय सुवर्णपात्रनिहितं तैलं चलत्सौरभं
विस्तीर्णस्फुटकर्णिकारकुसुमे येनाभिभाव्यं मधु ।
न्यस्तं चन्दनदारुनिर्मितमिदं कूर्मासनं चासितुं
यत्पृष्ठे पृथिवीव च त्रिगुणिता कौशेयशाटी स्थिता ॥ १२ ॥

अपि च नवाम्बुदश्यामलायां विपुलायतायामिन्द्रनीलमणिनिर्मितायां हर्म्यभित्तौ प्रतिफलितवपुश्चेटीजनस्तडिल्लताविन्यासमवलम्बते । अत्रैव

कञ्चुल्या दृढसंयतस्तनभरा हारं गले कुर्वती
पश्चाल्लम्बितमम्बरं च जघने काञ्च्या दृढं बध्नती ।
स्वेदाम्भःकणमञ्जरीं च भजती चेलाञ्चलेनानने
चेटीष्वेकतमेयमत्र यतते कर्तुं तवाभ्यञ्जनम् ॥ १३ ॥

**राजा**—दौवारिक, मन्त्री विदूषकश्च कृतोचितव्यापारो न वेति विचार्यताम् । अहमप्यत्र स्नात्वा कृतशिवार्चनो भोजनाय यतिष्ये ।

**दौवारिकः**—तह । (क) (इति निष्क्रान्तः ।)

**राजा**—(स्मृतिमभिनीय ।) अये महानुभावा शिवभक्तिः, यस्याः प्रसादाद्भगवन्तं साम्बं साक्षात्कृत्य तदीयकरुणाकटाक्षामृतनिःष्यन्दकन्दलिताखिलपुमर्थोऽपि सन्संप्रति प्राकृतानर्थनिवर्तकान्रसगन्धकानासाद्य तावतैव कृतकृत्यंमन्यो मूढोऽहं विस्मृतवानस्मि तां भगवतीं शिवभक्तिम् । अहो धिक् प्रमादम् । नूनं सा भगवती मां कृतघ्नं मन्येत । (निःश्वस्य ।)

दृङ्मात्रदर्शितनिजप्रथितप्रभावा
प्रह्लादभूमसुरभूरुहमूलभूता ।

---

(क) तथा ।

जन्मान्तरीयतपसां परिपाकतः सा
प्राप्तापि दैवहतकेन मया विमुक्ता ॥ १४ ॥
तामेव हा स्मितसुधामधुराननेन्दुं
भक्तिं तथा निरुपमामसकृद्विचिन्त्य ।
स्नातुं च भोक्तुमशितुं शयितुं विहर्तुं
शक्नोमि नाहमधुना परितप्यमानः ॥ १५ ॥
हृदयानन्दविधात्रीं भक्तिं तामन्तरा न मे सौख्यम् ।
आसारेण विना किं घर्मम्लानस्य शालिनस्तृप्तिः ॥ १६ ॥

तत्कथमहं प्राकृतमिमं व्यासङ्गं परित्यज्य तामेव परमानन्दलीलामनुभूय कृतार्थो भूयासम् । (इति सचिन्तस्तिष्ठति ।)

(ततः प्रविशति स्मृतिः ।)

**स्मृतिः**—अम्मो, भअवदीए शिवभत्तीए विओएण बलिअं उक्कण्ठिदो राआ संपदं ण्हाणभोअणव्वावारं वि णाणुमण्णेदि । ता तुरिअं गदुअ भअवदीए इमं वुत्तन्तं णिवेदिअ ताए णं संयोजइदुं यतिस्सं ति पुण्डरीअपुरं गदुअ तत्थ सद्धाए सेविज्जन्तीं भअवदिं दिट्ठुण सद्धामुहेण तह संविधाणं कदुअ आअदह्मि । ता राअसमीवं गदुअ एदं णिवेदेमि । (इति परिक्रम्योपसृत्य ।) जेदु जेदु देवो । (क)

**राजा**—(दृष्ट्वा ।) अये, कथमियं स्मृतिः । सखि, दिष्ट्या चिरादागतासि ।

**स्मृतिः**—देव, भअवदिं शिवभत्तिं उद्दिसिअ तुह एआरिसीं बलिअं उक्कण्ठं दिट्ठुण—(ख) (संस्कृतमाश्रित्य ।)

---

(क) अम्मो, भगवत्याः शिवभक्तेर्वियोगेन बलवदुत्कण्ठितो राजा सांप्रतं स्नानभोजनव्यापारमपि नानुमन्यते । तत्त्वरितं गत्वा भगवत्या इदं वृत्तान्तं निवेद्य तयैनं संयोजयितुं यतिष्ये इति पुण्डरीकपुरं गत्वा तत्र श्रद्धया सेव्यमानां भगवतीं दृष्ट्वा श्रद्धामुखेन तथा संविधानं कृत्वा आगतास्मि । तद्राजसमीपं गत्वा इदं निवेदयामि । जयतु जयतु देवः ।

(ख) देव, भगवतीं शिवभक्तिमुद्दिश्य तवैतादृशीं बलवदुत्कण्ठां दृष्ट्वा—

यातं देवं मया जवेन महता तत्पुण्डरीकं पुरं
श्रद्धायै विनिवेदितं च भवदीयौत्कण्ठ्यमेतादृशम् ।
तां त्वद्विस्मृतिकोपितामिव मुहुः संप्रार्थ्य भक्ति तयै-
वागत्यानुजिघृक्ष्यसे न तु यथा श्रद्धा समाधात्तथा ॥ १७ ॥

**राजा**—(सहर्षम् ।) कथमेतावदनुगृहीतः । अहो प्रसादातिशयो मयि भगवत्याः । कथय सखि, किमत्रैवागमनानुग्रहं करिष्यति भगवती ।

**स्मृतिः**—अध इं । (क)

(ततः प्रविशति श्रद्धया सह भक्तिः ।)

**भक्तिः**—सखि श्रद्धे, सहजनिःसङ्गनिर्मलस्वभावोऽपि देवो जीवस्तथा सर्वपुमर्थप्रसवित्रीमपि मां विस्मृत्य बुद्धिपारवश्यमापन्नो विरसविषयाभिमुख एव संवृत्तः ।

**श्रद्धा**—अम्ब, देईए गुणमईए दुरच्चआए माआए कुडिलाए एसो अणादिसिद्धो सहावो जं विवेइणं वि पुरिसं मोहिअ विरसविसअप्पवणं करेइ । तह अ कदिदं अहिजुत्तेहिं । (ख) (संस्कृतमाश्रित्य ।)

जरठापि काचिदसती संदर्भ्य गुणान्परस्य पुरुषस्य ।
सङ्गं विनैव हसितैः सर्वस्वं हरति हन्त किं ब्रूमः ॥ १८ ॥

**भक्तिः**—भवतु । अतस्तस्मिन्मम दृढः प्रेमातिशयः ।

सत्यज्ञाननिधिः सदैव सहजानन्दस्वभावोऽप्ययं
देवो बुद्धिवशं गतः पुरमिदं त्रातुं व्यवस्यत्यहो ।
अस्त्वेतद्व्यपयुक्तमात्मकलने तस्मान्निरस्तामयं
निश्चिन्तं पुनरीशतत्परममुं कुर्यामभीष्टाप्तये ॥ १९ ॥

---

(क) अथ किम् ।

(ख) अम्ब, देव्या गुणमय्या दुरत्ययाया मायायाः कुटिलाया एषोऽनादिसिद्धः स्वभावो यद्विवेकिनमपि पुरुषं मोहयित्वा विरसविषयप्रवणं करोति । तथा च कथितमभियुक्तैः ।

**श्रद्धा**—जुज्जइ एदं णिरुपधिणिरवधिकरुणाए भअवदीए । ता एहि तं जेव्व अणुग्गहीदुम् । (क)

**राजा**—अहो अमृतासारमयः कोऽप्यालापः कर्णविवरमाप्याययति । सखि, किमागतवती भगवती ।

**स्मृतिः**—को संदेहो । (ख)

**राजा**—(पुरोऽवलोक्य ।) अहो ।

निरुपाधिकनिःसीमकरुणामृतवारिधिः ।
दिष्ट्या दृष्टा भगवती पुमर्थघटनापटुः ॥ २० ॥

(उत्थाय सरभसं प्रत्युद्गच्छति । श्रद्धाभक्ती परिक्रम्योपसर्पतः । राजा साष्टाङ्गं प्रणमति ।)

**भक्तिः**—सकलाभीष्टभाजनं भूयाः ।

**श्रद्धा**—जेदु जेदु देवो । (ग)

**राजा**—(उत्थाय ।) देवि निरुपधिकरुणानिधे, अपराधिनमपि मामेवमनुगृहीतवत्यसीति सकलमनोरथानामुपरि वर्तामहे ।

अवने हि निरागसां जनानां भजतां जाग्रति दैवतान्तराणि ।
अवनाद्विहितागसोऽपि मेऽस्तु प्रथितं ते निरुपाधिवत्सलत्वम् ॥ २१ ॥

उक्तं चात्राभियुक्तैः ।

प्रवहन्ती तु दया तव परिहृतनीचोच्चवस्तुवैषम्या ।
पततु मयि स्फुटमधुना पङ्कोरुपरीव गगनगङ्गोर्मिः ॥ २२ ॥

**भक्तिः**—देव, भवान्मामनुसृत्य बलवदुत्कण्ठितः प्रकृतकार्यविमुखः संवृत्त इति श्रुत्वा तत्रभवन्तं सान्त्वयितुमागतास्मि । संप्रति विज्ञानमन्त्रिमतानुसारेणैव प्रकृतशत्रुविजयाय व्याप्रियस्व । तदनन्तरम्

निर्जितनिखिलविपक्षं नीरुजमुरुसुस्थमपगतातङ्कम् ।
अहमागत्य विधास्ये परमानन्दाब्धिमाप्तकामं त्वाम् ॥ २३ ॥

---

(क) युज्यत एतन्निरुपधिनिरवधिकरुणाया भगवत्याः । तदेहि तमेवानुग्रहीतुम् ।

(ख) कः संदेहः ।

(ग) जयतु जयतु देवः ।

**राजा**—(सप्रश्रयम् ।) परमनुगृहीतोऽस्मि । इदं तु प्रार्थये ।

या प्रीतिरविवेकानामिति न्यायात्सदा मम ।
हृदयान्मापसर्प त्वं प्रसीद करुणानिधे ॥ २४ ॥

**भक्तिः**—तथा भवतु । (स्मृतिं प्रति ।) अयि वत्से, एतत्त्वदायत्तम् ।

**स्मृतिः**—भअवदि, अवहिदह्मि । (क)

**भक्तिः**—तथा भवतु । (इति निष्क्रान्ता ।)

**राजा**—(सोत्कण्ठम् ।) कथं गतवती भगवती । (स्मृतिं प्रति ।) सखि, सर्वदा हृदि संनिहिता भव ।

**स्मृतिः**—तह । (ख) (इति निष्क्रान्ता ।)

(प्रविश्य)

**दौवारिकः**—देव, एसो अमच्चो भुत्तवन्तेण विदूसएण अणुगदो आअच्छदि । (ग)

(ततः प्रविशति मन्त्री विदूषकश्च ।)

**मन्त्री**–भोः, साधु भुक्तं भवता ।

**विदूषकः**—देवीए बुद्धीए साहुपडिवेसणं किदं जहमणोरहं उदरं पूरिअम् । (घ) (सहर्षं संस्कृतमाश्रित्य ।)

भूमौ साधु वितत्य गारुडमणिश्यामं कदल्या दलं
शाल्यन्नं घृतपक्वफाणितमथापूपैः सहात्रार्पितम् ।
धन्या एव हि सूपपायसमधुक्षीराज्यदध्यन्वितं
नानाशाकयुतं फलैश्च मधुरैरेवं सदा भुञ्जते ॥ २५ ॥

**मन्त्री**—भुक्तवतोऽप्येवमिहादरश्चेत्किमुत बुभुक्षितस्य । (राजानमुपसृत्य ।) विजयतां देवः । देवानुज्ञया सर्वेऽपि सामन्ता यथार्हं संभाविताः । अयमपि बटुराकण्ठमभीप्सिताभ्यवहार्येण भोजितो देव्या । तद्देवेनापि स्नानपूजनभोजनादिविधिर्निर्वर्त्यताम् ।

---

(क) भगवति, अवहितास्मि ।

(ख) तथा ।

(ग) देव, एषोऽमात्यो भुक्तवता विदूषकेणानुगत आगच्छति ।

(घ) देव्या बुद्ध्या साधुपरिवेषणं कृतं यथामनोरथमुदरं पूरितम् ।

**राजा**—तर्ह्यत्रैवावस्थीयतां भवता । अहमपि प्रकृतमाह्निकं निर्वर्त्यागच्छामि । (इति दौवारिकेण सह निष्क्रान्तः ।)

(नेपथ्ये ।)

*अभ्यक्तः स्नापिताङ्गः शुचिवसनधरो जप्यमन्त्राञ्जपित्वा*
देवानभ्यर्च्य भक्त्या घुमघुमितवपुश्चन्दनैश्चन्द्रमिश्रैः ।
रज्यत्ताम्बूलपूर्णाननसरसिरुहो रम्यमारामभागं
साकं देव्यैष राजा प्रविशति सुलभो यत्र दोलाविहारः ॥ २६ ॥

**मन्त्री**—(आकर्ण्य ।) यत्र महाराजस्तिष्ठति तत्रैव गच्छामः । (इति विदूषकेण सह परिक्रामति ।)

(ततः प्रविशति देव्या सह राजा ।)

**राजा**—देवि, पश्य पश्य रामणीयकमारामस्य ।
क्रीडच्चिक्रीडदन्तक्षतविवरगलन्नालिकेराम्बुधारा-
संपूर्णावालपुष्प्यत्फलडुहुकदलीदाडिमीमातुलुङ्गा ।
संपुष्प्यत्पूगपाली परिमलमिलितोत्फुल्लमालत्युदञ्च-
त्सौरभ्योच्छ्रायलभ्यश्रमशमपथिका सेयमारामसीमा ॥ २७ ॥

**देवी**—मलअपवणचलिदतरुलदापुप्फगन्धा दिसासु विसप्पन्ति । इदो तदो परिब्भमन्तो भमरा कलं कूजन्दि । (क)

**राजा**—युक्तमाह भवती ।
कुरबककलिका विलोकमाने तरुणपिके मृदु गायति द्विरेफे ।
नटति किल मुहुः कृतोपदेशा मलयमहीध्रभवेन मारुतेन ॥ २८ ॥
देवि, सर्वतश्चारय चारुसरोरुहदलस्मयमुषी चक्षुषी ।
कंदर्पागममन्त्रपाठमुखरे पुंस्कोकिले कानन-
श्रीपाणिग्रहमङ्गले सति मधोर्देवस्य दीप्तौजसः ।
वह्नौ पाटलकान्तिपल्लवमये स्मेरप्रसूनोत्करः
प्रक्षिप्तस्य मतिं न किं वितनुते लाजव्रजस्याधुना ॥ २९ ॥

---

(क) मलयपवनचलिततरुलतापुष्पगन्धा दिशासु विसर्पन्ति । इतस्ततः परिभ्रमन्तो भ्रमराः कलं कूजन्ति ।

मन्दारबकुलचम्पककुरबकसहकारमञ्जरीलोलः ।
अलिनिकरः केलिश्लथवनलक्ष्मीकेशपाश इव लसति ॥ ३० ॥

**देवी**—पेक्खदु भवं । (क)

किअमाले टिट्टिभओ रसालरुक्खम्मि कोइलो वसइ ।
णीवविडवे सिहण्डी जम्बूसिहरे सुओ एक्को ॥ ३१ ॥

**विदूषकः**—(उपसृत्य ।) जेदु वअस्सो । देवि, सोत्थि भोदीए । (ख)

**मन्त्री**—देव, विजयी भव । देवि, जयतु भवती ।

**राजा**—अत्र निषीदतु वयस्यः । इहास्यताममात्येन ।

**मन्त्री**—(उपविश्य उद्यानभूमिमभितो विलोक्य ।) आश्चर्यमाश्चर्यम् ।

इहोद्याने तादृक्पशुपतिदयासादितमहा-
　महिम्नस्ते सेवारसपरवशाः सर्वत इमे ।
यथास्वं पुष्प्यन्तो युगपदृतवः संनिदधते
　प्रसङ्गादत्राहं कतिचन वदाम्यार्तवगुणान् ॥ ३२ ॥

**राजा**—अवहिताः शृणुमस्तावत् । (पुरो विलोक्य ।) मन्त्रिन्, पश्य पश्य ।

स्फुटकुटजमन्दहासा कदम्बमुकुलाभिरामरोमाञ्चा ।
नीलाम्बुदकुचविगलद्घनपुष्पा विहरतीव वनलक्ष्मीः ॥ ३३ ॥

**मन्त्री**—राजन्, तर्हि वर्षा एताः । पित्तसंचयोऽत्र भवति । एवं हि ऋतुचर्या भिषजो भाषन्ते ।

**राजा**—कथमिव ।

**मन्त्री**—

शंसन्ति भाद्रपदमाश्वयुजं च वर्षा-
　स्तास्वौषधिप्रचुरता सुदृशोऽल्पवीर्याः ।

---

(क) पश्यतु भवान् ।
कृतमाले टिट्टिभको रसालवृक्षे कोकिलो वसति ।
नीपविटपे शिखण्डी जम्बूशिखरे शुक एकः ॥

(ख) जयतु वयस्यः । देवि, स्वस्ति भवत्यै ।

वीर्यं प्रसन्नमसुमत्सु च शीतवाता-
विष्टेषु तत्र शिखिनोदयते विदाहः ॥ ३४ ॥

स एव पित्तसंचयमापादयति ।

**राजा**—शरदि कथम् ।

**मन्त्री**—

मासौ शरत्कार्तिकमार्गशीर्षौ तत्राभ्रकार्श्ये सति पङ्कशोषः ।
विलापितः पित्तचयोऽर्कभासा सपैत्तिकं व्याधिकुलं प्रसूते ॥ ३५ ॥

**राजा**—हेमन्ते कीदृशो रोगः ।

**मन्त्री**—श्रूयताम् ।

हेमन्तः पौषमाघाविह भवति बलं वीर्यमप्यौषधीनां
स्निग्धाश्चापः प्रसन्ना भृशगरिमभृतो याः पिबन्त्यङ्गभाजः ।
मन्दांशुत्वाच्च भानोः सहिममरुदुपस्तम्भिताङ्गेषु देहि-
ष्वेषु स्नेहाद्विदग्धाद्भवति हिमभराच्छ्लेष्मणः संचयश्च ॥ ३६ ॥

**राजा**—कदा पुनरयं श्लैष्मिकान्व्याधीञ्जनयति ।

**मन्त्री**—फाल्गुनचैत्रमासरूपे वसन्ते यतोऽर्करश्मिप्रविलापितः श्लेष्मसंचयोऽस्मिन्नृतौ भवति । एवं च

निःसारा रौक्ष्यभाजो दधति च लघुतामोषधीनां समूहाः
सर्वे ते ग्रीष्मसंज्ञां भजति किल ऋतौ ज्येष्ठवैशाखरूपे ।
तस्मिन्सूर्यप्रतापग्लपिततनुभृतां लाघवाच्चापि रौक्ष्या-
ज्जन्तूनां पीयमानं जनयति सलिलं संचयं मारुतस्य ॥ ३७ ॥

स संचयः प्रावृषि शीतवातवर्षेरितो वातिकरोगकारी ।
क्लिन्नाङ्गभाजां पयसैव नित्यं प्रकोपहेतुस्त्रयसंचयस्य ॥ ३८ ॥

**राजा**—कौ मासौ प्रावृट् ।

**मन्त्री**—आषाढश्रावणौ तथा भिषग्भिरुच्यते ।

**राजा**—कदा पुनरेषामुपशमः ।

**मन्त्री**—सोऽप्येतेषां ज्ञातव्य एव स्वामिना । तद्यथा—

हेमन्ते किल पैत्तिकामयशमो ग्रीष्मे कफोद्यद्रुजः
शान्तिर्वातिकरोगशान्तिरुदयेद्वर्षात्यये केवलम् ।
एवं षड्तुषु स्वभावजतया व्याख्यायि तुभ्यं मया
पित्तश्लेष्मनभस्वतां सह चयेनापि प्रकोपः शमः ॥ ३९ ॥

अपि च ।

रजनीमुखार्धरात्रप्रत्यूषा नक्तमहह पूर्वाह्णः ।
मध्याह्नोऽप्यपराह्णो वर्षाद्याः षट् प्रकीर्तिता ऋतवः ॥ ४० ॥

एष्वपि पित्तश्लेष्मवातानां संचयप्रकोपशमाः प्राग्वदेव ज्ञातव्याः ।

**राजा**—अस्त्वेतत् । दौवारिक, आन्तःपुरिकं जनं प्रवेशय ।

**विदूषकः**—किं उक्कण्ठिदो भवं दोलाविहारस्स । (क)

**राजा**—स्मारितं भवता । तथैव क्रियते । मन्त्रिविन्यस्तसमस्तकार्यभरस्य मम विहारादृते कोऽन्यो व्यापारः ।

**मन्त्री**—देव्या सह दोलामधिरोहतु महाराजः । दौवारिक, पद्ममुखीं चन्द्रमुखीं च चेटीमानय ।

**दौवारिकः**—तथा । (इति निष्क्रम्य चेटीभ्यां सह प्रविशति ।)

(राजा देवी च दोलाधिरोहणं नाटयतः ।)

**मन्त्री**—(चेट्यौ प्रति ।) गायन्त्यौ दोलयतं भवत्यौ ।

**प्रथमा**—

जअइ महुतुन्दिरगुणो सुरहिसरो महुरकम्मुओ वीरो ।
जस्स खु वि जअपताआ सामारुणवामदक्खिणावअवा ॥ ४१ ॥(ख)

**विदूषकः**—(सकोपम् ।) आः दासीए पुत्ति, वालिसा क्खु तुमं । जह अत्थबोधो ण होदि तह पढिदम् । (ग)

---

(क) किमुत्कण्ठितो भवान्दोलाविहाराय ।

(ख) जयति मधुतुन्दिलगुणः सुरभिशरो मधुरकार्मुको वीरः ।
यस्य खल्वपि जयपताका श्यामारुणवामदक्षिणावयवा ॥

(ग) आः दास्याः पुत्रि, बालिशा खलु त्वम् । यथार्थबोधो न भवति तथा पाठितम् ।

**राजा**—वयस्य, जयति भ्रमरगुणः पुष्पबाण इक्षुचापो मन्मथः यस्यार्धनारीश्वररूपा विजयपताकेति पद्यार्थः।

**विदूषकः**—(सशिरःकम्पम्।) जुज्जइ। (क)

**द्वितीया**—

कैरवणिद्दाभङ्गे चओरतिह्णाणिवारणे अ पडु।
सो को वि जअउ देवो पेक्खन्तणिडालपुरुसमौलिमणी ॥४२॥(ख)

**विदूषकः**—एदस्स पज्जस्स अत्थो वण्णीअदि। (ग)

**राजा**—कथमिव।

**विदूषकः**—कैरवविआसआरी चकोरतित्तिआरी भअवं तस्स तिणेत्तस्स सिहामणी चन्दो जअइ त्ति। (घ)

**मन्त्री**—सम्यगुक्तः पद्यार्थो भवता।

**विदूषकः**—(सगर्वम्।) पुव्वपज्जस्स वि मह अत्थबोधो जादो जेव्व। वअस्सेण अत्थो वण्णीअदि ण वेति तुह्णिं ठिदम्। (ङ)

**मन्त्री**—(विहस्य।) कः संदेहः।

**विदूषकः**—अमच्च, किं उवहससि मं। एदं सुणादु भवं। घरणीए विअ मह घरणीए अनक्खराए वाआए वि मह अत्थबोधो होइ। (च)

(सर्वे हसन्ति।)

---

(क) युज्यते।

(ख) कैरवनिद्राभङ्गे चकोरतृष्णानिवारणे च पटुः।
स कोऽपि जयति देवः पश्यन्निटालपुरुषमौलिमणिः॥

(ग) एतस्य पद्यस्यार्थो वर्ण्यते।

(घ) कैरवविकासकारी चकोरतृप्तिकारी भगवान् तस्य त्रिनेत्रस्य शिखामणिश्चन्द्रो जयतीति।

(ङ) पूर्वपद्यस्यापि ममार्थबोधो जात एव। वयस्येनार्थो वर्ण्यते न वेति तूष्णीं स्थितम्।

(च) अमात्य, किमुपहससि माम्। एतच्छृणोतु भवान्। धरण्या इव मम गृहिण्या अनक्षराया वाचाया अपि ममार्थबोधो भवति।

(नेपथ्ये)

**वैतालिकः**—

गन्धेन स्फुटकैरवाकरभुवा विष्वग्विकर्षन्नली-
न्स्वच्छन्दं दिवसावसानपिशुनो मन्दानिलः स्यन्दते ।
भावी नौ विरहाधिरित्यविदितेऽप्यन्तः शुचा स्थीयते
कोकेन प्रियया सहैकनलिनीनालाधिरूढेन च ॥ ४३ ॥

**द्वितीयः**—

मोक्तुं तापमिव प्रतीचिजलधौ मज्जत्ययं भानुमा-
न्रागः कोऽपि विजृम्भते घनपथे चित्ते वधूनामपि ।
आर्द्रागाः कुपितामुपासिसिषते कान्तां विलासी जनो
भक्त्या कर्मठभूमिदेवपरिषत्संध्यां च सायंतनीम् ॥ ४४ ॥

**मन्त्री**—अहमपि संध्योपासनार्थं गच्छामि ।

**विदूषकः**—अहं पि । (क)

**राजा**—अहमप्यन्तःपुरमेव गच्छामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति चतुर्थोऽङ्कः ।

---

पञ्चमोऽङ्कः ।

(ततः प्रविशति धावन्मत्सरः ।)

**मत्सरः**—(विचिन्त्य ।)

जीवे साधयितुं रसं पशुपतेर्ध्यानस्य सिद्धौ स्थिते
तद्विघ्नाचरणाय षट् प्रणिहिताः कामादयः पाण्डुना ।
ते गत्वापि वयं परैरभिभवं प्राप्ता यथा पूर्वजाः
पञ्चापि व्यगलन्नहं च चकितः षष्ठः पलाय्यागतः ॥ १ ॥

इतःपरं किं करोमि मन्दभाग्यः ।

किं पाण्डोर्निकटं व्रजामि धृतिमानेवं कृते भ्रातृभि-
स्तस्याग्रे कथमस्तकार्यनिकरः संदर्शयिष्ये मुखम् ।

---

(क) अहमपि ।

राजानं यदि वानुवर्तितुमये किं राजतन्त्रेऽमुना
पृष्टे चोत्तरयामि हन्त शरणं कं वा करिष्येऽधुना ॥ २ ॥

तत्सर्वथा नास्ति दैवानुकूल्यम् । (विचिन्त्य ।) भवतु । वनमेव गत्वा तपश्चरणेनात्मानं कृतार्थयामि । यतः ।

अश्रान्तप्रवहत्तुषारतटिनीशीतालुशातोदरी-
संघायासगृहीतशोषितसमित्संवर्धिताग्नित्रयाः ।
प्रालेयाचलकाननोटजगता विप्रास्तृतीयाश्रमे
स्थित्वापुः कति वाञ्छितानि तपसामाश्चर्यया चर्यया ॥ ३ ॥

(पुरो विलोक्य ।)

समन्तादालोके सवितुरुपगच्छत्युपशमं
गुरोर्दिष्ट्या लब्धे महत इव सेवापरिचये ।
तमः सर्वामुर्वीं स्थगयति खलानामिव मतिं
तदस्यामत्यर्थं न भवति विवेकः सदसतोः ॥ ४ ॥

तथापि पश्यतो मम द्वावपि पुरुषौ गृह्येते । (कतिचित्पदानि गत्वा निपुणं निरूप्य ।) हन्त, सकिंकरः कुष्ठोऽयमागच्छति । स्वजनेनाप्यनेनाहमिदानीं संभाषणाय जिह्रेमि । तदस्य दर्शनं परिहरणीयम् । मार्गोऽपि न दृश्यते निलीय गन्तुम् । भवत्वत्रैव स्थाणुतामवलम्ब्य तिष्ठामि । गते चैतस्मिंस्त्वरितपदं व्रजेयम् । (इति तथा स्थितः ।)

(ततः प्रविशति किंकरेणानुगम्यमानः कुष्ठः ।)

**कुष्ठः**—(सदृष्टिक्षेपम् ।) किमिदं दृश्यते पश्य ।

**किंकरः**—(सान्द्रे तमसि न्यञ्चितपूर्वकायः पश्यन् ।)

पश्यामि न करचरणं न चात्र पश्यामि चलनमपि किंचित् ।
वैशिष्ट्यमूर्ध्वतायाः पश्यामि स्थाणुरयमतो भवति ॥ ५ ॥

**कुष्ठः**—भद्र, वदन्ति खल्वेवं नीतिशास्त्रविदः ।

आक्रान्ते रिपुभिः पुरेऽन्नसलिलादीनामभावाद्बहि-
स्तान्यानेतुमशब्दकल्पितपदन्यासास्तमस्यागताः ।

संप्राप्ते सति संनिधिं परिजने द्राग्विभ्रतः स्थाणुतां
　लीनत्वं दधतोऽथवाधिसरणि स्वं साधयन्तीप्सितम् ॥ ६ ॥

अतः सम्यङ्निरूपय ।

(किंकरो गत्वा मत्सरं हस्ते गृह्णाति ।)

**मत्सरः**—(स्वगतम् ।) मम खलु माशब्दकीयमवस्था संप्राप्ता । यद्यहं शब्दं कुर्यां ततः स्वरेण मां जानीयुरतोऽविकटं प्रविष्टेन मलिम्लुचेन गृहीत उरभ्र इव तूष्णीमासिष्ये । (इति हस्तं विधुनोति ।)

**किंकरः**—चोर, दृढं गृहीतोऽसि । वृथा ते हस्तधूननम् । (कुष्ठं प्रति ।) आवुक, पुरुषः पुरुषः । गृहीत एष दृढं मया ।

**कुष्ठः**—सफलो मे तर्कः । दृढबद्धमेनमत्रैवानय ।

**किंकरः**—एहि रे चोर, एहि । रक्तकरवीरमालामामुच्य कण्ठे त्वां संभावयामि । अहो तव तपःप्रभावः । गङ्गाचन्द्रादिपरिकरं विना शूली भविष्यसि ।

**मत्सरः**—(स्वगतम् ।)

दग्धो मनोरथो मे बत चिन्तितमन्यदापतितम् ।

(हर्षमभिनीय ।)

मोक्ष्याम्यथवा शोकाद्देहवियोगेन भाविना दैवात् ॥ ७ ॥

(किंकरो बलान्मत्सरमाकृष्य कुष्ठनिकटं गमयति ।)

**कुष्ठः**—भद्र, दीपिकासमीपमानय क एष इति पश्यामि । साधारणश्चेन्मोक्ष्याम एनम् ।

**किंकरः**—आर्य, ज्ञातचर इव दृश्यते । (इति दीपिकासमीपमानयति ।)

**कुष्ठः**—(निरूप्य ।) अहो रूपमिदं मत्सरस्येव लक्ष्यते, वेषस्तु कापालिकस्य । तथाहि ।

भस्मानुलेपधवलीकृतसर्वगात्रः
　श्वेतां वहञ्छिरसि नारकपालमालाम् ।
एकेन शूलमितरेण दधत्कपालं
　हस्तेन तिष्ठति पुरो मृगचर्मवासाः ॥ ८ ॥

भवतु । एनं संबोधयामि । सखे, कीदृशीयमवस्था ते संप्राप्ता ।

**मत्सरः**—(आत्मगतम्।) हन्त, ज्ञातोऽस्म्यनेन मन्दभाग्यः। ज्ञातस्याधुना ममात्मापलापोऽनुचितः। (प्रकाशम्।) तस्यैवेयं दशा दैवहतकस्य।

**कुष्ठः**—(किंकरं प्रति।) भद्र, सखायं मे मत्सरः। तन्मुञ्चैनम्। (किंकरस्तथा करोति।)

**कुष्ठः**—सखे मत्सर, कथं गृहीता भवता कापालिकतापिशाचिका।

**मत्सरः**—सखे, सत्यमाह भवान् कापालिकतापिशाचीति। या खलु मामाकृष्य मरणसुखाद्दुरवस्थामिमां प्रापितवती।

**कुष्ठः**—

सुखं मरणमप्येवंविधं तव भविष्यति।
संगतिः स्वजनेनापि कथं तद्दुर्दशा परम्॥ ९॥

(मत्सरस्तूष्णीमधोमुखस्तिष्ठति।)

**कुष्ठः**—सखे,

न वदसि किमुत्तरं मे कथय कथयितुं क्षमं यदि तवेदम्।
श्रुत्वा विचारयिष्ये त्रपया चालं भिया चालम्॥ १०॥

**मत्सरः**—सखे, मम किमुपरोधेन। किमन्यद्वनगमनादृते कर्तव्यम्।

**कुष्ठः**—

कापालिकताद्य कुतः कुतस्तरां ते वने गमनम्।

**मत्सरः**—

सख्युपरोधेऽरिकृते सर्वं संभाव्यतेऽभिमानजुषाम्॥ ११॥

**कुष्ठः**—किं शत्रुषूपजापार्थं प्रवृत्ताः सखायस्ते निरुद्धाः।

**मत्सरः**—अथ किम्।

**कुष्ठः**—कथय कीदृशो वृत्तान्तः।

**मत्सरः**—(स्वगतम्।)

कथयामि किं रहस्यं पर्यालोचितममात्यवर्येण।
उपजापस्य कथं वा जातामाकाशचित्रतामरिषु॥ १२॥
अथवा तपसितुमिच्छन्सख्युः कुष्ठस्य गोपयामि यदि।
तद्द्रोहस्य न किं स्यादास्थानाय स्वहस्तदानमिदम्॥ १३॥

अतः सर्वमस्मै निवेदयामि । यदयमपि तस्य पाण्डोर्विश्वासस्थानमेवेति । (प्रकाशम् ।) सखे, तवाप्यकथनीयं नाम किमस्ति श्रूयताम् ।

विज्ञानप्रहितेन राजहतकेनास्मन्निसर्गद्विषो
यावत्साधयितुं रसं कथमपि ध्यानस्य सिद्ध्या क्रमात् ।
स्वच्छन्देन च पुण्डरीकनगरीं गत्वा मनोद्वारतः
साम्बस्यैव महेश्वरस्य दृढया भक्त्या प्रसादात्स्थितम् ॥ १४ ॥

तदिदमाकर्ण्य मन्त्रिणा पाण्डुना एतस्य विघ्नाचरणं मनसः पारतन्त्र्यं विना नोपपद्यत इति तदर्थं कामादयः षडेव प्रभवन्तीति त एव वयं प्रेषिताः । अस्माभिश्च तत्र सखिस्नेहवशादङ्गीकृतं मनसः पारतन्त्र्यकरणम् ।

**कुष्ठः**—ततस्ततः ।

**मत्सरः**—ततश्च तेष्वहमेको मन्दभाग्य इमां दुरवस्थामनुभवामि ।

**कुष्ठः**—अथ कामस्य कावस्था ।

**मत्सरः**—सखे, किं कथयामि मन्त्रिहतकस्य दुर्बुद्धिविलसितम् ।

श्रुत्वा पित्तकफात्मपङ्गुयुगलस्पष्टोपजापं तथा
हृद्रोगस्य विमोचनं च सचिवः स्वात्मिककराद्विस्मितः ।

(आकाशे लक्ष्यं बद्ध्वा ।)

पाण्डो साधु भवान्यदैव परमेशाराधने साधनं
चेतःस्थैर्यवदुद्यतस्तदरिणा तद्भेत्तुमित्यब्रवीत् ॥ १५ ॥

इतःपरमपि स बुद्धिमान्पाण्डुर्मम रसौषधसेनासंधानव्यापृततां तां राज्ञ एकाकितां मनसश्चञ्चलतां निरूप्य प्रबलांस्तद्भेदिनः कामादीन्प्रेषयिष्यतीति मत्वा किंकरमुखेनैव स्वनागरिकाय विचाराय नगरपर्यटनमपहाय तत्रैव कामादिभेदने सावधानेन स्थेयमिति विज्ञानमन्त्रिणा समादिष्टम् ।

**कुष्ठः**—ततो विचारेण किं कृतम् ।

**मत्सरः**—तेन च तत्सदृशबुद्धिना कामः कामपि योगकलामुत्पाद्यो-पजापेन ध्यानविषयतामापादितः ।

**कुष्ठः**—हा कामस्यापि परिणतिः । अथ क्रोधस्य को वृत्तान्तः ।

**मत्सरः**—

कमपि प्रदर्श्य दोषं विचारहतकेन सोऽपि च क्रोधः ।
अस्मास्वेव प्रत्युत झटिति परावृत्तिमेव नीतोऽभूत् ॥ १६ ॥

**कुष्ठः**—हा क्रोध, त्वमपि सखीनेवाभिद्रोग्धुं प्रवृत्तः। अथ लोभः कथम्।

**मत्सरः**—यादृशः कामः ।

**कुष्ठः**—

साधु लोभ सखे साधु सम्यग्व्यवसितं त्वया ।
यादृशीं प्रापितोऽवस्थां कामस्त्वमपि तादृशीम् ॥ १७ ॥

अथ दम्भः क्व ।

**मत्सरः**—

उपजप्तोऽपि बहुधा तैरस्माकं स केवलम् ।
सौहार्दमुपरुन्धानः शस्त्रघातहतोऽजनि ॥ १८ ॥

**कुष्ठः**—धन्योऽसि दम्भ, धन्योऽसि । यतः सख्युरनृणतां गतोऽसि । अथ कथय किमध्यवसितं मदेन ।

**मत्सरः**—मदस्तु निगृह्य कारागारे स्थापितः ।

**कुष्ठः**—ततः ।

**मत्सरः**—निर्गते च पुण्डरीकनगराद्राजनि नर्मकर्मण्येनमुपयोक्ष्यामह इति ।

**कुष्ठः**—मत्सर, एवंस्थिते शत्रुमण्डलादेक एव त्वं कथं निर्गतोऽसि ।

**मत्सरः**—शृणु तावत् । नहि मम स्वेच्छया ततो निर्गमो जातः । यतो रससिध्द्यनन्तरं संनद्धे च सैन्ये इममेव मत्सरमत्रत्यवृत्तान्तहारिणं करिष्याम इति निगृह्य स्थापितोऽस्मि ।

**कुष्ठः**—तर्हि सखे, तवागमनमिदानीं तत्र रससिद्धिं सेनासंनाहं च सूचयति ।

**मत्सरः**—एवमेतत् । समनन्तरमेव

राज्ञः संनिधिमृच्छ भद्र कथय त्वं पाण्डुमाविष्कुरु
स्वामिप्रीतिमुपेहि मन्त्रकलनाकौशल्यमप्यश्लथम् ।

मा ग्लासीरिति मास्तु भीतिरिति मामुक्त्वा चमूनायका-
न्नामग्राहमपि प्रदर्श्य नगरान्निःसारितोऽहं शनैः ॥ १९ ॥

**कुष्ठः**—

प्रज्ञोन्मदः स सचिवस्तदनर्थो भविष्यति ।
गत्वा निवेद्यतां राज्ञे मन्त्रिणेऽहं निवेदये ॥ २० ॥

**मत्सरः**—

तप्स्यमानस्तपः सख्युरविकीर्त्यमिदं तव ।

**कुष्ठः**—

फलिष्यति तपः किं ते न चेत्सख्यमजीगणः ॥ २१ ॥

ग्लानिर्मनसस्तपसे प्रवर्तयति शक्तिमन्तमपि पुरुषम् ।
अग्लानिस्तस्य यदि क्रमाहतस्यापि साधयति कार्यम् ॥ २२ ॥

तस्मादग्लानिरेव क्रियताम् ।

**मत्सरः**—का गतिः । (इति कुष्ठेन किंकरेण च सह निष्क्रान्तः ।)

शुद्धविष्कम्भकः ।

---

(ततः प्रविशति पाण्डुः कुष्ठश्च ।)

**पाण्डुः**—(सामर्षम् ।)

अग्राह्यमल्पमतिभिः सचिवस्य तस्य
वैयात्यमूर्जितमहो किमिति ब्रवीमि ।
यः प्रेषयन्किमपि तादृशवाचिकं द्रा-
गुन्मस्तकं निजमसूचयदूष्मलत्वम् ॥ २३ ॥

जीवसमाधिभङ्गाय प्रेषितेषु कामादिष्वपि तथाभूतेषु भक्तिमूला खल्वेतस्याभिमतसिद्धिरिति तद्विघाताय प्रेषितो व्याक्षेपो नाम गूढचारः । स गतोऽपि तत्सख्या श्रद्धयापहतो व्यर्थयत्नोऽभूत् । किमतः प्रतिविधातव्यम् ।

**कुष्ठः**—मम त्वेवं प्रतिभाति ।

मन्त्रिणामूष्मलत्वं हि पश्यद्भिः प्रतिमन्त्रिभिः ।
शौर्येण प्रतिकर्तव्यं तथा चेदुचितं भवेत् ॥ २४ ॥

**पाण्डुः**—मैवं वादीः । परस्य मन्त्रशक्तिः स्वस्य मन्त्रशक्त्यैव प्रतिह-

न्तव्या । यथा खलु शास्त्रविद आचक्षते । यो यादृशेन साधनेन प्रहरति स तादृशसाधनेनैव प्रतिहन्तव्य इति । अतो मन्त्रकृतं संविधानमुपायान्तराभावे शौर्येण प्रतिक्रियतामित्यन्तिममिदमौपयिकम् । अहमिदानीं तदुचितं प्रतीकारमालोचयामि ।

**कुष्ठः**—आलोचयतु भवान् ।

आकर्णयिष्यति यदा वृत्तान्तमिदं स मत्सरमुखेन ।
दीपितरोषो हृदये देवोऽपि समागमिष्यति तदैव ॥ २९ ॥

तस्य पुरस्तादस्मदायत्तमुपायं सफलीकरिष्यामः ।

**पाण्डुः**—अस्त्वेवम् । भवानवहितस्तिष्ठतु ।

**कुष्ठः**—तथा । (इति निष्क्रान्तः ।)

**पाण्डुः**—कः कोऽत्र भोः ।

(प्रविश्य ।)

**गलगण्डः**—आज्ञापय करणीयम् ।

**पाण्डुः**—भद्र, अपथ्यतां प्रवेशय ।

**गलगण्डः**—(निष्क्रम्य पुनस्तया सह प्रविश्य ।) आर्य, कटकसीमनि देवः प्राप्त इति वल्लभपालो विज्ञापयति ।

**पाण्डुः**—(अपथ्यतां प्रति । अपवार्य ।) अये, त्वं क्वचिन्महति राजकार्ये नियोजयितव्यासि ।

**अपथ्यता**—अवहिदह्मि । (क)

**पाण्डुः**—जीवं प्रविश्य तमपथ्येष्वाहारविहारादिषु नियोजय ।

**अपथ्यता**—तह । (इति निष्क्रान्ता ।)

**पाण्डुः**—(पुरोऽवलोक्य ।) अये, देवः प्राप्तः । गलगण्ड, गच्छाग्रतः

(ततः प्रविशति राजयक्ष्मा मत्सरश्च ।)

**पाण्डुः**—(प्रणम्य ।) राजन्, कथमेतत् ।

तन्वन्पुनः पुनरपि भ्रुकुटिं ललाटे
निःसीमनिःश्वसितमुच्चलिताधरोष्ठम् ।

---

(क) अवहितास्मि ।

देवस्य शंसति मुखाम्बुजमन्तरङ्गे
रूढां रुषा रिपुजने सहसैव चिन्ताम् ॥ २६ ॥

**राजा**—पाण्डो, विजने प्रासादे समुपविश्य सर्वं बोधयिष्यामि ।

**पाण्डुः**—गलगण्ड, प्रासादमार्गमादेशय ।

**गलगण्डः**—इत इतो देवः ।

**पाण्डुः**—(विलोक्य ।) राजन्, आरुह्यतामयम् ।

श्रीकण्ठक्षितिधरशृङ्गभङ्गदायी प्रासादः शिखरविराजिहेमकुम्भः ।
सोपानैः स्फटिकमयैः सुखेन गम्यो रम्योऽयं भवति कलस्वनैः कपोतैः॥२७॥

(सर्वे प्रासादारोहणं नाटयित्वोपविशन्ति ।)

**राजा**—पाण्डो, किं न त्वया श्रुतो मत्सरात्परवृत्तान्तः ।

**पाण्डुः**—श्रुतं कुष्ठमुखात्पुरवृत्तं तं विशेषतः श्रोतुमिच्छामि ।

**राजा**—पाण्डो, श्रूयतां मत्सरमुखात् । ततः समुचितं प्रतीकारं विधास्यसि । मत्सर, कथय ।

**मत्सरः**—

संनद्धैः पुररक्षणे परिगतं प्राणादिभिः पञ्चभि-
स्तत्तद्देशगतैश्च यत्ननिचयैस्तद्दुष्प्रवेशं पुरम् ।
रन्ध्रान्वेषितया कथं कथमपि प्राप्ताः स्म देवाज्ञया
यत्रान्तर्मुखतामुपेत्य नियतं जीवस्तपोऽतप्यत ॥ २८ ॥

**राजा**—के ते प्राणादयः कतिविधाः कुत्र गताः किंनामधेयाश्च । कानि च तानि यत्नानि कीदृशानीति सप्रकारमावेदय ।

**मत्सरः**—

हृदयसततावासः प्राणो महाबलविक्रमः
सकलमपि तद्यस्यायत्तं पुरं सपरिच्छदम् ।
कलितनिलयोऽपानो मूलस्थले हितकृद्विभो-
र्वसति च समानाख्यो गुल्फे बली घनशूलभृत् ॥ २९ ॥

किं च ।

कण्ठोपकण्ठे निवसन्नुदानः करोत्यकुण्ठां किल राजभक्तिम् ।
व्यानस्तु सर्वत्रचरः पुरेऽस्मिन्करोति जीवे सकलानुभूतिम् ॥ ३० ॥

शल्यानि यानि किल देहभृतां शरीरं
नानाङ्गकेषु महतीं प्रथयन्ति बाधाम् ।
तेषां समुद्धरणकर्मणि साधनानि
यन्त्राणि कानिचन संघटितानि तत्र ॥ ३१ ॥

यानि किल

अर्शोभगंदरमुखस्य रुजां गणस्य
क्षाराग्निशस्त्रपरियोजनमङ्गरक्षाम् ।
बस्त्यादिकर्मघटकादि च कार्यजातं
कुर्वन्त्यपायरहितानि च तत्र तत्र ॥ ३२ ॥

अपि च ।

यद्धर्यक्षसदृक्षरूक्षवदनं तत्सिंहवक्त्राभिधं
यच्चर्क्षस्य मुखाभभीषणमुखं भल्लूकवक्त्रं हि तत् ।
तत्कङ्काननामकं प्रतिभयं यत्कङ्कतुल्याननं
यन्त्रं काकमुखं तदेव यदपि ध्वाङ्क्षातितीक्ष्णाननम् ॥ ३३ ॥
विस्तीर्णानि नवद्वयाङ्गुलपरीणाहानि कण्ठे परं
संनद्धानि च कीलकैः सुघटितैर्मूलेऽङ्कुशाभानि च ।
पर्यन्तेषु पुनर्मसूरसदृशाकाराणि तिष्ठन्त्यहो
तत्र स्वस्तिकनामकानि कतिचिद्यन्त्राणि घोराणि च ॥ ३४ ॥
तान्येव सुदृढान्यस्थिलग्नशल्यापकर्षणम् ।
कुर्वन्ति स्वस्तिकाख्यानि यन्त्राणि हि शरीरिणाम् ॥ ३५ ॥

अपि च ।

एकान्येकमुखान्यपि नाडीयन्त्राणि सूक्ष्मसुषिराणि ।
स्रोतोगतशल्यानां दर्शनचूषणविधौ समर्थानि ॥ ३६ ॥

एवमादिभिर्बहुविधैर्यन्त्रनिवहैरन्यैरपि परिगुप्ततया दुर्गममपि पुरं कथंचन प्रविश्य मनसः पारतन्त्र्यकरणाय वयं यावदितस्ततः संचरितुं प्रवृत्तास्तावदेव विज्ञानविधेयेन विचारनाम्ना नागरिकहतकेन परिज्ञाताः ।

पाण्डुः—ततस्ततः ।

**मत्सरः**—ततः कामादिषु तत्र तादृशीं दुरवस्थां प्रपन्नेष्वहमेक एव हतभाग्यतया वैरिवशं गतस्तत्कृतमवमानजातमशरणतया सहमानस्तदीयभटैरितस्ततो विकृष्यमाणस्तदुदितवाचिकमपि निशमयंश्चारवधविमुखैस्तैरेव कृपया विमुक्तः प्रज्वलदवमानाग्निसंतप्यमानः स्वजनमुखावलोकने कृतलज्जतया क्वचन विजनकाननसीमनि कठोरतपश्चर्यया विनिपातिततनुर्भर्तुरानृण्यं भजेयमिति पुरान्निःसरन्नन्तरा सकिंकरेण कुष्ठेन देवपादमूलं प्रापित इत्येतदवसानं प्रवृत्तेः श्रुत्वा देवः प्रमाणम् ।

**राजा**—कुमार, श्रुतं खलु निरवशेषमस्य मुखात् । किमत्र प्रतिविधेयम् ।

**पाण्डुः**—(विचिन्त्य ।) देव, किमन्यत् ।

सन्तु यन्त्राण्यनेकानि सन्तु वा सैनिकाः परे ।
त्वत्कोपाग्नौ पतङ्गत्वं भजेरन्निति मे मतिः ॥ ३७ ॥

**राजा**—पाण्डो, सत्यमेव किं कालविलम्बेन । सर्वथा प्रविश्यान्तःकोशागारम्

शस्त्रेण सर्वमपि खण्डश एव कृत्वा
गृध्रव्रजाय निखिलं बलिमर्पयामि ।
येनौदनो दिविषदां विकलीकृतोऽभू-
त्किं तस्य मे भयममी कितवा विदध्युः ॥ ३८ ॥

अपि च ।

अमृतनिधिरयं यः सोऽपि मत्पीडितः स-
न्न विसृजति मदीयेनाधिनाद्यापि कार्श्यम् ।
निजविकटजटालीकाननस्थापितस्य
प्रभवति स महेशोऽप्यस्य किं पूरणाय ॥ ३९ ॥

हन्त हन्त ।

स ददाति नाम गिरिशो रसमेतेषामुपासनपराणाम् ।
लब्धैनैतेनास्मानेते नाम प्रशमयन्ति ॥ ४० ॥

(विहस्य ।) अहो विचारचातुरी विज्ञानहतकस्य ।

(आकाशे ।)

अरे विज्ञानहतक,

आश्रित्य यं सततमुत्पतसि स्मयेन
निर्वापयामि तमहं सहसैव जीवम् ।
पश्चाद्विनङ्क्ष्यति भवानपि चाश्रयस्य
नाशान्न सिध्यति किमाश्रयिणोऽपि नाशः ॥ ४१ ॥

**राजा**—कः कोऽत्र भोः, शस्त्रम् । (इत्युत्थातुमिच्छति ।)

**पाण्डुः**—ननु संनिहितमेव शस्त्रम् । तथापि किंचिद्विज्ञापयामि । अस्त्येवायमन्तिमः प्रकारः । अपि तु

त्रिषूपायेषु सत्स्वन्त्यो न युक्त इति तान्त्रिकाः ।
उपायमिममेवातो मनो मे प्रयुयुक्षते ॥ ४२ ॥

**राजा**—कोऽयमुपायः ।

**पाण्डुः**—(कर्णे ।) एवमेवम् ।

**राजा**—भवतु तथा । अस्त्येवैतदनन्तरकर्तव्यम् ।

**पाण्डुः**—देव, मार्गश्रम इव दृश्यते सिद्धं च सर्वं शयनादि ।

**राजा**—त्वमपि स्वकार्येऽवहितस्तिष्ठ । अहमपि भुक्त्वा निद्रास्थानं गच्छामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति पञ्चमोऽङ्कः ।

---

## षष्ठोऽङ्कः ।

(ततः प्रविशति कर्मणा सह कालः ।)

**कालः**—वत्स कर्मन्, जीवस्य राज्ञः पुरबाधनार्थं यक्ष्मराजमन्त्रिणा पाण्डुना प्रयुक्तान्रोगरूपान्भटान्प्रतियुधा जेतुं विज्ञानमन्त्रिणा नियुक्तं सरसतत्प्रतिभटजातं किं करोतीति जिज्ञासते मे हृदयम् ।

**कर्म**—भगवन्, सर्वानुस्यूतस्य तव किं नामाविदितमस्ति ।

**कालः**—भवानपि तादृश एव । महान्खलु तव प्रभावः । तथाहि ।

त्वामज्ञातमनुग्रहाय जगतां देवी विधत्ते श्रुति-
　लोकः साधयतीप्सितं भवदनुष्ठानादिहामुत्र च ।
किं चायं समनुष्ठितेन भवता चित्तस्य शुद्धिं गत-
　स्तत्त्वं वेदितुमात्मनः प्रभवति त्रय्यन्तसंदर्शितम् ॥ १ ॥

अपि च ।

त्वं नित्यनैमित्तिककाम्यभेदात्स्थित्वा त्रिधानेकफलानि दत्से ।
इन्द्रत्वमिन्द्रस्य विधेर्विधित्वं हरेर्हरित्वं च फलं त्वदीयम् ॥ २ ॥

**कर्म**—आर्य, अवाङ्मनसगोचरस्तव महिमा ।

　　सुमतिभिरनुमेयस्त्वं सहस्रांशुगत्या
(सविनयम् ।)　भवति भवदधीनं मद्विधानं जनानाम् ।

भगवन्, किमन्यद्ब्रवीमि ।

　　परिणमयसि पुंसां दातुमर्थात्मना मां
　　　त्वयि कृतिमति षोढा विक्रियन्ते च भावाः ॥ ३ ॥

किं च ।

त्रैधं जनः शंसति वर्तमानं भूतं भविष्यन्तमहं पुनस्त्वाम् ।
ऐकध्यमापन्नमखण्डरूपमाधारमेषो जगतामवैमि ॥ ४ ॥
निमेषकाष्ठे च कलाक्षणौ च मुहूर्तरात्रिंदिवपक्षमासान् ।
भवत्तनूभृत्त्वयने तथाब्दं युगं च मन्वन्तरमप्यवैमि ॥ ५ ॥

**कालः**—तदिदानीं पाण्डुविज्ञानमन्त्रिभ्यां युद्धाय नियुक्तानां भटानां विक्रमविलासानवलोक्य चक्षुषी कृतार्थयिष्यावः । पाण्डुना खलु जीवराजे प्रयुक्तो भविष्यतो रोगस्य पुरो भावी बुभुक्षाजनको भस्मकरोगस्तद्गृहीतो राजेति जानामि ।

आवां यथा न विद्युः सर्वेऽपि दिविस्थितावुच्चैः ।
उभयेषामपि युद्धं पश्यावः संलपावश्च ॥ ६ ॥

किं च, ज्ञानशर्मणोपजापितोऽपि राजा भूयो विज्ञानशर्मणा प्रत्यावृत्य पर्यवस्थापितः ।

**कर्म**—भगवन्, कीदृशो ज्ञानशर्मणोपजापः ।

**कालः**—वत्स, श्रूयताम् ।

तत्तत्कार्यविशेषसाधनविधावुक्त्वेतिकर्तव्यतां
जीवस्यास्य विभोः स्वकीयपृतनासंनाहमालोकितुम् ।
निष्क्रान्ते सचिवे कदाचन भजत्येकाकितां राजनि
श्रुत्वा तत्समयं तदन्तिकभुवं स ज्ञानशर्मा ययौ ॥ ७ ॥

अनन्तरमायान्तमवलोक्य दूरादेव

अथ सुचिरवियोगात्संदिहानः सखित्वे
किमपि विवशचेता निर्भरैर्हर्षभारैः ।
कथमपि समुदश्रुर्बाष्पसंरुद्धकण्ठो
वचनमिदमवोचन्मत्तहंसस्वरेण ॥ ८ ॥

चेतः शीतलतामुपैति नयने विस्तारिणी कौतुका-
न्निर्मर्यादमुपैत्यमानिव तनौ कोऽप्यन्तरानन्दथुः ।
बाहू मां परिरम्भणे त्वरयतस्त्वां वीक्ष्य कस्त्वं सखे
पुण्यैः पूर्वकृतैश्चिरान्मम दृशोः पन्थानमारोहसि ॥ ९ ॥

**कर्म**—ततस्ततः ।

**कालः**—ततोऽसौ जीवस्य वचनमिदमाकर्ण्य ज्ञानशर्माकथयत् ।

सोऽहं जीव विभो चिरन्तनसखस्ते ज्ञानशर्मा तथा
प्राणेष्वन्यतमो मुहुस्तव हिताकाङ्क्षी च सर्वात्मना ।
विज्ञानस्य कुमन्त्रितैः परवति त्वय्यव्यवस्थास्थितौ
शान्तस्त्वन्नगराद्विरक्तहृदयः प्रास्थामनास्थावशात् ॥ १० ॥

संप्रति हि ।

दुःसामाजिकबोधनैः कुपदवीसंचारमासेदुष-
स्तेनापज्जलधौ निराश्रयतया राज्ञो वृथा मज्जतः ।
ब्रूते यो न हितं वचोऽप्रियमपि स्वेष्टं निगृह्याग्रहा-
त्स्वामिभ्यः स तु बुद्धिमत्पशुरिति प्राप्नोति मन्त्री प्रथाम् ॥ ११ ॥

अतः किल

विज्ञानशर्महतकस्य वृथा कुमन्त्रै-
घोरामिमां सुमहतीं गतमापदं त्वाम् ।
आकर्ण्य देव हितवागुपदेशहेतो-
रद्यान्तिकं तव गतोऽस्म्यनृणो बुभूषुः ॥ १२ ॥

**कर्म**—ततस्ततः ।

**कालः**—ततश्च राजा सरलप्रकृतितया 'सखे ज्ञानशर्मन्, चिरेण दृष्टोऽसि । त्वत्तोऽपि मे श्रेयःसंपादकः कोऽन्योऽस्ति । तत्कथय प्रस्तुतोचितं हितम्' इति तमन्वयुङ्क ।

**कर्म**—ततस्ततः ।

**कालः**—ततो ज्ञानशर्मा राजानमुपह्वरे स्वैरमित्थं बोधयामास ।

शश्वन्नश्वरमेव विश्वविदितं पापप्ररोहस्थलं
मेदोमज्जवसास्थिमांसरुधिरत्वग्रोमकूपं वपुः ।
एतस्मिन्मलमूत्रभाण्डकुहरे हेये मनीषावतां
दुःखे न्यायविदो विमोहमिह के तन्वन्ति नन्वन्तिमे ॥ १३ ॥

जगत्प्रोतं यस्मिन्विविध इव सूत्रे मणिगणः
समस्तं यद्भासा तदपि च विभाति स्फुटमिदम् ।
अखण्डानन्दं यन्निरवधिकसच्चित्सुखमयं
निराकारं यत्तत्त्वमसि परमं ब्रह्म न पुमान् ॥ १४ ॥

तत्तादृशः सुखघनस्य निरञ्जनस्य
सर्वात्मनापि ननु हेयतरे पुरेऽस्मिन् ।
विज्ञानशर्मवचनैर्विपरीतवृत्ते-
र्मन्ये न युक्त इव ते ममताभिमानः ॥ १५ ॥

इत्यादिभिर्बहुविधैरुपपत्तिपूर्वै-
रेतैर्वचोभिरथ तेन रहः प्रयुक्तैः ।
कोषे बले रिपुवधे च बभूव सद्यो
जीवो विरक्तहृदयो विगताभिमानः ॥ १६ ॥

**कर्म**—भगवन्, इत्थं ज्ञानशर्मणोपजप्तस्यापि जीवस्य राज्ञः कथमधुना रिपुवधे प्रवृत्तिः ।

**कालः**—श्रूयताम् । इत्थं ज्ञानशर्मा राज्ञो रहस्युपजापं कुर्वन्सेनासंनिवेशादागतस्य विज्ञानशर्मणो वचनमाकर्ण्य न नः परमिह स्थातव्यमिति राजानमामन्त्र्य जगाम ।

**कर्म**—ततस्ततः ।

**कालः**—ततश्च निष्क्रान्ते ज्ञानशर्मणि प्रविश्य विज्ञानशर्मा राजानमालोक्य अये, किमयमपूर्व इव राजा पुरादिषु परित्यक्ताभिमान इव दृश्यते । तद्बहुधा ज्ञानशर्मणोपजापितः स्यात् । भवतु । सर्वमिदं स्वयमेव व्यक्तीभविष्यति । (इति राजसमीपं गतः ।)

**कर्म**—ततस्ततः ।

**कालः**—राजा च तमालोक्य सावहित्थस्तमनुसरन्निव सादरमपृच्छत् । 'मन्त्रिन्, कथय कीदृशः पुरवृत्तान्तः परवृत्तान्तश्च' इति ।

**कर्म**—ततस्ततः ।

**कालः**—

*इति राज्ञा समाज्ञप्तो नयज्ञो मन्त्रिशेखरः ।*
प्रत्युत्तरं तदादत्त प्रज्ञावज्ञातवाक्पतिः ॥ १७ ॥

स्वायत्तं पुरमेव नः समजनि स्वामिन्भवच्छासना-
तत्तद्देशनिविष्टपत्रनिचयव्यापारसंरक्षितम् ।
निर्दग्धा भवतः प्रतापमहसा नूनं पतङ्गा इव
प्रत्यर्थिप्रकरा भवेयुरधुना नामावशेषाः क्षणात् ॥ १८ ॥

**कर्म**—ततस्ततः ।

**कालः**—इत्याकर्ण्य राजा ज्ञानशर्मवचोऽनुसरन्नुभयोर्मतयोरपि दोलायमानमानस इतिकर्तव्यतामव्यवस्यन्नित्थमाक्षेपमुखेन व्याजहार ।

निसर्गतो ये रिपवो हि रोगा वातादिभिस्तज्जनकैः समन्तात् ।
अधिष्ठितेऽस्मिन्कुटिलैः प्रवृत्त्या स्वायत्तता हन्त कथं पुरे नः ॥ १९ ॥

किं च ।

संरक्ष्यते निजवशंवदसेवकेन
　य: पाण्डुना विमतखण्डनपण्डितेन ।
सोऽयं प्रतापपरिदग्धपुरो विसर्प-
　ज्ञेयः कथं कथय संप्रति राजयक्ष्मा ॥ २० ॥

कर्म—ततस्ततः ।

कालः—इति राज्ञो वचनमाकर्ण्य समञ्जसयुक्तिकं वचोऽब्रवीत् । राजन्, श्रूयताम् ।

वातादिजा यद्यपि सर्वरोगास्तथापि तानेव विनाशयन्ति ।
यथारणेर्वह्निरुदर्चिरुद्यन्दहत्ययत्नादरणिं तमेव ॥ २१ ॥

अपन्थानं त्विति न्यायादात्मद्रोहिषु तेष्वमी ।
आत्मजेष्वपि न स्नेहमातन्वन्त्यधुना प्रभो ॥ २२ ॥

अतस्तदधिष्ठितमपि पुरं स्वाधीनमेवेति निश्चिनु । किं च ।

स्वायत्ते नगरे तस्मिन्स्वामिपादप्रसादतः ।
जयश्रियं हस्तगतां जानातु भगवान्क्षणात् ॥ २३ ॥

कर्म—ततस्ततः ।

कालः—इत्थं मन्त्रिवरवचननिशमनेन किंचिदिव निर्वृतचेतसा राज्ञा मन्त्रिन्, 'इयतापि कालेन पुरस्य स्वायत्तत्वे किमनेन फलं पश्यसि' इति पृष्टो मन्त्री कथयामास—

पुरस्य दार्ढ्ये योगस्य सिद्धिः सर्वार्थसाधिनी ।
अखण्डानन्दसिद्धिश्च फलं तेनैव जायते ॥ २४ ॥

कर्म—ततस्ततः ।

कालः—इत्याकर्ण्य क्षुद्राभिमानेन न भवतीष्टसिद्धिः । प्रत्युत हानिरेव फलम् । अतः स्वयमेव त्यक्तेष्वेतेषु सिद्धैवात्मनो दृढयोगसिद्धिरखण्डानन्दता च । कुत एतावान्यत्न इति वदति राजनि पुनरपीत्थं समाहितवान्मन्त्री—

प्रारब्धरहितस्यैवं भवेदेव न संशयः।
प्रारब्धपरतन्त्रं त्वां ते मुञ्चन्ति कथं पुनः॥ २५॥

किं च।

श्लथाभिमाने पुरि हन्त देवे क्षोभो भवेत्त्वत्प्रकृतिष्वकस्मात्।
ततोऽवकाशं प्रतिलक्ष्य सर्वे प्रत्यर्थिनस्ते प्रबला भवेयुः॥ २६॥

किं च।

यक्ष्मणि जाग्रति तस्मिन्पाण्डुज्वरसंनिपातपरिवारे।
देवस्य कथं भविता स्थितिरिह यत्नादपि स्वरूपेण॥ २७॥

इममर्थमप्रतिहतया प्रतिभया स्वयमेव विचारयतु देवः।

**कर्म**—ततस्ततः।

**कालः**—तत इत्यात्मनीनानि वचनान्याकर्णयन्कुतूहलाकुलितहृदयः समरयत्नकृतत्वरः मुहुर्मुहुस्तमित्थं प्रशंसन्नवोचत्—

त्वयि दत्तभरस्य मेऽधुना किं बहुनानेन विचारणश्रमेण।
भवते ननु रोचते यथा वा यतितव्यं हि तथैव निर्विशङ्कम्॥ २८॥

**कर्म**—ततस्ततः।

**कालः**—ततश्च किल यदेवं देवस्य मनसो व्याकुलीभावः स सर्वोऽपि शत्रूपजाप इति मन्तव्यम्। अतो विज्ञापयामि। तिष्ठतु दार्ढ्यं मद्वचसि इति राजानं पर्यवस्थाप्य स्वकार्य एव व्याप्रियते।

**कर्म**—भगवन्, ज्ञानविज्ञानयोरेकरूपयोरिव सतोः कुत इयान्विरोधः।

**कालः**—वत्स,

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।
तयोर्विरोध इत्येतत्किमाश्चर्यकरं तव॥ २९॥

**कर्म**—भवतु नाम तयोर्विरोधः। तदेवान्तरमुपलभ्य क्रियतां च द्विषद्भिरुपजापः। ज्ञानशर्मणा तु स्वामिहितैषिणा विपक्षानुकूलं पुराभिमानशैथिल्यं कथमुपदिष्टम्।

**कालः**—नहि विपक्षानुकूलमिति न च तदीयोपजाप इति वा प्रवृत्तिरेतस्य। किं तु वस्तु तत्त्वमुपदेष्टव्यमित्येव तस्य स्वभावः।

ज्ञानमद्वैतसन्मात्रं विपक्षस्तत्र को वद ।
स्वरूपस्थितिरेतस्य सारिता पारमार्थिकी ॥ ३० ॥
मूढवद्देहतादात्म्यं राजा न प्रतिपद्यताम् ।
बाधितं तद्दग्धपटन्यायेनास्त्विति तस्य धीः ॥ ३१ ॥

तदुक्तमभियुक्तैः—

'बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते ।
जीवन्नाखुर्न मार्जारं हन्ति हन्यात्कथं मृतः ॥ ३२ ॥

किं च ।

मायया बहुरूपत्वे सत्यद्वैतं न नश्यति ।
मायिकानां हि रूपाणां द्वितीयत्वमसंभवि ॥ ३३ ॥

**कर्म**—भगवन्, युज्यत एतत् ।

**कालः**—एवं च ज्ञानशर्मणोपजप्तोऽपि विज्ञानशर्ममन्त्रिमन्त्रवशात्प्रोत्साहितो राजा यदाचरिष्यति तदालोकयिष्यावहे । (भुवमवलोक्य ।) कथं विदूषकेण सहायमागच्छति राजा तत्रैव गच्छावः ।

(इति परिक्रामतः ।)

(ततः प्रविशति राजा विदूषकश्च ।)

**राजा**—

संख्यापेततया रसानपि भृशं षट्सेवमानस्य मे
तेष्वेवातिबुभुक्षुता प्रतिमुहुर्हाहा सखे जायते ।
एवं व्यापृतिरैच्छिकी मम यतो भुञ्जेऽन्नराशीनहं
पीयन्ते च रसालमाक्षिकदधिक्षीराज्यकुल्या मया ॥ ३४ ॥

अन्नान्येव निरन्तरं विवृणुतां सर्वाणि सस्यानि भू-
र्वारि प्रावृषि कोऽपि वर्षतु दधिक्षीरात्मकं वारिदः ।
सर्वोऽयं लवणाम्बुराशिरपि चेद्दुग्धाम्बुधिर्जायतां
भुञ्जानस्य तथापि हन्त पिबतो न क्षुत्पिपासाशमः ॥ ३५ ॥

तदतिशयेन संपादनीयो मम पानभोजनविधिरिदानीम् ।

**विदूषकः**—(सहर्षम् ।) अज्ज एव्व एदं करणिज्जं । जेण अहं वि एदस्सिं कज्जे तुअ सहाअत्तणे दक्खो होमि । जम्मेण तु विण्णाणेण भवं मिदभोअणे सव्वदा सिक्खीअदि तेण विण्णत्तो वि तुमं तस्स वअणं मा करेहि । (क)

**राजा**—साधु सखे, साधु । सम्यगुपदिष्टम् । तथा करिष्ये ।

**कालः**—वत्स, श्रुतं भवता ।

**कर्म**—श्रुतमेव । एष पाण्डुना प्रहितामपथ्यताजननीं स्वस्य बहु बुभुक्षां न जानाति विदूषकोऽप्यजानन्नेवं भाषते ।

**राजा**—कः कोऽत्र भोः ।

**विदूषकः**—सिक्खिदो वि मए किं तुमं पडिऊलकारिणो अमच्चस्स आआरणत्थं दोआरिअं आमन्तेसि । (ख)

**राजा**—वयस्य, मा बिभिहि । तव मतमेवानुसरामि ।

**विदूषकः**—जइ एव्वं थिरपडिण्णो होहि । एदस्स अविह्मरणत्थं वसणन्ते मए बद्धो गण्ठी । अहं जेव्व तं आणेमि । (ग) (इति निष्क्रम्यामात्यन सह प्रविशति ।)

**अमात्यः**—सति दौवारिके राज्ञा किमर्थं त्वं प्रहितः ।

**विदूषकः**—एत्थ कज्जे अहं जेव्व दोवारिओ । (घ)

**अमात्यः**—कीदृशे कार्ये ।

---

(क) अद्यैवैतत्करणीयम् । येनाहमप्येतस्मिन्कार्ये तव सहायत्वे दक्षो भवामि । जाल्मेन तु विज्ञानेन भवान्मितभोजने सर्वदा शिक्ष्यते तेन विज्ञप्तोऽपि त्वं तस्य वचनं मा कुरु ।

(ख) शिक्षितोऽपि मया किं त्वं प्रतिकूलकारिणोऽमात्यस्याकारणार्थं दौवारिकमामन्त्रयसि ।

(ग) यद्येवं स्थिरप्रतिज्ञो भव । एतस्याविस्मरणार्थं वसनान्ते मया बद्धो ग्रन्थिः । अहमेव तमानयामि ।

(घ) अत्र कार्येऽहमेव दौवारिकः ।

**कालः**—कर्मन्, मन्त्रिणापि न विज्ञाता औपाधिकी राज्ञो बुभुक्षा ।

**कर्म**—बाढम् ।

**विदूषकः**—अमच्च, रण्णो दाणिं बहुभक्खणणामहेए उवट्ठिदे कज्जे । (क)

**मन्त्री**—कीदृशी बहुभक्षणता ।

**विदूषकः**—किमण्णं । बुभुक्खिदो वग्घो विअ सव्वपकिदीणं अह्माणं जीवणं भक्खिदुकामो राआ मा खु णं णिवारेहि जं पलअकालकुविदो रुद्दो विअ चिट्ठदि । (ख)

**मन्त्री**—(विहस्य । स्वगतम् ।) राज्ञः पानभोजनसंपादने स्वस्यापि तद्भविष्यतीत्येतस्य हृदयम् । (प्रकाशम् ।) गच्छाग्रतः । अहमप्यागमिष्यामि । (आकाशे दत्तदृष्टिः ।) किं न्वेतत्स्यात् ।

कार्यान्ववेक्षणविधौ सदसि स्थितेन
　येन क्षमाजनि चिरं सहितुं बुभुक्षा ।
भुक्त्वा च यस्य कियदप्यशनं नितान्तं
　तृप्तिर्भवेत्स कथमीदृशबुद्धिमेति ॥ ३६ ॥

**कालः**—अहं खलु प्राणिनामव्यवस्थितामवस्थां करोमि ।

**कर्मः**—बाढम् । अलमिदम् । अन्यदप्यचिन्तनीयं बुद्धिविलसितमिति जानामि । यत्किल

दृष्ट्वा दक्षकृतापराधजनितक्रोधोज्झिताङ्गीं सतीं
　यः शान्तस्तपसि स्थितः स गिरिशः स्वं प्रत्युपात्तायुधम् ।
कोपोद्धाटितनैटिलेक्षणपुटप्रोद्दामधूमज्वल-
　ज्ज्वालाजालविजृम्भणेन सहसा भस्मीचकार स्मरम् ॥ ३७ ॥

**कालः**—(विहस्य ।) शृणु तावत् ।

---

(क) अमात्य, राज्ञ इदानीं बहुभक्षणनामधेये उपस्थिते कार्ये ।

(ख) किमन्यत् । बुभुक्षितो व्याघ्र इव सर्वप्रकृतीनामस्माकं जीवनं भक्षितुकामो राजा मा खल्वेनं निवारय यत्प्रलयकालकुपितो रुद्र इव तिष्ठति ।

मारुतं यः पिबन्नेव महर्षिस्तपसि स्थितः।
तमहं कुम्भजन्मानं तोयराशिमपाययम् ॥ ३८ ॥

**मन्त्री**—अतिबुभुक्षया राज्ञः किमप्याशङ्कते मे हृदयम्। यथाहुर्नीतिज्ञाः—'अतिबुभुक्षा राज्ञो राज्यच्युतिसूचिका' इति। (राजानं निरूप्य।)

शुष्यन्त्या धृतशोषणे रसनया शश्वल्लिहन्सृक्किणी
किंचिन्मग्नविलोचनः श्रमजलक्लिद्यत्कपोलालिकः।
आरूढभ्रुकुटीभयंकरमुखो निःश्वासदूनाधरो
दृष्ट्या कूणितया विलोकयति मामायान्तमेवान्तिके ॥ ३९ ॥

(उपसृत्य।) जयतु जयतु देवः।

**राजा**—उपविश्यताम्। (इत्यासनं निर्दिशति।)

**विदूषकः**—वअस्स, मए गहिदत्थो किदो अमच्चो। (क)

**राजा**—अमात्य, सज्जीक्रियतामनेनोक्तं सर्वमपि।

**मन्त्री**—

किमियमपूर्वा बुद्धिर्देवस्य विजृम्भते ससंरम्भम्।
ननु कुर्वे यदिदानीमनेन दुर्मेधसा कथितम् ॥ ४० ॥

**विदूषकः**—दाणिं वअस्स, तुमं जेव्व मह सरणं, जं कुविदो अमच्चो। (ख)

**राजा**—अलं चापलेन।

**मन्त्री**—तिष्ठ तूष्णीम्। जानामि ते दौष्ट्यम्।

(विदूषको लज्जितस्तिष्ठति।)

**मन्त्री**—(स्वगतं विचिन्त्य।)

स्यादेतत्किं नात्र पश्यामि हेतुं राज्ञो न क्षुद्राज्यविभ्रंशचिह्नम्।
अस्य श्रेयःसिद्धये बद्धकक्षः किं नाहं स्यां किं न मे स्वामिभक्तिः॥ ४१॥

परं त्वेवं निश्चिनोमि द्विषद्राजमन्त्रिणा पाण्डुना कृतमिदं वैकृतमिति।

---

(क) वयस्य, मया गृहीतार्थः कृतोऽमात्यः।

(ख) इदानीं वयस्य, त्वमेव मम शरणम्। यत्कुपितोऽमात्यः।

भवतु । अस्य चित्तं बहुभक्षणायत्तमन्यत्र व्याक्षिपामि । स एवास्य प्रतीकारः । (प्रकाशम् ।) प्रासादस्योपरि चलतु देवः । तत्रैव संपाद्यते महती तृप्तिः ।

**राजा**—बाढम् ।

(सर्वे प्रासादाधिरोहणं नाटयन्ति ।)

**विदूषकः**—(सर्वतो विलोक्य ।) भो वअस्स, किं एदं भासिणीपाआरे अपुव्वं किं वि दीसइ । (क)

**राजा**—अमात्य, किमिदम् ।

**कर्म**—भगवन्काल, सन्ति खलु शरीरे भासिनीप्रभृतयः सप्तत्वचः तत्र त्वग्रूपप्रथमप्राकारे सिध्मकपद्मककण्टका नाम त्रयो रोगाः पाण्डुना प्रहिता दृश्यन्ते । तान्विदूषको राजा च न वेत्ति, अतः पृच्छति ।

**कालः**—सत्यमेवेदम् ।

**मन्त्री**—राजन्, सिध्मकपद्मककण्टकाः ।

**विदूषकः**—(सभयम् ।) वअस्स, एदाणं एदे भटा पहारं कुणन्ति तदो ते वि अह्माणं उवरि पडिस्सन्ति । ता असदो सिग्घं पलाअणं करेह्म । (ख)

**मन्त्री**—विदूषक, मा भैषीः ।

गुञ्जाफलाग्निलेपः प्रतियोद्धा सिध्मपद्मयोः समरे ।
एष हरिद्राक्षारः कण्टकहृतये मया प्रहितः ॥ ४२ ॥

**राजा**—सुष्ठु कृतममात्येन ।

**कालः**—गुञ्जाफलाग्निलेपहरिद्राक्षारानौषधिविशेषान्प्रहरतो दृष्ट्वा विदूषको ब्रवीति ।

**कर्म**—एवमेतत् ।

**विदूषकः**—अज्ज, को एसो । (ग)

---

(क) भो वयस्य, किमेतद्भासिनीप्राकारेऽपूर्वं किमपि दृश्यते ।

(ख) वयस्य, एतेषामेते भटाः प्रहारं कुर्वन्ति तदा तेऽप्यस्माकमुपरि पतिष्यन्ति । तदस्माच्छीघ्रं पलायनं कुर्मः ।

(ग) आर्य, क एषः ।

**मन्त्री**—व्यङ्गनामा रोगः।

अभिमुखमवेक्षमाणः शशरुधिरालिप्ततनुरिमं हन्तुम्।
तिष्ठति मुखमावृण्वन्मञ्जिष्ठाप्रमुखसाधनो लेपः॥ ४३॥

**विदूषकः**—किं एदं मल्लाणं आजोहणं विअ जं रत्तप्पवाहो दीसइ। (क)

**मन्त्री**—

वैधेय शस्त्रधाराक्षुण्णं प्रवहति पुरो न रक्तं यत्।
तव मूढतां धिगेष प्राकारो लोहिनी नाम॥ ४४॥

**कालः**—त्वग्रूप एष द्वितीयः।

**कर्म**—तथैव।

**विदूषकः**—अहो पमादो। सुवेदाए उपरि सव्वत्थ गअकण्णा वित्थिण्णा। (ख)

**कालः**—कर्मन्, श्वेतनाम्नि तृतीयत्वक्प्राकारे चर्मदलं नाम रोगं पृच्छति विदूषकः।

**राजा**—क एते संवर्तन्ते श्वेतायाम्।

**मन्त्री**—

देव योधेन तत्रापि नियुक्तेन मया पुरा।
आम्रपेश्यभिधानेन लेपेनाक्रम्य भूयते॥ ४५॥

**विदूषकः**—वअस्स, पेक्ख एत्थ का वि दुद्धतरङ्गिणी विअ वहइ। ता अञ्जलीहिं गेह्णिअ पिब। (ग)

**मन्त्री**—धिगौदर्यं, सर्वत्राभ्यवहारभ्रान्तिः। भ्रान्त,

नेयं दुग्धतरङ्गिणी प्रवहति श्वित्रोऽयमिन्दुप्रभः
प्राकारं किल तुर्यतामुपगतं ताम्राख्यमाक्रामति।

---

(क) किमेतन्मल्लानामायोधनमिव यद्रक्तप्रवाहो दृश्यते।

(ख) अहो प्रमादः। श्वेताया उपरि सर्वत्र गजकर्णा विस्तीर्णाः।

(ग) वयस्य, पश्यात्र कापि दुग्धतरङ्गिणीव वहति। तदञ्जलिभिर्गृहीत्वा पिब।

संरम्भो भवतो वृथा स्मरयसि त्वं किं तृषं विस्तृतां
पातुं शक्यत एष किं तव ततो मौढ्यं त्वयाविष्कृतम् ॥४६ ॥

(इति सभ्रूक्षेपं तर्जयते ।)

**राजा**—क एनमभिसरति ।

**मन्त्री**—एष मया नियुक्तो महातालेश्वरः ।

**कालः**—कर्मन्, औषधविशेषोऽयम् ।

**विदूषकः**—अध वेदिणीलोहिदाणं उवरि के वि उल्लुठअन्तो विअ दीसन्ति । (क)

**मन्त्री**—सर्वेऽपि कुष्ठा गलगण्डादयश्च नृत्यन्ति ।

**कर्म**—भगवन्, वेदिनीलोहिते पञ्चमीषष्ठ्यौ त्वचौ । तत्र कुष्ठादेरुत्पत्तिः ।

**कालः**—अस्त्येतत् ।

**विदूषकः**—एत्थ उण थूलाणाम्मि सत्तमे पाआरे को वि लोहआरभत्थिआ विअ पूरिज्जमाणसरीरो दीसइ । (ख)

**मन्त्री**—स्थूलायां विद्रधिरेष शत्रुमल्लः ।

**विदूषकः**—(सभयम् । संस्कृतमाश्रित्य ।)

प्राकारसप्तकमपि प्रसभं गृहीत्वा
स्वेद्यानि सप्त च विशोष्य तथैव कोषान् ।
उल्लुण्ठयिष्यति रिपोर्निवहो भटानां
ग्लायंस्त्वमन्ध इव मूढ इव स्थितोऽसि ॥ ४७ ॥

**राजा**—धिक् प्रमादम् । हन्त विज्ञानशर्मन्, आक्रान्तमेवारिभिरान्तरम् ।

---

(क) अथ वेदिनीलोहितयोरुपरि केऽप्युल्लुठन्त इव दृश्यन्ते ।

(ख) अत्र पुनः स्थूलानाम्नि सप्तमे प्राकारे कोऽपि लोहकारभस्त्रिकेव पूर्यमाणशरीरो दृश्यते ।

**मन्त्री**—देव, धीरो भव । यदि नाहं प्राणिष्यस्तदिदमभविष्यत् ।

**विदूषकः**—(सकोपोपहासम् ।) एदं पच्चक्खं खु वट्टइ । तुमं उण अणुमाणेण एदं णत्थित्ति वण्णेसि । ता अच्छरिअं तक्को विण्णाणसम्ममन्तिणो । वअस्स, आकण्णेहि मे वअणं । एसो अमच्चो एव्व सव्वदुवारेसु सत्तुहिं आक्कन्तेसु भिक्खुवेसं गेह्णिअ पलाइस्सदि । तुह पुणो दुल्लहो मोक्खो । ता एहि । सुरङ्गादुवारेण तुमं णइस्से । (इत्युत्थाय सर्वतो विलोक्य ।) हद्धी हद्धी । किं करेमि मन्दभग्गो । जलमत्तं वि कहिं वि ण दीसइ । सत्तापि जं परिहाओ रित्ताओ विअ दीसन्ति । (पुनर्दृष्ट्वा ।) वअस्स, किं एदं इन्दजालं विअ दीसइ जं सत्तावि परिहाओ दाणिं एव्व सुक्काओ पुणो वि अपरिमिदरसाओ दीसन्ति । कधं इमाओ उत्तरिअ गच्छह्म । (क)

**राजा**—अमात्य, श्रुतमेतस्य वचनम् ।

**मन्त्री**—

एतन्न किंचन ततस्तव मास्तु भीति-
रोजायितं रिपुजनस्य निरीक्ष्य किंचित् ।
यत्स्वेयपूरणविशोषणयोः समर्थं
तन्मूलमेव हि विजृम्भणमप्यरीणाम् ॥ ४८ ॥

अपि च ।

रिपवो लब्ध्वा मार्गं रसादिपरिखाः प्रकोप्य तन्मूलम् ।
देव भवन्ति यथेष्टं पुरमुल्लुण्ठयितुमीशानाः ॥ ४९ ॥

---

(क) एतत्प्रत्यक्षं खलु वर्तते । त्वं पुनरनुमानेनैतन्नास्तीति वर्णयसि । तदाश्चर्यं तर्को विज्ञानशर्ममन्त्रिणः । वयस्य, आकर्णय मे वचनम् । एषोऽमात्य एव सर्वद्वारेषु शत्रुभिराक्रान्तेषु भिक्षुवेषं गृहीत्वा पलायिष्यते । तव पुनर्दुर्लभो मोक्षः । तदेहि । सुरङ्गाद्वारेण त्वां नेष्ये । हा धिक् हा धिक् । किं करोमि मन्दभाग्यः । जलमात्रमपि कुत्रापि न दृश्यते । सप्तापि यत्परिखा रिक्ता इव दृश्यन्ते । वयस्य, किमेतदिन्द्रजालमिव दृश्यते यत्सप्तापि परिखा इदानीमेव शुष्काः पुनरप्यपरिमितरसा दृश्यन्ते । कथमिमा अवतीर्य गच्छामः ।

**कालः**—रसरक्तमांसमेदोऽस्थिमज्जशुक्ररूपाः परिखात्वेन निरूपिताः ।

**कर्म**—एषां वृद्धौ श्लेष्मविद्रधिरक्तविसर्पादयो भवन्ति । कार्श्ये तु रौक्ष्यश्रमशोषादयः ।

**कालः**—युक्तं भवतोक्तम् ।

**मन्त्री**—एवमेते स्वामिकार्ये बद्धपरिकरा यतन्तु नाम । सन्त्येवैषां प्रतीकारशस्त्राण्यस्मदायत्तानि ।

**विदूषकः**—किं एसा वादाली विअ मह अक्खीहिं आउलेदि । (क)

**राजा**—अहो प्रचण्डोऽयमनिलः । तथाहि ।

तारा श्र्यावयितुं घनान्विकिरितुं कृत्वार्कतूलोपमा-
　न्भित्त्वा पातयितुं भुवि क्षितिभृतां तुङ्गानि शृङ्गाणि च ।
सद्यः शोषयितुं समुद्रमवनीकर्तुं तु पांस्वात्मना
　द्रागुन्मूल्य च भूरुहान्भ्रमयितुं शक्तो भवत्यम्बरे ॥ ९० ॥

**मन्त्री**—अयमेव वृद्धिशोषहेतुः परिखाणाम् । एनमुपजीव्योत्कुप्यन्ति शुष्यन्ति च सर्वतः परिखाः ।

**विदूषकः**—किं मूढो विअ पेक्खसि । करेहि एदाणं पडीआरं । (ख)

**मन्त्री**—अदृष्ट्वा किमेवं प्रलपसि ।

**विदूषकः**—(उष्ट्रग्रीविकया विलोक्य ।) अच्चरिअं अच्चरिअं । एत्थ सत्ता-सत्ति वट्टइ । वड्ढन्तेसु सत्तुसु एदे वीरा रोअउलं पहरन्दि । (ग)

**मन्त्री**—तत्र श्लेष्मप्रभृतीन्रक्तपुत्रांश्चन्द्रप्रभा प्रहरति ।

**विदूषकः**—कधं इत्थिआ वि सूराअदि । (घ)

**मन्त्री**—रक्तपुत्राणां विसर्पप्लीहप्रभृतीनाममृतगुग्गुलुच(तृ?)णपञ्चका-

---

(क) किमेषा वातालीव ममाक्षिणी आकुलयति ।

(ख) किं मूढ इव पश्यसि । कुर्वेतेषां प्रतीकारम् ।

(ग) आश्चर्यमाश्चर्यम् । अत्र शस्त्राशस्त्रि वर्तते । वर्धमानेषु शत्रुषु एते वीरा रोगकुलं प्रहरन्ति ।

(घ) कथं स्त्री अपि शूरायते ।

दयः प्रहर्तारः । तथा मांसपुत्राणां शाखोटकतैलप्रभृतयः । मेदसः पुत्राणां कफकेसरिप्रभृतयः ।

**कालः**—कर्मन्, एवं वातपित्तकफेषु वात एको रसरक्तमांसादिधातूनां शोषकः पोषकश्च ।

**कर्म**—एवमेवैतत् । धातूनां प्रकोपे धातुकार्श्ये च भिषजो वदन्ति 'कटुकादयो मांसवृद्धिहेतवः' इति ।

'कटुकाद्वर्धते मांसं कषायाच्छोणितो रसः ।
लवणाद्वर्धते ह्यस्थि मज्जा त्वम्लात्प्रवर्धते ।
मधुराद्वर्धते शुक्रं तिक्तान्मेदः प्रवर्धते ॥'

**विदूषकः**—(परिवृत्यावलोकितकेन ।) अज्ज एदं होदु जुज्झदंसणम् । पेक्खदु भवं पुरट्ठिदं अच्चरिअं । (क)

**राजा**—आर्य, किमेतत्पश्यसि ।

**मन्त्री**—(विहस्य ।) पश्याम्येतत् ।

एतत्पङ्गुद्वितयमनिलश्चारयत्याशयेषु
त्रिष्वश्रान्तं जरठगणिका काचिदेषा पुरस्तात् ।
आजान्वग्रप्रविततकुचा लोभयन्ती प्रसूते
हन्तानर्थाङ्कुरमनुगता सर्वदा देहभाजाम् ॥ ९१ ॥

**कालः**—सम्यगुक्तं मन्त्रिणा यत्पित्तकफौ पङ्गू इति भिषक्प्रसिद्धिः । आशयेष्विति कफपित्तवातानामाशया विवक्षिताः । अपथ्यतां जरठगणिकेति निरूपयन्ति । अनर्थाङ्कुर इति च तत्प्रभवरोगसमुदायम् ।

**कर्म**—साधु निरूपितम् ।

**राजा**—किमिदमप्यरिभिरेवं कृतम् ।

**मन्त्री**—कः संदेहः । श्रूयताम् ।

पाण्डुः स्वस्य निशम्य मत्सरमुखात्तूलायितं विक्रमं
सेर्ष्यो मामकवाचिकेन हृदये राज्ञा निषिद्धोऽपि सन् ।

---

(क) अद्यैतद्भवतु युद्धदर्शनम् । पश्यतु भवान्पुरःस्थितमाश्चर्यम् ।

प्रज्ञागर्ववशान्मदीयविजये जाताभिलाषोऽब्रवी-
दित्थं सान्त्वमपथ्यतां निजकुले स्नेहप्रकर्षान्विताम् ॥ १२ ॥

**विदूषकः**—कहं सन्तं उत्तवन्तो पाण्डू । (क)

**मन्त्री**—एवम्

अप्यस्मत्कुलपक्षपातिनि पथा कामोपभोगप्रदे
किं नात्मप्रभवं कुलं गणयसि प्रक्षीयमाणं शनैः ।
औदासीन्यमिदं कुतस्तव विनोपेक्षां यदि व्यापृता
त्वं नालं बलवानपि प्रभुररिः स्थातुं कुतोऽस्यानुगाः ॥ १३ ॥

अतस्त्वां विज्ञापयामि । संप्रति शत्रुपुरं प्रविशन्ती तत्तदभिमतेन तेन तेन रसेनाशयगतानस्मत्कुलकारकान्रसवाहिनीभिर्नाडीभिश्च पोषयन्ती राजानमपि स्ववशं नयन्ती भेदय विज्ञानहतकात् इत्युपदिश्य मन्दाग्निना सह प्रेषितवान् ।

**विदूषकः**—अच्चरिअं एदाए दूतत्तणं जाए पङ्गुणो वि चालिदा । पेक्ख दाणिं वि किं वि मन्तअन्ती चिट्ठदि । सुणाहि दाव तूह्णीओ भविअ । (ख)

(ततः प्रविशन्त्यपथ्यतया सह मन्दाग्निवातकफपित्ताः ।)

**मन्दाग्निवातकफपित्ताः**—अयि रसवति, किमु वक्तव्यमस्मदीया रोगा इति । यतस्त्वत्संततिः खल्वेते । त्वयैव वशीकृतेऽस्मिन्राजनि एतत्पुरे सुकरस्तेषां प्रवेशः । वयं तु तत्र निमित्तमात्रम् ।

**कालः**—कर्मन्, रसवतीत्यपथ्यताया नामान्तरेण भवितव्यम् ।

**कर्म**—रुचिमतीत्यप्येतस्या नाम ।

**विदूषकः**—एसा ताडआ विअ भीसणा अणुवट्टदि । (ग)

---

(क) कथं सान्त्वमुक्तवान्पाण्डुः ।

(ख) आश्चर्यमेतस्या दूतत्वं यया पङ्गवोऽपि चालिताः । पश्येदानीमपि किमपि मन्त्रयन्ती तिष्ठति । शृणु तावत्तूष्णीको भूत्वा ।

(ग) एषा ताडकेव भीषणानुवर्तते ।

**मन्त्री**—राजा चाहं च रामलक्ष्मणाविव वर्तावहे ।

**विदूषकः**—अहं वि कोसिओ विअ । (क)

**राजा**—(विहस्य ।) तादृक्प्रभावो महर्षिः खलु भवान् ।

**विदूषकः**—भो वअस्स, एसो अमच्चो एदाए मं बलिं दाऊण अप्पाणं मोचेदुं अहिलसन्तो विअ दीसइ। दाणिं भवं जेव मह सरणम् ।(ख)

**मन्त्री**—वैधेय, क्षणं तूष्णीं तिष्ठ । शृणुमः शेषमपि वचनमेषाम् ।

**वातादयः**—अयि रुचिमति,

त्वां वीक्ष्य जागरूकां तस्यां तस्यां रुचिप्रविष्टायाम् ।
स्वत एव भिद्यतेऽसौ विज्ञानादञ्जसा राजा ॥ ९४ ॥

**राजा**—

आलापादेतेषां कुलालदण्डावघट्टनादिव मे ।
हृदयं भ्रमतीदानीं सहसा चक्रमिव किं न्वेतत् ॥ ९९ ॥

**विदूषकः**—अण्णं किम् । दिढं खु णिगिहीदो सि तुमं एदाए अपत्थदापिसाचिआए । अहं उण छवेदो बह्मणो होमित्ति सज्झसेण इमाए विसज्जिदो ह्मि । (ग)

**मन्त्री**—(विहस्य ।) षड्वेदा इत्यनया संख्ययैव सूचितं वेदविज्ञानम् ।

**राजा**—किं विस्मृतं त्वया यत्प्रागेव मम मनीषितार्थं विदूषकेण बोधितोऽसि ।

**मन्त्री**—(स्वगतम् ।) अहो त्रुटितसंघटिताया दास्या विलसितं यदियन्तं कालं विस्मृतापि बुभुक्षा स्मृता सती राज्ञो हृदयमाकुलयति। (प्रकाशम् ।) तदप्यग्रे भविष्यति । देवेन तु एतद्वैरिप्रयुक्तमिति निश्चित्य तद्वशे न भवितव्यमिति बहुशः प्रार्थये ।

---

(क) अहमपि कौशिक इव ।

(ख) भो वयस्य, एषोऽमात्य एतस्या मां बलिं दत्त्वा आत्मानं मोचयितुमभिलषन्निव दृश्यते । इदानीं भवानेव मम शरणम् ।

(ग) अन्यत्किम् । दृढं खलु निगृहीतोऽसि त्वमेतया अपथ्यतापिशाचिकया । अहं पुनः षड्वेदो ब्राह्मणो भवामीति साध्वसेनानया विसर्जितोऽस्मि।

**राजा**—(सबहुमानम् ।) तथ्यं पथ्यं चाह भवान् । तदहमवहितोऽस्मि ।

**विदूषकः**—को एसो विज्जपुञ्जो विअ धगधग्गअमाणो सव्वदो वि मह अच्छी आउलेदि । (क)

**मन्त्री**—परिवारपरिवृतो ज्वरराज एषः । यमेनमुपरुध्य सर्वेऽपि रोगाः प्रहरन्ति । अत एवायं राजपदभागिति भिषग्व्यवहारः ।

**कर्म**—युक्तमाह मन्त्री । तथाहि ।

ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनोऽन्तकः ।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ॥ ५७ ॥
जन्मान्तर्यो मोहमयः संतापात्मापचारजः ।
विविधैर्नामभिः क्रूरो नानायोनिषु वर्तते ॥ ५८ ॥

**कालः**—कर्मन्, नानायोनिष्विति सुष्ठूक्तं त्वया ।

पाकलस्तद्यथेभानामभितापो हयेषु च ।
वान्तादानामलर्कः स्यान्मत्स्येष्विन्द्रमदः स्मृतः ॥ ५९ ॥
ओषधीषु तथा ज्योतिश्चुणपा धान्यजातिषु ।
जलेषु नीलिका भूमावूषो नृणां ज्वरो मतः ॥ ६० ॥

**राजा**—पश्य सखे, पश्य ।

त्रिकूटाद्रेः कूटैस्त्रिभिरिव शिरोभिः प्रतिभयो
दिशः पश्यन्दृग्भिः शशरुधिरसोदर्यरुचिभिः ।
त्रयाणां पादानां तृणतरुसमुच्छ्रायजयिना-
मयं न्यासैर्भूमिं नमयति गदानामधिपतिः ॥ ६१ ॥

**कालः**—कर्मन्, पश्यायं यस्मिन्नुदेष्यति तस्य जनस्य ।

आलस्यमश्ममयतां पुलकोद्गमं च
गात्रे करोति न रतिं क्वचिदातनोति ।
जाताश्रु जृम्भयति सप्तिविघूर्णमल्प-
प्राणं तमम्बु च पिपासयतेऽनुवेलम् ॥ ६२ ॥

---

(क) क एष विद्युत्पुञ्ज इव धगधगायमानः सर्वतोऽपि ममाक्षिणी आकुलयति ।

**कर्म**—एवमेतत् । अपि चानेनाविष्टः ।

यद्रूक्ष्यमम्लकटुतिक्तमपेक्षते त-
न्न स्वादु खादति च सूर्क्ष्यते हितोक्तम् ।
जङ्घां विवेष्टयति हुंकृतिमादधाति
बालेषु न क्वचन दर्शयते रुचिं च ॥ ६३ ॥

**विदूषकः**—दिट्ठी वि ण पहुवदि णं पेक्खिदुं । (क)

**मन्त्री**—एष ज्वरोऽपि यक्ष्मराजसखः ।

क्रोधनारोचकाध्मानैस्त्रिभिः पुत्रैरुपैधते ।
भार्यया पञ्चविधया ग्रहण्यभिधया सह ॥ ६४ ॥

**विदूषकः**—(अन्यतो विलोक्य सभयकम्पम् ।) वअस्स, अहं दाणिं ण जीविस्सं, जदो खु करगहिदखग्गखेडअसरकम्मुअपरिघसूलगदा पच्चत्थिराअसेणा अभिवड्ढइ साअरो विअ । (ख)

**मन्त्री**—(विलोक्य ।) एते व्रणराजपुत्रा अष्टविधा भगंदराः । एते च षड्विधा मूलाधिष्ठानमभिव्याप्नुवन्ति । एते च कफसंभवा दश मेहाः पित्तसंभवैः षड्भिर्वातसंभवैश्चतुर्भिश्च सह विंशतिसंख्याका यक्ष्मराजपुत्राः । अपरत्र च त्रयोदश मूत्रघाताः प्रसज्जन्ते । एतान्यपि च वातपित्तकफसंनिपातभुक्तविट्धात्वश्मरीकृच्छ्राणीत्यष्टौ कृच्छ्राणि चतसृभिरश्मरीभिः सह सज्जीभवन्ति । एष गुल्मोऽपि शूलमवलम्ब्य विजृम्भते तथाष्टविधशूलाश्च निरुन्धन्ति ।

**कालः**—कर्मन, समर्थोऽयं मन्त्री रोगविशेषपरिज्ञाने ।

**मन्त्री**—तथान्येऽप्यत्र बहवः प्रभवन्ति । ये किल

मन्दाग्न्युत्थोदरस्थामयसुहृद उदावर्तभेदा अशीति-
र्वातोत्थाः पित्तजा विंशतियुगगणिता विंशतिः श्लेष्मजाश्च ।

---

(क) दृष्टिरपि न प्रभवत्येनं प्रेक्षितुम् ।

(ख) वयस्य, अहमिदानीं न जीविष्ये, यतः खलु करगृहीतखड्गखेटकशरकार्मुकपरिघशूलगदा प्रत्यर्थिराजसेनाभिवर्धते सागर इव ।

चत्वारोऽक्ष्णोर्वसन्तो नवतिरपि चतुःसप्ततिर्वक्त्रनिष्ठा
मूर्धस्थाः पङ्क्तिसंख्याः क्रिमिगदनिवहोऽप्यस्ति नैके च शोफाः ॥६५॥

तथा भूतोन्मादा विंशतिः।

आमवात इति कोऽपि चतुर्धा जायते निखिलरोगनिवासः।
वातपित्तकफशोणितमद्यक्ष्वेडजा षडुदयन्ति च मूर्छाः ॥ ६६ ॥

अपि च।

एते षोढा भिन्ना उन्मादाश्च प्रवर्तन्ते।
अभिवर्तन्ते चामी हृद्रोगाः पञ्चधा भिन्नाः ॥ ६७ ॥

**विदूषकः**—पमादो पमादो। एदेहिं अरिहिं दुवाराइं पाआरा परिखा कोसाआराइं अ सव्वं वि अक्कत्तम्। किं बहुजम्पिदेण। हृदयं गुम्मं करिअ अधिट्ठिदं। तिलप्पमाणो वि देसो अणक्कन्तो ण दीसइ। (अञ्जलिं बद्ध्वा।) वअस्स, अदो वरं णत्थि मे जीविदासा। मम बह्मणीए विहुराए अन्धकूवणेत्ताए तुमं एव्व सुमरिअ जोअक्खेमं वहेहि। पढमं एव्व एसो अणत्थो सुणाविदो म्हि मए। तुमं उण दुम्मन्तिणो से वअणवीसम्भेण इमं दुरवत्थं पावदो सि। पेक्ख दाव तस्स फलं एदं संवुत्तं। (क)

**राजा**—अमात्य, संवदत्येव विदूषकवचनम्।

त्वद्बुद्धिप्रसरोऽत्र धिग्विफलितो निक्षिप्य सर्वामपि
त्वय्येवात्मधुरां मया निवसता संप्राप्तमीदृक्फलम्।
वैयग्र्यं हृदि सर्वथास्मि गमितो द्वाराणि कोषालयाः
प्राकाराः परिखाश्च हा निखिलमप्याक्रान्तमेवारिभिः ॥ ६८ ॥

---

(क) प्रमादः प्रमादः। एतैररिभिर्द्वाराणि प्राकाराः परिखाः कोषागाराणि च सर्वमप्याक्रान्तम्। किं बहुजल्पितेन। हृदयं गुल्मं कृत्वा अधिष्ठितम्। तिलप्रमाणोऽपि देशोऽनाक्रान्तो न दृश्यते। वयस्य, अतःपरं नास्ति मे जीविताशा। मम ब्राह्मण्या विधुराया अन्धकूपनेत्रायास्त्वमेव स्मृत्वा योगक्षेमं वह। प्रथममेव एषोऽनर्थः श्रावितोऽस्ति मया। त्वं पुनर्दुर्मन्त्रिणोऽस्य वचनविश्रम्भेणेमां दुरवस्थां प्रापितोऽसि। पश्य तावत्तस्य फलमिदं संवृत्तम्।

एवं स्थिते किमन्यद्ब्रवीमि।

गात्रं मे परितप्यते पदयुगं शक्नोति न स्पन्दितुं
स्तब्धं चोरुयुगं भुजौ च भजतः कम्पं मुखं शुष्यति।
नास्त्यक्ष्णोर्विषयग्रहः श्रवणयोरप्येवमेव त्वचो-
ऽप्यन्यत्किं चलतीव हृन्निजपदादाशा भ्रमन्तीव च॥ ६९॥

अपि च।

ननु मे दुःखभागात्मा न धैर्यमवलम्बते।
काठिन्यमिव मृत्पिण्डो घनवारिसमुक्षितः॥ ७०॥

किं च मया भवत्संविहितरसगन्धकौषधघटितरसायनप्रत्याशया

त्वदुपदेशवशंवदचेतसा वपुषि नश्वरके ममता वृथा।
विदधता शिवभक्तिरसायनं शिवशिवान्तरितं परमार्थदम्॥ ७१॥

**मन्त्री**—सत्यमेतच्छिवभक्तिरसायनं परमार्थदमिति सकलैहिकसंकटवि-घटनं च। किं तु

पुराभिमानो न वृथा तद्दार्ढ्येन विना कथम्।
चित्तस्वास्थ्यं विना तच्च शिवभक्तिर्दृढा कथम्॥ ७२॥

अतो विज्ञापयामि।

कृच्छ्रेऽपि धैर्यग्रहणं राज्ञो विजयसाधनम्।
इति नीतिविदः प्राहुर्धैर्यमालम्ब्यतां ततः॥ ७३॥

किं च तव निदर्शयामि तादृशमितिहासम्। यथा।

श्रेयः प्रापदगस्तिना स नहुषः शप्तोऽपि धैर्यग्रहा-
न्नन्वालम्ब्य धृतिं शुभं नलहरिश्चन्द्रावपि प्रापतुः।
कृत्वा छद्मकृतेऽरिणा प्रणयिनीचौर्येऽपि धैर्यं वह-
न्बद्ध्वा सेतुमुदन्वदम्भसि न किं रामो विजिग्ये रिपून्॥७४॥

**विदूषकः**—वअस्स, सुदं किं दाणिं वि एदस्स मन्तिणो एदं एव्व वअ-

णम् । संपदं एसो अत्ताणं वि ण जाणादि राजकज्जं कुदो उण उम्मादं वा उवजावं वा सत्तुकिदम् । (क)

**मन्त्री**—(विहस्य ।) वैधेय, किं वृथा प्रलपसि । देव, अलं धैर्यत्यागेन । एते च मत्संनिहिता रसौषधिविशेषा भवत्सेवनमेव प्रतीक्षमाणा विपक्षक्षपणाय सज्जीभवन्ति तानेताननुगृहाण । (नेपथ्ये ।) देव, एते वयम्

शिवभक्तिप्रसादेन लब्धा मन्त्रिवरेण च ।
सम्यक्संविहिताः सर्वे विपक्षान्विजयामहे ॥ ७५ ॥

पुरस्तादचिरादेवास्माभिर्बाध्यमानं यक्ष्माणं सामात्यं सपुत्रकलत्रं ससैन्यं च पश्य ।

**राजा**—(दृष्ट्वा ।) प्रियं प्रियम् । सर्वे यूयमप्रमत्ता विपक्षक्षपणाय यतध्वम् ।

(ततः प्रविशति यक्ष्मा पाण्डुश्च ।)

**यक्ष्मा**—पाण्डो, क्व पुनरस्मदीया भटाः प्रहारार्थं वर्तन्ते ।

**पाण्डुः**—देव, पश्य । केचिदनुगच्छन्ति, केचित्पुरो गच्छन्ति ।

**कालः**—कर्मन्, यदुक्तं पाण्डुना तत्तथैव । यतः,

अनेकरोगानुगतो बहुरोगपुरोगमः ।
राजयक्ष्मा क्षयः शोषो रोगराडिति यः स्मृतः ॥ ७६ ॥

**कर्म**—जानामि यादृश एष इति ।

नक्षत्राणां द्विजानां च राजाभूद्यो विधुः पुरा ।
तं प्रजग्राह यक्ष्मासौ राजयक्ष्मा ततः स्मृतः ॥ ७७ ॥
देहेषु यः क्षयकृतेः क्षयस्तत्संभवाच्च सः ।
रसादिशोषणाच्छोषो रोगराड्रोगरञ्जनात् ॥ ७८ ॥

**यक्ष्मा**—सखे पाण्डो, प्रबलेषु सामदानभेदा न प्रसरन्ति, अतोऽन्तिम एव प्रयोगः संप्रतिपत्तव्यः । तदत्र किं विलम्बेन ।

---

(क) वयस्य, श्रुतं किमिदानीमप्येतस्य मन्त्रिण इदमेव वचनम् । सांप्रतमेष आत्मानमपि न जानाति राजकार्यं कुतः पुनरुन्मादं वा उपजापं वा शत्रुकृतम् ।

शस्त्राशस्त्रि प्रसह्याथ प्रवृत्ते रणवैशसे ।
अजीवकमरोगं वा पुरमेतद्भविष्यति ॥ ७९ ॥

तदेहि । तत्क्षमां भूमिमेव गच्छामः । (इति पाण्डुना सह निष्क्रान्तः ।)

**कालः**—कर्मन्, पश्य पश्य विपक्षविजयाय विज्ञानमन्त्रिप्रयुक्तान्भटान् ।

**राजा**—वयस्य, मन्त्रिणा दर्शितेन विक्रमव्यापारेण हृदयं मम निर्वृणोति । यतः ।

भूपतिरससिन्दूरज्वराङ्कुशानन्दभैरवैः साकम् ।
चिन्तामणिश्च शत्रून्राजमृगाङ्कश्च जेतुमुद्युङ्क्ते ॥ ८० ॥

पश्य चात्रारोग्यचिन्तामणेरुत्तरेण ।

कृतसिद्धरसेश्वरः पुरस्तात्करमालम्ब्य च वातराक्षसस्य ।
समराङ्गणमेति पूर्णचन्द्रोदय एषोऽग्निकुमारदर्शिताध्वा ॥ ८१ ॥

प्रतापलङ्केश्वर एष यश्च प्रतापयत्यत्र निजप्रतापात् ।
गदान्धनुर्वातमुखानशेषांल्लङ्केश्वरः शत्रुभिरप्रसह्यः ॥ ८२ ॥

वसन्तकुसुमाकरः सरभसं विधत्ते रणं
सुवर्णरसभूपतिर्वशयते रुजां मण्डलम् ।
प्रसह्य वडवानलाभिधमिदं च चूर्णं जवा-
द्विशोषयति सर्वतः प्रबलमग्निमान्द्यारुचिम् ॥ ८३ ॥

सुदर्शनं चक्रमिवामरारीन्सुदर्शनं चूर्णमिदं रणाग्रे ।
निहन्ति जीर्णज्वरमाशु पित्तजन्या रुजश्चूर्णयति प्रसह्य ॥ ८४ ॥

प्रबलानलसंकुलितं गदगहनं दुरवगाढमन्येन ।
हन्ति धुरि तीक्ष्णसारो वातकुठारः समूलमुन्मूल्य ॥ ८५ ॥

असकृत्स्खलतः किंचिद्गतिमान्द्यविधायिनः ।
प्रमेहान्माद्यतो हन्ति मेहकुञ्जरकेसरी ॥ ८६ ॥

गतिमन्थरताधायिवर्ष्मवैपुल्यशालिनः ।
सर्वान्वातगजान्हन्ति वातविध्वंसनो हरिः ॥ ८७ ॥

**विदूषकः**—देव, अचेतणा वि एदे चिन्तामणिपहुदिणो संपदं संपहारं कुणन्ति त्ति अच्चरिअम् । ता इन्दजालं विअ एदं मे पडिभादि । (क)

**राजा**—धिङ्मूर्ख, अनभिज्ञोऽसि शास्त्रतत्त्वस्य । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः । अभिमानिदेवताश्चैषां सचेतनाः श्रूयन्ते । (कर्णं दत्त्वा ।) मन्त्रिन्, कोऽयं कलकलाविर्भावः ।

**मन्त्री**—पश्यतु देवः ।

शस्त्राशस्त्रि गदागदि प्रथमतो निर्वर्तिते संयुगे
मुष्टीमुष्टि तलातलि प्रववृते पश्चादिदं भीषणम् ।
जित्वारीनिह देव तावकभटैरापूर्यते काहला
शङ्खः संप्रति शब्द्यते दृढतरं संताड्यते दुन्दुभिः ॥ ८८ ॥

अपि च ।

आस्फालयन्ति दृढमूरुयुगं कराग्रैः
कुर्वन्ति कुण्ठितघनारवमन्दहासम् ।
जीवोऽयमस्मदधिपो जितवानमित्रा-
नित्युद्धतं युधि भटास्तव पर्यटन्ति ॥ ८९ ॥

**विदूषकः**—कहं एत्थ एव भग्गमणोरहदाए परुण्णो विअ जक्खराओ लक्खीअदि । (ख)

**राजा**—वयस्य, सम्यङ्निरूपितं भवता ।

गण्डस्थलप्रसृमराश्रु करं करेण
निष्पीडयन्कटकटाकृतदन्तपङ्क्तिः ।
यक्ष्मा ललाटघटितभ्रुकुटिः किलाय-
मन्तःस्पृशं रुषमभीक्ष्णमभिव्यनक्ति ॥ ९० ॥

**मन्त्री**—न केवलां रुषं शुचं च ।

---

(क) देव, अचेतना अप्येते चिन्तामणिप्रभृतयः सांप्रतं संप्रहारं कुर्वन्तीत्याश्चर्यम् । तदिन्द्रजालमिवैतन्मे प्रतिभाति ।

(ख) कथमत्रैव भग्नमनोरथतया प्ररुदित इव यक्ष्मराजो लक्ष्यते ।

**विदूषकः**—एसो सोएण पलवन्तो विअ दीसइ । (क)

**मन्त्री**—शृणुमस्तर्हि प्रलापमेतस्य । विषूचीमत्सरावप्येनमनुवर्तेते ।

(ततः प्रविशति विषूचीमत्सराभ्यां सहितो यक्ष्मा ।)

**यक्ष्मा**—हन्त कथं तादृशानामपि मत्सैन्यानामीदृशीयं दुरवस्था । आश्चर्यमाश्चर्यम् ।

जीवस्य ध्वजिनीचराननतिबलाञ्शक्नोति कः शासितुं
दुर्वारैर्युधि पातितानि मम यैः सर्वाणि सैन्यानि च ।
पाण्डुर्मे सचिवः परैरवधि वा भीतः पलायिष्ट वा
नो जाने मम जीवतो बत हताः पुत्रास्तथा बान्धवाः ॥ ९१ ॥

(सशोकावेगम् ।)

भो भोः सुताः क नु गताः स्थ विना भवद्भि-
र्जीर्णाटवीव जगती परिदृश्यते मे ।
आक्रम्यते च तमसा हरिदन्तरालं
शोकाग्निसंवलितमुत्तपते वपुश्च ॥ ९२ ॥

(इति मूर्छति ।)

**मत्सरः**—समाश्वसिहि समाश्वसिहि ।

**यक्ष्मा**—(समाश्वस्य ।)

वत्सा हे वदनाम्बुजानि मुदितो द्रक्ष्यामि केषामहं
केषां माक्षिकमाक्षिपन्ति वचनान्याकर्णयिष्ये मुदा ।
मर्त्यानां तनुषु प्रविष्टमचिरान्मां वर्धयिष्यन्ति के
यूयं यत्समरे परैरतिबलैर्नामावशेषीकृताः ॥ ९३ ॥

**कालः**—

पुत्रप्रविलयाद्दुःखं न सोढुं शक्यते जनैः ।
वसिष्ठोऽपि महान्येन ववाञ्छ पतनं भृगोः ॥ ९४ ॥

तदिमं पुत्रशोकसंतप्तं यक्ष्माणमवेक्षितुं न शक्नोमि ।

---

(क) एष शोकेन प्रलपन्निव दृश्यते ।

**कर्म**—अहमप्येवमेव ।

(इत्युभौ निष्क्रामतः ।)

**मत्सरः**—

देवालं शोकेन द्विषि जीवति न खलु धर्मोऽयम् ।
यावच्छक्ति ततोऽरीन्हत्वा शोचन्ति नैव तान्वीराः ॥ ९१ ॥

अत इदानीं पुनरानीय परिभवमरिहतानामस्मदीयानामानृण्यमृच्छतु भवान् ।

**विषूची**—

दाणिं खु एव दिट्ठा राअकुमारा कहिं गदा तुह्मे ।
ढज्जइ हिअअं सोओ अग्गी विअ सुक्कतिणजालम् ॥ ९६ ॥ (क)

**यक्ष्मा**—

गण्डद्वयेऽपि गलितैर्नयनाम्बुपूरै-
रामृष्टपत्त्रलतमाकुलकेशपाशम् ।
पाणिद्वयप्रहतपाटलबाहुमध्य-
मस्या वपुर्मम शुचं द्विगुणीकरोति ॥ ९७ ॥

**मत्सरः**—राजन्, धैर्यमवलम्ब्यताम् । कृतं शोकेन । संप्रति हि कतिपये देवपादमूलोपजीविनः सैन्याः केनापि दुरपनेयप्रवृत्तयः ।

**यक्ष्मा**—ततः किम् ।

**मत्सरः**—ततश्च तत्प्रयोगेण कुण्ठितशक्तिर्भविष्यति विज्ञानमन्त्रिहतकः । तथा च वैरनिर्यातनं कर्तुमुचितमिति प्रतिभाति ।

**यक्ष्मा**—(सविमर्शम् ।) अवन्ध्योऽयं प्रयत्नः । तदर्थमेव शत्रून्मूलनाय गच्छामः । (इति विषुचीमत्सराभ्यां सह निष्क्रान्तः ।)

**मन्त्री**—मत्सरेण कर्णेऽसज्जयार्थं किमप्युपदिष्टो यक्ष्मा निष्क्रान्तः

---

(क) इदानीं खल्वेव दृष्टा राजकुमाराः कुत्र गता यूयम् ।
दहति हृदयं शोकोऽग्निरिव शुष्कतृणजालम् ॥

तद्वयमपि तदिङ्गितानुमितं पर्यालोच्य तत्प्रतिविधानाय व्याप्रियमाणा इष्टं साधयामः ।

(इति निष्क्रान्ताः सर्वे ।)

---

सप्तमोऽङ्कः ।

(ततः प्रविशति जीवराजो विज्ञानमन्त्री च )

**जीवराजः**—(सहर्षम् ।)

मन्त्रिस्त्वदीयमतिकौशलनौबलेन
तीर्णो रणाम्बुधिरभूदतिदुस्तरोऽपि ।
यस्मिन्भयंकरगतिर्ज्वरपाण्डुमुख्यो
रोगव्रजः किल तिमिंगिलतामयासीत् ॥ १ ॥

किं ब्रवीमि संकुलयुद्धेऽस्मदीयानां तदीयेषु प्रवृत्तमोजायितम् ।

एकत्र मण्डभेदो गुटिकाभेदः परत्र मन्दाग्निम् ।
निखिलामयजननकरं निजपानं प्रथममिदमहमदर्शम् ॥ २ ॥

अथ गुलूच्यादिपञ्चभद्रकषायं निकषा यन्नवं (?) तमवलोक्य पलायन्त पित्तसमीरज्वराः । तदनन्तरं जगदन्तरप्रसिद्धः स्वयमनश्वरसारो यक्ष्मपरिक्षपणदक्षिणः सन्नपि संननाह स्वयं त्रैलोक्यचिन्तामणिर्विनिपाताय संनिपातेन साकमष्टविधानामपि ज्वराणाम् ।

स्थावरजङ्गमगरलं ज्वरमामोत्थं व्रणोपजातं च ।
आरोग्यपूर्वचिन्तामणिरपि निघ्नन्मया रणे दृष्टः ॥ ३ ॥

ततः सर्वज्वरानपि निगृहीतवन्तं ज्वराङ्कुशमुत्तरेण गुल्मार्शः संग्रहिणीर्विपाटितवतो ग्रहिणीकपाटस्य पूर्वभागे

या पञ्चामृतपर्पटी ग्रहिणिकायक्ष्मातिसारज्वर-
स्त्रीरुक्पाण्डुगदाम्लपित्तगदरुक्क्षुन्मान्द्यविध्वंसिनी ।
तामद्राक्षमहं रणे स्त्रियमपि व्यातन्वतीं पौरुषं
चामुण्डामिव चण्डमुण्डसमरप्रक्रान्तदोर्विक्रमाम् ॥ ४ ॥

पश्चाद्भागे तस्याः

अरुचिप्लीहवमिज्वरकासार्शःश्वासशूलानाम् ।
सूक्ष्मैलादिमचूर्णं निरवर्णयमाशु युधि निहन्तारम् ॥ ५ ॥

तदनु जलजाक्ष इव दनुजलोकस्य सिद्धवसन्तः शुक्रदोषस्य गोक्षुरकादिचूर्णमिश्रितपयःपानविधिः पुंस्त्वदोषस्य त्रिविक्रमरसो मूत्रकृच्छ्राश्मर्योर्विष्यन्दनतैलयोगो भगंदरस्य लघुलङ्केश्वरः कुष्ठस्य नित्योदितरसो मूलानां विद्याधररसो गुल्मानां त्रिनेत्ररसः शूलानां महावह्निरस उदररोगाणां गिरिकर्ण्यादिविधिर्गुञ्जातैललेपश्च शिरोरोगस्य चन्द्रोदयवर्तिश्च चक्षूरोगस्य सौवीरादिपक्वतैलनिषेकः कर्णरोगाणां सिद्धार्थत्रिफलाद्यौषधयोगविशेषपानविधिः कृत्योन्मादविषज्वरसर्वग्रहाणां मधुसर्पिर्युतचूर्णविशेषलेहनविधिः पाण्डुहृद्रोगभगंदरशोफकुष्ठोदरार्शसां मेहकुञ्जरकेसरीप्रमेहाणां च विजयमहोत्सवेन समुत्सारितसर्वरोगखेदाः समरजनैरप्यस्तूयन्त । ततः किमप्यवशिष्यते कार्यमस्माकम् ।

**मन्त्री**—स्वामिन्, श्रूयताम् ।

जन्यार्णवोऽरिजनितः सुमहानिदानीं
तीर्णोऽप्यतीर्ण इति निश्चिनुते मनो मे ।
यन्मत्सरेण रणभुव्युपदिष्टकार्यः
कर्णे स तत्परमितो विदधीत यक्ष्मा ॥ ६ ॥

**राजा**—विज्ञानसचिव यथार्थनामधेय, मत्सरेण यक्ष्मणः कर्णे किमुक्तं भवेत् । यक्ष्मा च तदाकर्ण्य किं विदध्यात् । तद्विधानेन चास्माकमुत्तिष्ठेत कीदृशमत्याहितम् ।

**मन्त्री**—(क्षणं विचिन्त्य ।) किमन्यद्ब्रवीमि । केचिदसाध्यरोगा यक्ष्माणमुपासते तैरस्मान्बाधितुं यक्ष्माणं प्रति मत्सरेण संकेतितमिति शङ्के ।

**राजा**—(सवितर्कम् ।) एवमेवास्मासु यक्ष्मा यदि वक्रं विधिमुपक्रंस्यते तत्र कमुपायं पश्यति भवान् ।

**मन्त्री**—'भक्ताय भवते कदापि मया दर्शयिष्यते साम्बः' इति भगवत्या तुभ्यं जातुचिदावेदितं भक्त्या इति कदाचित्कथान्तरे देवेनैव मां

प्रति प्रागुक्तम् । तदिदानीं तामेव भगवतीं भक्तिं हृदि दृढमवलम्ब्य भगवद्दर्शनार्थं संनिधानानुग्रहः प्रार्थ्यताम् । तत एवासाध्यरोगाभिभवः सुलभः प्रतिभाति ।

**राजा**—यद्येवमनुध्याय विध्यादिविबुधकृतनिषेवणं करोमि मनसा शरणं शंकरम् । (इत्यनुध्यायति ।)

**मन्त्री**—आश्चर्यमाश्चर्यम् । भक्तवत्सला भगवतश्चन्द्रचूडस्य परां कोटिमवलम्बते । यदनुध्यानमात्रमनुतिष्ठति स्वामिनि तदाविर्भावसूचनमेतदालक्ष्यते । यत्किल

शैलस्थूलशिरोभिरुग्रभुजगप्रायश्रवोभूषणै-
जानुस्पर्शिबृहत्पिचण्डचटुलैस्तालद्रुदीर्घाङ्घ्रिभिः ।
प्रावृण्णैशतमिस्रनीलतनुभिर्भस्मत्रिपुण्ड्राङ्कितैः
शूलोद्भासिभुजैः समावृतमिदं भूतैरभूद्भूतलम् ॥ ७ ॥

**राजा**—(ध्यानाद्विरम्य कर्णं दत्त्वा ।) अहो भाग्यप्रकर्षो जीवलोकस्य। यतः।

'जय विश्वपते जयेन्दुमौले जय शंभो जय शंकरेति शंसन् ।
परितः श्रुतिगोचरो जनानां कलुषं लुम्पति काहलीनिनादः ॥ ८॥

**मन्त्री**—(सहर्षम् ।) राजन्, फलितस्ते मनोरथः । पश्य ।

आरूढः स्फाटिकक्ष्माधरनिभवृषभं सार्धमद्रीन्द्रपुत्र्या
वीतावष्टम्भकुम्भोदरकरयुगलोदस्तमुक्तातपत्रः ।
गायद्गन्धर्वनृत्यत्सुरगणिकपुरोभागघोषन्मृदङ्गो
गङ्गाभृत्युत्तमाङ्गे शशिशकलधरः शंकरः संनिधत्ते ॥ ९ ॥

अपि च ।

मौलिन्यस्ताञ्जलीनां दरमुकुलितदृङ्निर्यदानन्दबाष्प-
क्लिद्यद्गण्डस्थलानामविरलपुलकालंकृतस्वाकृतीनाम् ।
वेदान्तप्रायभूरिस्तुतिमुखरमुखाम्भोजभाजामृषीणां
पङ्क्त्या पाश्चात्यभागो झटिति निबिडितो दृश्यतामस्य शंभोः ॥१०॥

**राजा**—मन्त्रिन्, इतः परं प्रणिपातादिना भगवन्तं प्रसाद्य स्वाभीष्टमर्थं प्रार्थयिष्ये ।

**मन्त्री**—अनितरसाधारणमेतस्य भक्ताभीप्सितप्रदानचातुर्यम् । यः प्रसादितवते पार्थाय पाशुपतमस्त्रं प्रतिपादितवान् । येन च निखिलक्षत्रियकुलजिघृक्षवे भार्गवाय प्रसादीकृतः परशुः ।

**राजा**—उपपन्नमिदम् । एवमपरिमितानि महान्त्याश्चर्यचरितानि देवस्य । यच्च कपिलभस्मीकृतप्रपितामहसंघसमुत्तारणकृतप्रयत्नभगीरथप्रसादितायाः सुरापगाया भुवमुत्तरन्त्या गर्वभञ्जनं नाम मृत्युंजयस्य चरितं तदपि परमाद्भुतमेव ।

**मन्त्री**—जगत्प्रसिद्धमेवेदम् । तथाहि ।

वेगाकृष्टोडुचक्रानुकरणनिपुणश्वेतडिण्डीरखण्ड-
श्लिष्टोर्मीनिर्मितोर्वीवलयविलयनाशङ्कसातङ्कदेवा ।
विभ्रम्याकाशगङ्गा विधिभुवनभुवः सर्वदुर्वारगर्वा
निर्विण्णा धूर्जटीयोद्भटघटितजटाजूटगर्भे निलिल्ये ॥ ११ ॥

किं च । अध्वरविधावपराधिनो दक्षप्रजापतेः शिक्षणावसरे रोषसंधुक्षितेन नीललोहितेन विसृष्टः स्वांशभूतः प्रभूतकोपविधूतविनयमुद्रो वीरभद्र एव किं न कृतवान् । तथाहि ।

शूलाग्रक्षतदक्षकण्ठरुधिरैः शोणे रणप्राङ्गणे
कीर्णो दन्तगणश्चपेटदलितादर्कस्य वक्त्रान्तरात् ।
वीरश्रीकरपीडनोत्सवविधावेतस्य वैश्वानर-
प्रक्षिप्तोज्ज्वललाजविभ्रमकरो नालोकि लोकेन किम् ॥ १२ ॥

**राजा**—किमिति वर्ण्यतामयमाश्चर्यचर्यो भगवान् ।

क्रोधारूढभ्रुकुटिरलिके क्रूरखड्गप्रहार-
श्छिन्नग्रीवत्रिदशनिकरच्छन्नसङ्ग्रामभूमिः ।
शक्रश्रीशद्रुहिणशरणालाभविद्राणविद्या-
दानोन्निद्रः प्रणतजनताभद्रदो वीरभद्रः ॥ १३ ॥

कः पुनरस्य स्वरूपं तत्त्वतः शक्नोत्यवधारयितुं यदन्तर्वाणयः सर्वेऽपि स्वच्छन्दानुरोधात्कलयन्ति स्वरूपमेतस्य । तथाहि—

कर्तारं कतिचित्किलानुमिमते कार्यार्थमुर्व्यादिभिः
केऽप्याहुः पुरुषस्य यस्य पुरतः सृज्यं प्रकृत्या जगत् ।
क्लेशैः कर्मभिराशयैश्च सकलैरस्पृष्टरूपोऽखिल-
प्रज्ञोऽनादिगुरुः स ईश्वर इति व्याख्यन्ति केचित्तु यम् ॥१४॥

अपि च ।

श्रुतमिति निगमान्तेष्वेकमेवाद्वितीयं
निरवधि परिपूर्णं ब्रह्म सच्चित्सुखात्म ।
विलसति किल यस्मिन्विश्वमेतत्तमिस्रे
स्रजि फणिवदबोधादित्थमाहुः किलान्ये ॥ १५ ॥

**मन्त्री**—तत्तादृशमेनमवाङ्मनसगोचरमहिमानं पङ्कजासनपाकशासनप्रभृतयो देवाः प्रणमन्ति भगवन्तम् । अतः सेवावसरं प्रतिपालय क्षणमात्रम् ।

**राजा**—सम्यङ्निरूपितममात्येन ।

नमदमरसहस्रमौलिमालापरिगलितैर्भुवि पारिजातपुष्पैः ।
अलिकुलमनवाप्तदिव्यगन्धग्रहणकुतूहलि कृष्यते समन्तात् ॥१६॥

**मन्त्री**—अवसरोऽयमखिलसुरासुरगुरोः सरोरुहाकरसंवेशविद्यादेशिककलाशेखरस्य सेवनाय देवस्य । अत एव

संभ्रान्तनन्दिकरघूर्णितवेत्रपात-
भीतापगत्वरगणव्रजवर्जितेन ।
एतेन कीर्णकुसुमेन पथा महेशं
सेवस्व भक्तिमददुर्लभसंनिधानम् ॥ १७ ॥

(ततः प्रविशति यथानिर्दिष्टः परमेश्वर्या सह परमेश्वरः ।)

**परमेश्वरः**—अयि गिरीन्द्रसुते,

अनितरसाधारणया भक्त्या जीवस्य मामनुसरतः ।
सपदि मयास्य पुरस्तत्संनिहितं सपरिवारेण ॥ १८ ॥

**देवी**—देव, तुरिअं तुह आगमणं एव्व दंसेदि अणण्णतुल्लं भत्तिमत्तणम् । (क)

(क) देव, त्वरितं तवागमनमेव दर्शयत्यनन्यतुल्यं भक्तिमत्त्वम् ।

**राजा**—(मन्त्रिणा सह त्वरितमुपसृत्य ।)

विधिहरिविषमेक्षणात्मकः सन्सृजति बिभर्ति निहन्ति यो जगन्ति ।
तदहममलमेकमेव सच्चित्सुखवपुषं परमेश्वरं नतोऽस्मि ॥ १९ ॥

(इति प्रणमति ।)

**भगवान्**—वत्स, मन्त्रिणा सममभिमतेन युज्यस्व ।

**जीवः**—(मन्त्रिणा सहोत्तिष्ठन् । शिरस्यञ्जलिं बद्ध्वा ।)

जय जय जगदीश देवासुरावध्यतादर्पवेगोद्धृतत्वत्पदाङ्गुष्ठनिष्पीडनस्तब्धकैलासमूलात्तदोर्विंशतिप्रस्तुतस्तोत्रपुष्यद्दयारक्षितोन्मुक्तलङ्कापते निष्प्रपञ्चाकृते

जननमरणलाभपौनःपुनोदीततद्भञ्जनारब्धघोरव्रतप्रीणितत्वत्कठोरश्रवःप्रार्थनाजातकोपोत्थशापामिषांशीभवत्तापसत्राणकृद्रामरूपग्रह स्वेषु सानुग्रह ।

अनुपमितगृहीततारुण्यलक्ष्मीनिरीक्षोन्मिषद्दारुकारण्यनारीव्रतभ्रंशकुप्यन्मुनीन्द्राभिचारोत्थितं तुङ्गनादं कुरङ्गं ज्वलज्ज्वालमग्निं कराभ्यां वहन्दृश्यसे सद्भिरामृश्यसे

कलशभवमहर्षिवातापिनिर्वापणादक्षिणोर्वीभरापादनाविन्ध्यसंस्तम्भनासिन्धुनाथाम्बुनिःशेषनिष्पानशक्तिप्रदायिस्वपादाम्बुजध्यानमाहात्म्य शंभो नमस्ते नमस्ते ॥ २० ॥

पुनः

प्रसूनशरदाहिने प्रबलकालकूटाशिने
कृतान्तपरिपन्थिने त्रिपुरगर्वनिर्वासिने ।
जटापटलयन्त्रितामरतरङ्गिणीस्रोतसे
प्रपन्नभयहारिणे प्रमथनाथ तुभ्यं नमः ॥ २१ ॥

निष्क्रियस्यापि देवस्य जगत्सृष्ट्यादिकर्मणि ।
प्रवृत्तिं कुर्वतीं देवीं प्रपद्ये भक्तवत्सलाम् ॥ २२ ॥

**देवी**—णाह, इमस्स मणोरहं पुच्छिअ झत्ति तं णिवत्तेहि ।(क)

---

(क) नाथ, अस्य मनोरथं पृष्ट्वा झटिति तं निर्वर्तय ।

**भगवान्**—प्रिये, किमत्र प्रष्टव्यम्। विदितमेव। यक्ष्मराजः कैश्चिदसाध्यरोगैः सहानुगतो विकुर्वाणो निर्मूलं छेत्तव्य इत्येतस्य मनोरथ इति तत एतस्मै योगसिद्धिमुपदिश्य निर्जितनिखिलरोगं ब्रह्मरन्ध्रस्थितचन्द्रमण्डलनिःष्यन्दमानामृताप्लुतशरीरं निजानन्दानुभवतुच्छीकृताखिलप्राकृतसुखान्तरं सफलमनोरथमेनं कृतार्थयिष्यामि।

**देवी**—(सहर्षम्।) सरिसं खु एदं तुम्हकेरस्स भत्तवच्छलस्स। (क)

**भगवान्**—वत्स जीव, योगसिद्धिमुपदिशामि ते।

**जीवः**—भगवन्, को नाम योगः कीदृशी वा तस्य सिद्धिः।

**भगवान्**—वत्स, श्रूयताम्। योगश्चित्तवृत्तिनिरोधः। चित्तं नामान्तःकरणम्। यच्चक्षुरादिकरणद्वारा बहिर्निगच्छद्विषयाकारेण परिणमति। यत्तादात्म्यापन्नो द्रष्टापि तद्रूपाकार एव परिभाव्यते। तदुक्तम्—

'ध्यायन्त्यां ध्यायतीवात्मा चलन्त्यां चलतीव च।
बुद्धिस्थे ध्यानचलने कल्प्येते बुद्धिसाक्षिणि॥' इति।

'ध्यायतीव लेलायतीव' इति श्रुतिः। तस्य वृत्तयो नाम कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्याद्याः श्रुतीरिता आन्तराः, बाह्याश्च शब्दस्पर्शादिविषयग्राहिण्यः। सत्त्वरजस्तमोरूपगुणत्रयात्मिकानां च तासां दैवासुरसंपद्रूपत्वेन द्वेधा विभाग उक्तो गीतायाम्—

'अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥'

इत्यादिर्दैवी संपत्। 'दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च' इत्यादिरासुरी संपत्। तत्र दैवी संपत्सात्त्विकी। आसुरी तु रजस्तमःप्रधाना। 'दैवी संपद्विमोक्षाय निबन्धायासुरी मता'। तासां च सर्वासामान्तरीणां बाह्यानां च चित्तवृत्तीनां निरोधो नाम स्वविषयेभ्यः प्रतिनिवर्त्य क्वचित्सगुणे निर्गुणे वा वस्तुनि चित्तस्य समवस्थानम्। तच्च दृढतरवैराग्यसत्कारनिरन्तरसेवनाभ्यां सबलेन लभ्यते। तदुक्तम्—

---

(क) सदृशं खल्वेतद्युष्मादृशस्य भक्तवत्सलस्य।

'असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥' इति ।

एतादृशस्य योगस्य सिद्धिर्नाम ध्येयवस्तुसाक्षात्काररूपावस्थितिः ।

**मन्त्री**—भगवन्,

एवंभूताः क इव घटते चित्तवृत्तीर्निरोद्धुं
वैराग्येणाभ्यसनविधिना स्याच्चिरात्तन्निरोधः ।
जेयः शीघ्रं रिपुरपरथा न स्थितिर्नः पुरेऽतो
योगे सिद्धिर्भवति च यथानुग्रहस्ते तथास्तु ॥ २३ ॥

**जीवः**—भगवन्,

स्मृतिस्ते सकलाभीष्टं दत्ते किमुत दर्शनम् ।
तत्प्राप्तममितैः पुण्यैः सद्यः सिद्धिं ददातु मे ॥ २४ ॥

**देवी**—(सदयम् ।) देव, संकप्पादो जेव्व से जोअसिद्धी होदु त्ति अणुगेह्णीअदु एसो । (क)

**भगवान्**—वत्स, देव्यैवमनुगृहीतोऽसि । संकल्पादेव ते योगसिद्धिर्भवतु ।

**मन्त्री**—राजन्, भगवत्या भगवता च संकल्पादेवाखिलयोगसिद्धिरनुगृहीता । तत्सर्वथा कृतार्थाः स्मः ।

**राजा**—(सप्रणामम् ।) अनुगृहीतैवेयम् । यतः ।

या प्रत्यक्षपदार्थमात्रविषया सा योगसंस्कारतः
संस्कारान्प्रतिबध्नतीतरकृतान्धीः कापि मे जृम्भते ।
सूक्ष्मं यत्तु विदूरमव्यवहितं सर्वान्विशेषान्स्फुटं
पश्याम्येष यथावदद्य परमार्थोद्भूतया प्रज्ञया ॥ २५ ॥

आश्चर्योऽयं भगवत्प्रसादमहिमा ।

**भगवान्**—देवि, एवं संप्रज्ञातसमाधिरेतस्य प्रादुर्भूतः, य एवमालम्बनामनुभवति ऋतंभरां नाम प्रज्ञाम् । अतः परं निर्बीजयोगसंज्ञमसंप्रज्ञातसमाधिमस्यानुगृह्णामि ।

---

(क) देव, संकल्पादेवास्य योगसिद्धिर्भवत्वित्यनुगृह्यतामेषः ।

**देवी**—अणुगेह्लीअदु अप्पणिव्विसेसो एसो । (क)

**जीवः**—(सहर्षोल्लासरोमाञ्चम् ।) आश्चर्यमाश्चर्यम् ।

भगवन्करुणासमित्समिद्धे दृढनिर्बीजसमाधियोगवह्नौ ।
प्रविलापितसर्वचित्तवृत्तिः परमानन्दघनोऽस्मि नित्यतृप्तः ॥ २६ ॥

**भगवान्**—देवि, झटिति विघटिताखिलपराग्वृत्तिः प्रत्यगात्मैक्यानुभवरूपोऽसंप्रज्ञातसमाधिराविर्भूतो वत्सस्य । यत एवमनुभूतमर्थमनुवदति ।

**देवी**—देव, किदत्थो खु एसो जो एवंविधस्स देवाणुग्गहस्स भाअणं जादो । (ख)

**भगवान्**—संप्रत्येनं व्युत्थाप्य प्रकृतकार्यप्रवणं करोमि । (जीवं प्रति ।) वत्स, अन्यदपि किंचिदनुशासनीयोऽसि ।

**जीवः**—(व्युत्थाय ।) भगवन्, अवहितोऽस्मि ।

**भगवान्**—

प्राचीनः सचिवः प्रियस्तव सुहृद्यो ज्ञानशर्मा मुनिः
सोऽन्यस्यापि सुदुर्लभः स भवता मान्यः सदाहं यथा ।
श्रेयःसंघटनाय हन्त भवतः सत्यं स एवार्हति
प्रेयस्त्वैहिकमातनोतु सततं विज्ञानशर्मापि ते ॥ २७ ॥

शश्वज्ज्ञानादभिन्नः सन्विज्ञानमपि मानय ।
एवं सति घटेयातां भुक्तिमुक्ती करे तव ॥ २८ ॥

**राजमन्त्रिणौ**—(साष्टाङ्गं प्रणम्योत्थाय ।) अनुगृहीतौ स्वः ।

**देवी**—सुमरणमेत्तसंणिहिदं णाणसम्माणं सचिवं विण्णाणेण समं मुत्तविरोहं करिअ दुवे वि मन्तिणो रण्णो हत्थे समप्पअन्तेण भअवदा बहुलीकिदं भत्तवत्सलत्तणम् । (ग)

---

(क) अनुगृह्यतामात्मनिर्विशेष एषः ।

(ख) देव, कृतार्थः खल्वेष य एवंविधस्य देवानुग्रहस्य भाजनं जातः ।

(ग) स्मरणमात्रसंनिहितं ज्ञानशर्माणं सचिवं विज्ञानेन समं मुक्तविरोधं कृत्वा द्वावपि मन्त्रिणौ राज्ञो हस्ते समर्पयता भगवता बहुलीकृतं भक्तवत्सलत्वम् ।

(नेपथ्ये ।)

जीवे शिवप्रापितयोगसिद्धौ कालो जनान्ध्येन समं तमोवत् ।
पापो विषूच्या सह राजयक्ष्मा गदैरसाध्यैः सह नाशमेति ॥ २९ ॥

ईशानस्य निदेशात्प्राप्ता साप्यत्र शांकरी भक्तिः ।
चत्वारोऽपि पुमर्थाः पुंभिर्यस्याः प्रसादतो लभ्याः ॥ ३० ॥

**मन्त्री**—(आकर्ण्य ।) प्रियं नः प्रियम् । भगवान्काल एष एवं नः प्रियमाचष्टे ।

**राजा**—(सहर्षोल्लासम् ।)

मूर्धन्यमण्डलनिकेतसुधांशुबिम्ब-
निःष्यन्दिशीतलसुधास्रुतिनिर्वृताङ्गः ।
मेघावृतिव्यपगमे गगनं यथाच्छं
चैतन्यमावरणवर्जितमस्मि तद्वत् ॥ ३१ ॥

**मन्त्री**—एवमेवायं जीवो राजा भगवतोः प्रसादान्नीरोगो नित्यमुक्तो निराबाधो बहुकालं जीयादिति प्रार्थये ।

**भगवान्**—तथैवास्तु ।

**देवी**—तह होदु । (क)

**राजा**—(सहर्षविस्मयं मन्त्रिणं प्रति ।)

मन्त्रिञ्जन्मैव दोषः प्रथममथ तदप्याधिभिर्व्याधिभिश्चे-
ज्जुष्टं कष्टं बतातः किमधिकमपि तु त्वन्मतेर्वैभवेन ।
देव्या भक्त्याः प्रसादात्परमशिवमहं वीक्ष्य कृच्छ्राणि तीर्णः
सर्वाणि द्राक्कदत्यद्भुतमिह शुभदं संविधानं तवेदम् ॥ ३२ ॥

**मन्त्री**—राजन्,

बहुजन्मार्जितैः पुण्यैस्तावकैरेष तोषितः ।
सर्वाभीष्टं ददातीशः संविधानं किमत्र मे ॥ ३३ ॥

**भगवान्**—वत्स, किमतः परमन्यत्तव प्रियं कुर्मः ।

---

(क) तथा भवतु ।

राजा—देवदेव भगवन्, सर्वमपि प्रियमाचरितमेव ।

सर्वेऽपि मे प्रशमिता रिपवः पुरेऽभू-
दारोग्यमैक्षिषि भवन्तमुमासहायम् ।
योगं ततस्त्वदुपदिष्टमवाप्य जीव-
न्मुक्तोऽस्मि ते करुणया किमतः प्रियं मे ॥ ३४ ॥

तथापीदमस्तु भरतवाक्यम् ।

पर्जन्यः समयेऽभिवर्षतु फलं वाञ्छानुरूपं मही
प्रौढामात्यनिरूपिते पथि महीपालाः पदं तन्वताम् ।
कर्णालंकृतये भवन्तु विदुषां कान्ताः कवीनां गिरो
भूयादस्य कवेश्चिरायुररुजो भक्तिश्च शैवी दृढा ॥ ३५ ॥

(इति निष्क्रान्ताः सर्वे ।)

कृतिरियं श्रीमद्भारद्वाजकुलजलधिकौस्तुभस्य श्रीनरसिंहरायमन्त्रिवरनन्दनस्य श्रीमदानन्दरायमखिनः[1] ।

समाप्तोऽयं ग्रन्थः ।

---

१. अयं जीवानन्दनप्रणेता श्रीमदानन्दरायमखी नृंसिंहरायाध्वरिसूनुस्त्र्यम्बकदीक्षितस्य भ्रातृव्यस्तञ्जौरनगरमहीपतेरेकक्षितिपालवंशतिलकस्य शरभापरपर्यायस्य श्रीशाहराजस्य मन्त्रिप्रवर आसीदित्यादि सर्वं जीवानन्दनस्यैतत्प्रणीतस्यैव विद्यापरिणयनाटकस्य च प्रस्तावनातः प्रतीयते. स च शरभमहीपतिः ख्रिस्ताब्दीयसप्तदशशतकपूर्वार्धे आसीदिति स एवास्य समयः. एतत्कृतिषु जीवानन्दनं विद्यापरिणयं चेति नाटकद्वयमस्माभिरुपलब्धम्. जीवानन्दने यद्यपि नास्ति कवित्वचमत्कारस्तथापि संविधानकमनुच्छिष्टं चिकित्साशास्त्रानुकूलमिति कृत्वैवास्य काव्यमालायां प्रवेशः. तत्र जयपुरराजगुरुकुलप्रसूतभट्टश्रीकृष्णकुमाराणां संग्रहादेकमेवास्य शुद्धं पुस्तकमुपलब्धम्. चिरं विहितेऽप्यन्वेषणे पुस्तकान्तरालाभात्तस्मादेव पुस्तकादेतन्मुद्रणमकारीति भद्रम्.